ॐ

श्रीपरमात्मने नमः ।

# सनातनजैनग्रंथमालायाः

एकादशमोऽङ्कः ।

९

श्रुतकेवलिदेशीयाचार्यशाकटायनविरचितं

# शब्दानुशासनं ।

यक्षवर्मकृतचिंतामणिवृत्तिसहितं ।

( १ )

प्रकाशिका-

काशीस्थ-भारतीयजैनसिद्धांतप्रकाशिनी संस्था

संपादकः —

श्रीयुतपंडितमुन्नालालो व्याकरणविशारदः ।

Ac. Gunratnasuri MS Jin Gun Aradhak Trust

# सूचना ।

यह व्याकरण वही अतिप्राचीन शाकटायनव्याकरण है ।जिसका मत पाणिनीय व्याकरणमें लङः शाकटायनस्य ३।४।१११। व्योर्लघुप्रयत्नतरः शाकटायनस्य ।८।३।१८। और त्रिप्रभृतिषु शाकटायनस्य ।८।४।५०। इन सूत्रोंमें ग्रहण किया गया है क्योंकि शाकटायनके जिन सूत्रोंका पाणिनि महाराजने मत ग्रहण किया है वे सूत्र इसी व्याकरणमे मिलते हैं इसकारण यह व्याकरण पाणिनीयसे भी पहिलेका बना हुवा है । परंतु पूना डेकनकालेजके प्रोफेसर के. बी. पाठकमहाशय प्रभृति ऐतिहासिक विद्वान् कहते हैं कि यह शाकटायनाचार्य वे नहीं हैं जिनका मत पाणिनि व्याकरण में लिया गया है । वे शाकटायनाचार्य वैदिकशाकटायन नामसे जुदे हैं और यह शाकटायन जैनाचार्य और प्रथम अमोघवर्ष राजाके समकालीन हैं । परंतु इस शाकटायनको आधुनिकसिद्ध करनेकेलिये जो जो प्रमाण दिये गये हैं वे ठीक व पुष्ट नहीं हैं इसकारण यह विषय अभी विवादग्रस्त है इस चिंतामणिलघुवृत्तिके पूर्ण होनेपर इसकी प्रस्तावनामें इस विषयका अच्छी तरहसे सप्रमाण निर्णय किया जायगा । तब तक जिन विद्वानोंको शाकटायनके विषयमें जो कुछ ऐतिहासिक प्रमाण मिलें हमारे पास भेजेंगे तो बड़ी कृपा होगी ।

निवेदक—**मुन्नालाल जैन,**

ठि.—भारतीयजैनसिद्धांतप्रकाशिनी संस्था

पोष्ट—बनारस सिटी ।

सनातनजैनग्रंथमालाकी

## नियमावली ।

१. इस ग्रंथमालामें मूल संस्कृत प्राकृत तथा संस्कृतटीका सहित दिगंबरजैनाचार्यकृत दर्शन, सिद्धांत, न्याय, अध्यात्म, व्याकरण, काव्य, साहित्य, पुराण, इतिहास, गणित, ज्योतिष, वैद्यकप्रभृति सर्वप्रकारके प्राचीन ग्रंथ ही छपते हैं ।

२. इस ग्रंथमालाका प्रत्येक अंक ( खंड ) दश फारमसे ( ८० पृष्ठसे ) कम नहीं होगा । और प्रत्येक खंडमें एक दो या तीनसे अधिक ग्रंथ नहिं रहैंगे ।

३. इस ग्रंथमालाका मूल्य १२ अंकोंका सर्वसाधारणसे ८) रु. प्रथम ही ले लिया जायगा और नैयायिक, वैदांतिक विद्वानों और संस्कृतपुस्तकालयोंकी सेवामें यह ग्रंथमाला विना मूल्य भी भेजी जायगी । परंतु पोष्टेज खर्च प्रत्येक अंकका तीन आने वी. पी. से सबको देना होगा ।

४. जो महाशय एक साथ १००) रु. भेजेंगे वे यावज्जीव स्थायी ग्राहक समझे जावेंगे अर्थात् उन्हें यह ग्रंथमाला उमर पर्यंत विना मूल्य भेजी जायगी । परंतु मार्गव्यय उनको भी जुदा देना होगा

५. जो दानी महाशय पुस्तकालयों, मंदिरों, विद्यार्थियों वा विद्वानोंको वितरण करनेकेलिये दानी ग्राहक बनेंगे उनको १००) रु. पेशगी भेजनेसे १२ अंक तक पंद्रह २ प्रति प्रत्येक अंककी भेजी जायगी । मार्गव्यय पृथक् देना होगा । ऐसे ग्राहकोंका नाम संस्थाके प्रचारकोंमें लिखा जायगा ।

मूल्य व पत्र भेजनेका पता— ☛ **पन्नालाल जैन,**

व्यवस्थापक—भारतीयजैनसिद्धांतप्रकाशिनी संस्था ।

पोष्ट—बनारस सिटी ।

Ac. Gunratnasuri MS Jin Gun Aradhak Trust

श्रीपरमात्मने नमः ।

## सनातनजैनग्रंथमाला

१०

श्रुतकेवलिदेशीयाचार्यशाकटायनकृतं

# शब्दानुशासनं

## चिंतामणिवृत्तिसहितं ।

मंगलाचरणं ।

श्रियं क्रियाद्वः सर्वज्ञज्ञानज्योतिरनश्वरी । विश्वं प्रकाशयच्चिंतामणिश्चिंतार्थसाधनः ॥ १ ॥
नमस्तमःप्रभावाभिभूतभूद्योतहेतवे । लोकोपकारणे शब्दब्रह्मणे द्वादशात्मने ॥ २ ॥
स्वस्ति श्रीसकलज्ञानसाम्राज्यपदमाप्तवान् । महाश्रमणसंघाधिपतिर्यः शाकटायनः ॥ ३ ॥
सर्वशास्त्रांबुधिं बुद्धिमंदरेण प्रमथ्य यः । स यशःश्रि समुद्दध्रे विश्वं व्याकरणामृतं ॥ ४ ॥
स्वल्पग्रंथं सुखोपायं संपूर्णं यदुपक्रमं । शब्दानुशासनं सार्वमर्हच्छासनवत्परं ॥ ५ ॥
इष्टिर्नेष्टा न वक्तव्यं वक्तव्यं सूत्रतः पृथक् । संख्यातं नोपसंख्यातं यस्य शब्दानुशासने ॥ ६ ॥
तस्यातिमहतीं वृत्तिं संहृत्येयं लघीयसी । संपूर्णलक्षणा वृत्तिर्वक्ष्यते यक्षवर्मणा ॥ ७ ॥
ग्रंथविस्तरभीरूणां सुकुमारधियामयं । शुश्रूषादिगुणान् कर्तुं शास्त्रे संग्रहणोद्यमः ॥ ८ ॥
शब्दानुशासनस्यान्वर्थायाश्चिंतामणेरिदं । वृत्तेर्ग्रंथप्रमाणं तु षट्सहस्रं निरूपितं ॥ ९ ॥

इंद्रचंद्रादिभिः शाब्दैर्यदुक्तं शब्दलक्षणं ।
तदिहास्ति समस्तं च यन्नेहास्ति न तत् क्वचित् ॥१०॥
गणधातुपाठयोर्गणधातूँल्लिंगानुशासने लिंगगतं ।
[1]उणादिकानुणादौ शेषं निःशेषमत्र वृत्तौ विद्यात् ॥ ११ ॥
बालाबलाजनोऽप्यस्या वृत्तेरभ्यासवृत्तितः ।
समस्तं वाङ्मयं वेत्ति वर्षेणैकेन निश्चयात् ॥ १२ ॥

---

१—औणादिकानित्यपि कपुस्तके पाठः

Ac. Gunratnasuri MS Jin Gun Aradhak Trust

तत्र सूत्रस्यादावयं मंगलश्लोकः ।

**नमः श्रीवर्धमानाय प्रबुद्धाशेषवस्तवे ।**
**येन शब्दार्थसंबंधाः सार्वेण सुनिरूपिताः॥१॥**

शब्दार्थसंबंधाः वाचकवाच्ययोग्यताः, अथवा आगमप्रयोजनोपायोपेयभावोऽस्ति । येन सर्वसत्वहितेन तत्त्वतः प्रज्ञापितास्तस्मै श्रीमते महावीराय साक्षात्कृतसकलद्रव्याय " नमस्करोमि " इत्यध्याहारः । इति विघ्नप्रशमनार्थमर्हद्देवतानमस्कारं परममंगलमारभ्य भगवानाचार्यः शाकटायनः शब्दानुशासनं शास्त्रमिदं प्रारभते ।

धर्मार्थकाममोक्षेषु तत्त्वार्थावगतिर्यतः ।
शब्दार्थज्ञानपूर्वेति वेद्यं व्याकरणं बुधैः ॥

**अइउण्**[1] । १ । **ऋक्** । २ । **एओङ्** । ३ । **ऐऔच्** । ४ । **हयवरलञ्** । ५ । **ञमङणनम्** । ६ । **जबगडदश्** । ७ । **झभघढधष्** । ८ । **खफछठथट्** । ९ । **चटतव्** । १० । **कपय्** । ११ । **शषसअंअः×क×पर्** । १२ । **हल्** । १३ ।

इति वर्णसमाम्नायः क्रमानुबंधोपादानः प्रत्याहारयन् शास्त्रस्य लाघवार्थः । सामान्याश्रयणात् दीर्घप्लुतानुनासिकग्रहणं ।

ह्रस्वदीर्घप्लुतहलोऽप्येकद्वित्र्यर्धमात्रिकाः ।
नासिकामनुयातश्च वर्णः स्यादनुनासिकः ॥

ऋ इत्यनेन ऌवर्णस्यापि ग्रहणं भवति । " दूरादामंत्र्यस्य गुरुर्वैको ऌनृन् " इति ऌग्रहणात् । तथा च " ऋत्यक " इति ऌकारोपि सिद्धं । हकारस्य द्विरुपदेशोऽषशलादौ च ग्रहणार्थः । हाकारादिष्वकारादय उच्चारणार्थाः ।

**सात्मेतेत्**[1] ॥ १ ॥

संज्ञासूत्रमेतत । इता सहोच्चार्यमाणो वर्णः समुदायो वात्मनः प्रभृत्या तस्मात् इता व्यवस्थितानां संज्ञा भवत्यात्मना सह ॥ अण् । अक् । अच् । हल् । सुप् । सुट् । तिङ् । सम् । कण् । संज्ञानियमनिषेधाधिकारनित्यापवादविधिपरिभाषाः । अतिदेशाविकल्पाविति गतयःशब्दानुशासने सूत्राणां ॥

**उता स्वः**[2] ॥ २ ॥

उकारेणेता सहोपादीयमानो वर्णः स्वस्य वर्गस्यात्मना सह संज्ञा भवति॥ कु चु टु तु पु ।

**तेयान्**[3] ॥ ३ ॥

तकारेणेता सहोपादीयमानो वर्णः इयान् यावन्मात्र उपात्तस्तावन्मात्र एवासौ वेदितव्यः । अत् । इत् । उत् । ऋत् ।

**भाव्योऽग्**[4] ॥ ४ ॥

भाव्यो विधेयः । प्रत्ययविकारागमरूपः अगकारको वर्ण इयानेव वेदितव्यः । भिक्षुः, अस्मै, अष्टाभिः, लविता । अगिति किं ? अमुं । अमू ।

*** अप्रयोगीत्**[5] ॥ ५ ॥

इहोपदिश्यमानो वर्णः समुदायो वा यो लौकिकशब्दप्रयोगे न दृश्यते स इत्संज्ञो भवति ॥ एधि-एधते । अइउण्-अण् । टुवेपृङ्-वेपथुः । डुकृञ्-कृत्रिमं ।

**स्वः स्थानास्यैक्ये**[6] ॥ ६ ॥

स्थानं कंठादि । आस्यं मुखं । ओष्ठात् प्रभृति प्राक्काकलकात् तत्र भवं । स्पृष्टादिप्रयत्नपंचकमास्यं ।

---

( १ ) अइउण् । ऋऌक् । एओङ् । ऐऔच् । हयवरलण् । ञमङणनम् । झभञ् । घढधष् । जबगडदश् । खफछठथचटतव् । कपय् । शषसअंअः × क×पर् हल् इति जैनेन्द्रप्रत्याहारसूत्राणि .

१—आदिरंत्येन सहेता ।१ । १ । ७१ ।

२—४–अणुदित्सवर्णस्य चाप्रत्ययः । १ । १ । ६९ । ३–तपरस्तत्कालस्य । १ । १ । ७० । ५–उपदेशेऽजनुनासिक इत् ॥१।३।२।हलंत्यं १ । ३ । ३। आदिर्ञिटुडवः । १ । ३ ।५। षः प्रत्ययस्य । १ । ३ । ६ ॥ चुटू ।१।३। ७। लशक्वतद्धिते ।१।३।८। ६–तुल्यास्यप्रयत्नं सवर्णं । १ । १। ९ । * एतच्चिह्नितसूत्राणि जैनेंद्रव्याकरणेऽप्युपलभ्यंते

Ac. Gunratnasuri MS Jin Gun Aradhak Trust

कंठोष्ठमूर्धजिह्वा दंतोरस्तालुनासिकावर्णानां ।
स्थानान्यास्यं स्पृष्टेत्स्पृष्टं विवृतसंवृतेषद्विवृतं ॥

तयोरभेदे वर्णो वर्णस्य स्वो नाम वेदितव्यः । अकुहविसर्जनीयजिह्वामूलीयाः कंठ्याः । कुर्जिह्वामूले । हविसर्जनीयौ उरस्यौ । जिह्वामूलीयो जिह्व्यः । सर्वमुखस्थानमवर्णमित्येके । इएऐचुयशास्तालव्याः । एऐ कंठ्यतालव्यावेकेषां उओऔपूपध्मानीया ओष्ठ्याः । ओ औ कंठ्योष्ठ्यावेकेषां । वो दंत्योष्ठ्यः । सृक्कस्थानमेकेषां । ऋटुरषा मूर्धन्याः । रेफो दंतमूल एकेषां । लृतुलसा दंत्याः । नासिक्योऽनुस्वारः । कंठनासिक्य एकेषां । आस्यं स्पृष्टं करणं स्पर्शानां । ईषत्स्पृष्टमंतःस्थानां । विवृतमूष्मणां स्वराणां च । ए ओ विवृततरौ । ताभ्यां एङ् । ताभ्यामवर्णः । ईषद्विवृतमूष्मणां । संवृतमकारस्येति । अ अ अ इत्याकारः उदात्तोऽनुदात्तः स्वरितश्चानुनासिको निरनुनासिकश्चेति षट् । परं दीर्घप्लुताविति द्वादशावर्णभेदाः परस्परस्य स्वे भवंति । एवमिवर्णादीनां त्वष्टादश भेदाः । लृवर्णस्यानुकरणादन्यत्र दीर्घो नास्तीति द्वादश भेदाः । एचां ह्रस्वाभावात् द्वादश भेदाः । यवलानामनुनासिकोऽननुनासिकश्चेति द्वौ भेदौ । वर्ग्योः पंच पंच । रेफोष्मणां स्वे न संति ।

**आसन्नः[1] ॥ ७ ॥**

इहासन्नानासन्नप्रसंगे स्थानगुणप्रमाणादिभिर्यथास्वमासन्न एव विधिरुपात्तो वेदितव्यः । तत्र स्थानेन—" दीर्घः " १ । १ । ७७ । लोकाग्रं । मुनींद्रः । गुणेन—" क्तेऽनिट् चजः कुर्धिति " ४।१।१७१ । पाकः । त्यागः । चकारस्याऽघोषस्याऽल्पप्राणस्य तादृश एव ककारः। जकारस्य घोषवतोऽल्पप्राणास्य तादृश एव गकारः। प्रमाणेन—" दोमोऽस्यादसोमाद्दुश्चाषिन्यसन् १ । २ । ४४ । अमुष्मै । अमूभ्यां । मात्रकस्य मात्रिकः । द्विमात्रकस्य द्विमात्रिकः । अर्थेन—मानिस्त्र्येकार्थयोस्त्र्यन्यतोऽनूः ॥ २ । २ । ४१ । वातंडय्युवतिः । दारदवृंदारिका । वतंडिशब्दस्यापत्यार्थस्य तदर्थो वातंड्यभावः दरच्छब्दस्य दारदः ।

**संबंधिनां संबंधे[1] ॥ ८ ॥**

संबंधिशब्दानां यत्कार्यमुच्यते तत् संबंधे सत्येव भवति नान्यत्र । श्वशुराद्यः ।२।४।९४। श्वशुर्यः । संज्ञायां तु श्वशुरादिञेव श्वाशुरिः ।

**घट्वति संख्या[2] ॥ ९ ॥**

घत् डति प्रत्ययांतं संख्यावद् भवति । एकाधिका संख्या तत्कार्यं प्रतिपद्यत इत्यर्थः । यावत्कः । यावद्धा । यावत्कृत्वा । यतिधा । यतिकृत्वा ।

*** बहुगणं भेदे[3] ॥ १० ॥**

बहु-गण इत्येतौ शब्दौ भेदे वर्तमानौ संख्यावद्भवतः । भेदो नानात्वमेकत्वप्रतियोगी । बहुकः। बहुधा। बहुकृत्वः। गणकः। गणधा। गणकृत्वः। भेद इति किं ? वैपुल्ये संघे च मा भूत् ।

**कसमासेऽध्यर्धः[4] ॥ ११ ॥**

अध्यर्धशब्दः कप्रत्यये विधातव्ये समासे च संख्यावद्भवति ॥ अध्यर्धकं । अध्यर्धशूर्पं । क्रीते प्रत्ययस्य द्विगोः प्शालुक् ।

**अर्धपूर्वपदो डत्[5] ॥ १२ ॥**

अर्धपूर्वपदो डत्प्रत्ययांतः शब्दः कसमासयोः संख्यावद्भवति । डदिति " संख्यापूर्णे डत् " इत्यारभ्य आ " द्वित्रेस्तीयतः " तकारेण प्रत्याहारः । अर्धपंचमकं । अर्धपंचमशूर्पं ।

---

१–स्थानेंऽतरतमः । १ । १ । ५० ।

१–अस्य स्थाने नास्ति सूत्रं । २–३–बहुगणवत्तुडति संख्या १।१।२३॥४-५-अर्धपूर्वपदश्च पूरणप्रत्ययांतः संख्यासंज्ञो भवतीति वक्तव्यं, समासकन्विध्यर्थं। इति वार्तिकं ॥

Ac. Gunratnasuri MS　　Jin Gun Aradhak Trust

*** पौत्रादि वृद्धं[1] ॥ १३ ॥**

परमप्रकृतेरपत्यवतः यत्पौत्राद्यपत्यं तद्वृद्धसंज्ञं भवति॥गर्गस्यापत्यं पौत्रादि गार्ग्यः ।वात्स्यः अनंतरापत्यं गार्गिः । वात्सिरित्येव भवति ॥

**प्रपौत्राद्यस्त्रीवंश्यज्यायो भ्रात्रोः सति[2] युवा॥१४॥**

प्रपौत्रः पौत्राद्यपत्यं परमप्रकृतेश्चतुर्थः । वंशे भवो वंश्यः । पित्रादिरात्मनः कारणं । ज्यायान् भ्राता वयोऽधिकः एकपितृकः एकमातृको वा । परमप्रकृतेः प्रपौत्राद्यपत्यं स्त्रीवर्जितं वंश्ये सति जीवति पुत्रादि, ज्यायसि च भ्रातरि कनीयान् भ्राता युवसंज्ञो भवति ॥ गार्ग्यायणः । वात्स्यायनः । परमप्रकृतिर्गर्गस्तस्यानंतरापत्यं गार्गिस्तदनंतरापत्यं वृद्धो गार्ग्यः तृतीयः स्यात् । तुरीयो (तुर्य्यो) गार्ग्यायणो युवा। प्रपौत्रादीति किं? पौत्रो गार्ग्यः । अस्त्रीति किं? स्त्री गार्गी ।

**सत्सपिंडेऽधिवयःस्थाने वा[3] ॥ १५ ॥**

ययोः पूर्वः सप्तमः पुरुषः एकस्तावन्योन्यस्य सपिंडौ । वयो—यौवनादि । स्थानं पिता पुत्र इत्यादि । परमप्रकृतेः प्रपौत्राद्यपत्यं स्त्रीवर्जितं वयःस्थानाभ्यां द्वाभ्यामप्यधिके सपिंडे जीवति सति सज्जीवदेव युवसज्ञं वा भवति ॥ पितृव्ये पितृव्यस्य पितरि पितामहे पुत्रे वा वयोधिके जीवति, गर्गस्यापत्यं जीवन् गार्ग्यः, गार्ग्यायणो वा । वात्स्यः, वात्स्यायनो वा । सदित्यादीति किं? अन्यत्र गार्ग्यः । स्त्री गार्गी ।

**युववृद्धं कुत्सार्चे[4] ॥ १६ ॥**

युवा च वृद्धश्चापत्यं यथाक्रमं कुत्सायामर्चायां च विषये युवसंज्ञं वा भवति । गर्गस्यापत्यं युवा कुत्सितो वा गार्ग्यः गार्ग्यायणो वा जाल्मः। गुरुमान् भूत्वा स्वतंत्र उच्यते । अन्यत्र गार्ग्यायण एव । गर्गस्यापत्यं वृद्धं अर्चितं गार्ग्यः, गार्ग्यायणो वा । अन्यत्र गार्ग्य एव ।

**नाम दुः[1] ॥ १७ ॥**

यन्नामध्येयं संव्यवहाराय हठान्नियुज्यते देवदत्तादि तद्दुसंज्ञं वा भवति ॥ देवदत्तीयाः । दैवदत्ताः ।

*** त्यदादिः[2] ॥ १८ ॥**

त्यदादयः शब्दाः नित्यं दुसंज्ञा भवंति । त्यदीयं । तदीयं । किमीयं । तादायनिः । यादायनिः । त्यदादिः सर्वाद्यंतर्गणः ।

**यस्याच्वादिरादैच्[3] ॥ १९ ॥**

यस्य शब्दस्याचामादिरच् आकारः ऐज्वा स दुसंज्ञो भवति॥आम्रगुप्तायनिः। शाल्मलगुप्तायनिः। आंबष्ठ्यः। एतिकायनीयः। सौवीर्यः। औपगवीयः।

**देश एवैङ् छादौ[4] ॥ २० ॥**

देश एव वर्तमानस्य यस्य शब्दस्याचामादेरेङ् भवति स छादौ प्रत्यये विधातव्ये दुसंज्ञो भवति ॥ सैपुरिकी । सैपुरिका । स्कोनगरिकी। स्कोनगरिका । सेपुरं स्कोनगरं च बाहीकग्रामौ । एवकारो नियमार्थः । तेन देशे, अन्यत्र च वर्तमानस्य न भवति ॥ गोनर्दीयः। छादाविति किं? फिञादौ न भवति ।

*** प्राग्देशे[5] ॥ २१ ॥**

प्राग्देशे वर्तमानस्य यस्य शब्दस्याचामादेरेङ् स छादौ प्रत्यये दुसंज्ञो भवति ॥ शरावती नाम नदी तदपेक्षया प्रागुदक्व्यवस्था । एणीपचनीयः। गोनर्दीयः। ऐकचक्रकः । नियमनिवृत्त्यर्थं वचनं ।

---

१—अपत्यं पौत्रप्रभृतिगोत्रं॥ ४ । १ । १६२ । २—जीवति तु वंश्ये युवा । ४ । १ । १६३ । भ्रातरि च ज्यायसि ४ । १ । १६४ । ३—वान्यस्मिन्सपिंडे स्थविरतरे जीवति ॥ ४ । १ । १६५ । ४—वृद्धस्य च पूजायां । ४ ।१।१६६॥ यूनश्च कुत्सायां ॥ ४ । १।१६७॥

१— नामध्येयस्य वा वृद्धसंज्ञा वक्तव्या इति वार्तिकं । २—त्यदादीनि च ॥ १ । १ । ७४ ॥ ३—वृद्धिर्यस्याचामादिस्तद्वृद्धं ।१। १ । ७३ ॥ ४—५ एङ् प्राचां देशे ॥ १ । १ । ७५ ॥

Ac. Gunratnasuri MS Jin Gun Aradhak Trust

### क्रियार्थो धातुः[1] ॥ २२ ॥

*क्रिया प्रवृत्तिः* पूर्वापरीभूतश्च साध्यमानरूपा सा अर्थोऽभिधेयं यस्य स शब्दो धातुसंज्ञो भवति ॥ भू-भवति । एधि-एधते । गोपाय-गोपायति । पापच्य-पापच्यते । पुत्रकाम्य-पुत्रकाम्यति । शिष्टप्रयोगानुसारित्वाल्लक्षणस्याऽऽणपयत्यादि-निवृत्तिः ।

### दाधा घ्वब्[2] ॥ २३ ॥

दारूपो धारूपश्च यो धातुः सोऽब-कारानुबंधो घुसंज्ञो भवति ॥ दारूपाश्चत्वारः । धारूपौ द्वौ । दाण्-प्रणिदाता । देङ्-प्रणिदयते । डुदाञ्-प्रणिददाति । दो-प्रणिद्यति । धेट्-प्रणि-धयति । डुधाञ्-प्रणिदधाति । अबिति किं ? दाब्-दातं बर्हिः । दैब्-अवदातं मुखं ।

### प्रादिर्नाप्रत्यये[3] ॥ २४ ॥

प्रादिः स्वराद्यंतर्गणः स न धातुर्धातो-रवयवो न भवति तं व्युदस्य ततः पर एव धातुसंज्ञो भवति अप्रत्यये-न चेत्ततः परः प्रत्ययो भवति ॥ अभ्यमनायत । अभिमिमनायिषते । अभिमनाय्य । प्रासादीयत् । प्रासिसादीयिषति । प्रासादीय्य । अप्रत्यये इति किं ? औत्सुका-यत । उत्सुकायिषते । उत्सुकायित्वा । असं-ग्रामयत शूरः इत्यत्र संग्राम इत्येतावान् युद्धार्थो धातुः नात्र सम्-प्रादिः ।

### तस्यागतार्थाधिपर्यचोस्वत्यतिक्रमात्यु-पसर्गः[4] प्राक् च ॥ २५ ॥

तस्य धातोः संबंधी तदर्थद्योती प्रादिरु-पसर्गसंज्ञो भवति प्राक् च ततो धातो-र्भवति यौ गतार्थावधिपरी इति यौ चार्चा-विषयौ सु अति इति, यश्चातिक्रमविषये अति इति तानेतान्वर्जयित्वा । प्रलंभः । परि-णमति । अभिषिंचति । उपसर्गत्वे नमादिः । तस्येति किं ? वृक्षं वृक्षमभिसिच्यते । अगतेत्या-दीति किं ? अध्यागच्छति । आगच्छत्यधि । पर्यागच्छति । आगच्छति परि । अध्यागमनिकः । पर्यागमनिकः । उपरिभावस्य सर्वतो भावस्य च प्रकरणादेः प्रतिपत्तौ गतार्थत्वं।अप्रतिपत्तौ-अध्या-गच्छति पर्यागच्छतीति प्राक्त्वमेव । अर्चासु स्वति-सुसिक्तं भवता । अतिस्तुतं भवता । अत्र धा-त्वर्थः प्रशस्यते । अन्यत्र-सुसिक्तं किं तवात्रेति धात्वर्थः कुत्स्यते । अतिक्रामति-अतिसिक्तमेव भवता । अतिस्तुतमेव । यदर्थः क्रिया तस्मिन् कार्य्ये निष्पन्नेऽपि क्रियाप्रवृत्तिरतिक्रमः । अन्यत्र अतिशय्य । प्राक् चेत्यधिकारः प्रागव्ययसंज्ञायाः ।

### डाच्च्व्यूर्याद्यनुकरणं[1] च ति ॥ २६ ॥

डाजंतं च्व्यंतमूरी इत्येवमाद्यनुकरणं उपसर्गसंज्ञं च धातोः संबंधि तिसंज्ञं भवति ॥ डाच्-पटपटाकृत्य । सपत्राकृत्य । च्वि-शुक्लीकृ-त्य । पटीकृत्य । ऊर्यादि-ऊरीकृत्य । उररी-कृत्य । अनुकरणं-खात्कृत्य । फट्कृत्य । उप-सर्गः—प्रकृत्य । परिहृत्य । च्विडाच्साधर्म्या-दूर्यादीनां कृभ्वस्तिभिरेव योगे तिसंज्ञा । ऊर्या-दयो गणपाठे द्रष्टव्याः ।

### कारिकालमदोंतस्सदसतास्स्थित्यादिभूषा-नुपदेशापरिग्रहादरक्षेपे[2] ॥ २७ ॥

स्थित्यादौ भूषानुपदेशापरिग्रहादरक्षेप इत्ये-

१—भूवादयो धातवः । १ । ३ । १ । २—दाधा घ्वदाप् । १ । १ । २० ॥ ३-पाणिनीयेऽस्य स्थाने नास्ति सूत्रं । ४-प्रादयः । १ । ४ । ५८ ॥ उपसर्गाः क्रियायोगे । १ । ४ । ५९ ॥अधिपरी अनर्थकौ । १ । ४ । ९३ । सुःपूजायां ॥ ९४ ।अतिरतिक्रमणे च ॥ ९५ ॥

१—ऊर्यादिच्विडाचश्च। १। ४ । ६१ ॥ अनुकरणं चानितिपरं ॥ १। ४ ।६२। २-कारिकाशब्दस्योपसंख्यानं इति वार्तिकं । भूषणेऽलं । १ । ४ । ६४ । अदोऽनुपदेशे । १ । ४ ७० । अंतरपरिग्रहे । १ । ४ । ६५ ।आदरा-नादरयोः सदसती ।१ । ४ । ६३ ॥

Ac. Gunratnasuri MS Jin Gun Aradhak Trust

तेषु चार्थेषु यथासंख्यं कारिका अलं अदस् अंतर् सत् असत् इत्येते शब्दाः धातोस्तिसंज्ञा भवंति ॥ स्थितिर्मर्यादा वृत्तिर्वा । आदिशब्दाद्यत्नादिर्गृह्यते । तत्र-कारिकाकृत्य । भूषा मंडनं, तत्र- अलंकृत्य । स्वयं परामर्शोऽनुपदेशः । तत्र- अदःकृत्य । परिग्रहः स्वीकारः, तदभावे-अंतर्हत्य । आदरः प्रीत्या संभ्रमः, तत्र--सत्कृत्य । क्षेपः परिभवः । तत्र-असत्कृत्य । स्थित्यादाविति किं ? कारिकां कृत्वा कर्त्रीमित्यर्थः । अलं कृत्वा, माकारीत्यर्थः । अदः कृत्वा गतः । अयं परस्य उपदेशः । अंतर्हत्वा मूषिकां श्येनो गतः, परिगृह्येत्यर्थः । सत्कृत्वा । विद्यमानमित्यर्थः। असत् कृत्वा । अविद्यमानमित्यर्थः ।

**कणेमनःश्रद्धोच्छेदे[1] ॥ २८ ॥**

कणे मनस् इत्येतौ शब्दौ श्रद्धाया अभिलाषस्योच्छेदे धातोस्तिसंज्ञौ भवतः ॥ कणेहत्य । मनोहत्य । श्रद्धामुच्छेद्येत्यर्थः । अन्यत्र-तंडुलस्य कणे हत्वा ; मनो हत्वा गतः ।

**अस्तंपुरोऽव्ययं[2] ॥ २९ ॥**

अस्तं पुरस् इत्येते अव्यये धातोस्तिसंज्ञे भवतः ॥ अस्तंगत्य । पुरस्कृत्य । अस्तमिति नाशे वर्तते । अनव्यये-अस्तं कृत्वा, क्षिप्तमित्यर्थः । पुरःकृत्वा, नगरीरित्यर्थः ।

**गत्यर्थवदोऽच्छः[3] ॥ ३० ॥**

अच्छेत्येतदव्ययमभिशब्दार्थे दृढार्थे च वर्तते । तत् गत्यर्थस्य वदेश्च धातोः संबंधि तिसंज्ञं भवति ॥ अच्छगत्य । अच्छव्रज्य । अच्छोद्य । अव्ययमिति किं ? अच्छमुदकं गत्वा ।

*** तिरोंऽतर्धौ[4] ॥ ३१ ॥**

तिरस् इत्येतदंतर्धौ व्यवधाने वर्तमानं धातोः

१—कणेमनसी श्रद्धाप्रतिघाते । १ । ४ । ६६ ॥ २—अस्तं च । १ । ४ । ६८ ॥ पुरोऽव्ययं । १ । ४ । ६७ । ३—अच्छ गत्यर्थवदेषु । १ । ४ । ६९ ॥ ४—तिरोंऽतर्धौ ॥ १ । ४ ।७१ ॥

संबंधि तिसंज्ञं भवति ॥ तिरोभूय । तिरोधाय । अन्यत्र-तिरो भूत्वा स्थितः । तिर्यग्भूत्वेत्यर्थः ।

**कृञो वा[1] ॥ ३२ ॥**

तिरस् इत्येतदंतर्धौ वर्तमानं कृञो धातोः संबंधि तिसंज्ञं भवति वा ॥ तिरस्कृत्य । तिरःकृत्य । अन्यत्र-तिरः कृत्वा ।

***मनस्युरस्युपाजेऽन्वाजेमध्येपदेनिवचने[2]॥३३॥**

मनसि उरसि उपाजे अन्वाजे मध्ये पदे निवचने इत्येतान्यव्ययानि कृञो धातोः संबंधीनि तिसंज्ञानि वा भवंति।उरसि, मनसि, अनत्याधानविषये । अत्याधानमुपश्लेषः आश्चर्यं च । मनसिकृत्य, मनसि कृत्वा । उरसिकृत्य, उरसि कृत्वा । उपाजेकृत्य, उपाजे कृत्वा । अन्वाजेकृत्य, अन्वाजे कृत्वा । मध्येकृत्य, मध्ये कृत्वा । पदेकृत्य, पदे कृत्वा।निवचनेकृत्य, निवचने कृत्वा।

*** स्वाम्ये[3]ऽधिः ॥ ३४ ॥**

अधिरित्ययमुपसर्गः स्वामिभावविषये कृञो धातोः संबंधी तिसंज्ञो भवति वा ॥ देवदत्तं ग्रामेऽधिकृत्य । देवदत्तं ग्रामेऽधिकृत्वा । स्वामिनं कृत्वेत्यर्थः । अन्यत्र-अचीत्यधिकृत्य । प्रादिरुपसर्ग इति वर्तते । तेनोपसर्गसंज्ञापि विकल्प्यत इति कृत्वाधीति प्राक्त्वस्याप्यनियमः ।

*** साक्षादाद्यच्वि[4] ॥ ३५ ॥**

साक्षादित्यादि च शब्दरूपमाच्वि-च्व्यर्थमच्व्यंतं कृञः संबंधि तिसंज्ञं वा भवति ॥ साक्षात्कृत्य । साक्षात्कृत्वा । मिथ्याकृत्य । मिथ्या कृत्वा । अच्वीति किं ? लवणीकृत्य । उष्णीकृत्य ।

१—विभाषा कृञि १ । ४ । ७२ ॥ २—अनत्याधानउरसिमनसी । १ । ४ । ७५ ॥ उपाजेऽन्वाजे । १ । ४ । ७३ ॥ मध्येपदेनिवचने च । १ । ४ । ७६ ॥ ३–विभाषा कृञि ॥ १ । ४ । ९८ ॥ ४–साक्षात्प्रभृतीनि च ॥ १ । ४ । ७४ ॥

Ac. Gunratnasuri MS Jin Gun Aradhak Trust

**नित्यं हस्तेपाणौ[1] स्वीकृतौ ॥ ३६ ॥**

हस्तेपाणावित्येतेऽव्यय आत्मीयीकरणे कृञः संबंधिनी तिसंज्ञे नित्यं भवतः । हस्तेकृत्य । पाणौकृत्य । अन्यत्र-हस्ते कृत्वा कार्षापणं गतः।

*** जीविकोपनिषदिवे[2] ॥ ३७ ॥**

जीविका, उपनिषद् इत्येतौ शब्दौ इवार्थे गम्यमाने कृञः संबंधिनौ तिसंज्ञौ भवतः। जीविकामिव कृत्वा जीविकाकृत्य । जीविकाकरोति । उपनिषतकृत्य, उपनिषत्करोति। अन्यत्र—जीविकां कृत्वा । उपनिषदं कृत्वा ।

*** प्राध्वं[3] बंधे ॥ ३८ ॥**

प्राध्वमित्येतन्मकारांतमव्ययमानुकूल्ये वर्तते । तदानुकूल्ये बंधहेतुके वर्तमानं कृञः संबंधि तिसंज्ञं भवति ॥ प्राध्वंकृत्य । अन्यत्र-प्रगतमध्वानं प्राध्वं, प्राध्वं कृत्वा शकटं गतः ।

**तस्वन्ङामधणतस्यांक्त्वांतुंतिसुङ्सस्वाभस्वरादीन्यव्ययं[4] ॥ ३९ ॥**

तस् वत् ङाम् इत्येतदंतानि धणवर्जिततस्यांतानि आम् क्त्वा अम् तुम् इत्येतदंतानि तिसंज्ञानि सुङ्ससुप्रतिरूपाणि स्वरादीनि च शब्दरूपाण्यव्ययसंज्ञानि भवंति । तस् "एकदिशि तस्" ३।१।१७९॥ पीलुमूलतो विद्योतते। वत्-मुनिवत् वृत्तं । ङाम्-उच्चैस्तमां । अधणतासि-रामतः। रावणतः। सर्वतः। सर्वत्र। बहुशः। तसीति "व्याश्रये तस्" ३।४।४। इत्यारभ्याशसेरिकारेण प्रत्याहारः । अधणिति किं ? पथिद्वैधानि । संशयत्रैधानि । आम्-दयांचक्रे । विदांकरोतु । क्त्वा-कृत्वा । हृत्वा । धृत्वा । अम्-पूर्वं भोजं । कन्यादर्शं वरयति । तुम्-कर्तुं । हर्तुं । ति-अधःकृत्य । अव्ययत्वान्न सिः । सुङाभं-रात्रौ । वेलायां । अस्ति । स्यात् । सस्वाभं-यथा । कुतः । तथा । कथं । ससु इति सस् प्रत्ययादारभ्य आ "कथमित्थमुः" ३।४।२६ इत्युकारेण प्रत्याहारः । स्वरादि-स्वस्तिष्ठति । स्वः पश्य । अंतस्तिष्ठति । उपकरोति ।

सदृशं त्रिषु लिंगेषु सर्वासु च विभक्तिषु ।
वचनेषु च सर्वेषु यन्न व्येति तदव्ययं ॥

तसादिग्रहणं किं ? एकः, द्वौ, बहवः । आपो वर्षाः । स्वरादयो गणपाठे द्रष्टव्याः ।

**घ्यसख्यद्वंद्वपतीदुत्[1] ॥ ४० ॥**

इकरांतमुकारांतं च शब्दरूपं घिसंज्ञं भवति सखिशब्दं द्वंद्वावयवं च पतिशब्दं वर्जयित्वा । मुनिना । साधुना । मुनिसुतौ । साधुगुप्तौ । असख्यद्वंद्वपतीति किं ? सख्या । सख्ये । पत्या । पत्ये । अद्वंद्वग्रहणं किं ? पतिसुतौ । पतिसखायौ । पतिसखिशब्दयोरयं प्रतिषेधो न समुदायस्य । तेनेह भवत्येव-अतिसखेरागच्छति । बहुपतेः स्वं ।

**प्रत्ययः कृतोऽषष्ठ्याः[2] ॥ ४१ ॥**

इह यः कृतो विहितः स प्रत्ययसंज्ञो वेदितव्यः, अषष्ठ्याः—षष्ट्यंतार्थः षष्ठी न चेत् स षष्ठ्यंतार्थे विहितो भवति ॥ आगमो विकारो वेत्यर्थः । ङी-राज्ञी । सु औ जस्-वृक्षः। वृक्षौ । वृक्षाः ।

**इजाद्यायात्ताद्धितः[3] ॥ ४२ ॥**

इज्युद्धे ॥ २ । १ । १३५ । इत्यारभ्य "गुपौधूब्विच्छिपन्पणेरायः ॥ ४ । १ । १ । इत्यायप्रत्ययात्प्राग् यत्प्रत्ययसंज्ञं तत्त-

१—नित्यं हस्तेपाणावुपयमने ॥ १ । ४ । ७७ ॥ २—जीवकोपनिषदावौपम्ये ॥ १ । ४ । ७९ । ३—प्राध्वं बंधने ॥ १ । ४ । ७८ ॥ ४—स्वरादिनिपातमव्ययं । १ । १ । ३७ । तद्धितश्चासर्वविभक्तिः । १ । १ । ३८ ॥ कृन्मेजंतः ॥३९॥ क्त्वातोसुन्कसुनः । ४० ॥ अव्ययीभावश्च ॥ ४१ ॥

१—शेषोऽध्यसखि॥ १ । ४ । ७ । पतिः समास एव ॥ १ । ४ । ८ । २—प्रत्ययः । ३ । १ । १ । ताद्धितः ४ । १ । ७६ .

Ac. Gunratnasuri MS Jin Gun Aradhak Trust

द्धितसंज्ञं भवति । केशाकेशि । औपगवः ॥

**घ्याद्यतिङ्कृत्** [१] ॥ ४३ ॥

घ्यणादि प्रत्ययसंज्ञं तिङ्वर्जितं कृत्संज्ञं भवति ॥ घनघात्यः । गोधायो व्रजति । अतिङिति किं ? प्रणिस्ते ।

*** परः** [२] ॥ ४४ ॥

यः प्रत्ययः स प्रकृतेः पर एव भवति । वृक्षः । वृक्षौ । वृक्षाः ।

**मिदचोंऽत्यात्** [३] ॥ ४५ ॥

मकारानुबंधको यस्य विधीयते तस्याचामंत्यात्परो भवति ॥ वंदते । वनानि ।

*** स्पर्धे** [४] ॥ ४६ ॥

द्वयोर्विध्योरन्यत्र सावकाशयोस्तुल्यबलयोरेकत्रोपनिपातः स्पर्धः । तत्र यः सूत्रपाठे परः स विधिर्भवति । उत्वं-को हसति । को धावति । लुक्-एष करोति । स सरति । उभयप्राप्तौ परत्वाल्लुक् । एष हसति । स धावति ।

परः स्यात्पूर्वपरयोर्नित्यं स्यात् परनित्ययोः।
नित्यात्तथांतरंगं स्यात् तथाप्यनवकाशकं ॥

**षष्ठ्याः**[५] **स्थानेंऽतेऽलः** ॥ ४७ ॥

षष्ठ्यंतार्थस्य विधीयमानो विधिस्तस्य योंऽत्योऽल् तस्य स्थाने प्रसंगे भवति इति वेदितव्यं । " नपोऽचो ह्रस्वः " १ । २ । १ । ग्रामणि कुलं । सेनानि कुलं ।

**तस्मादादेः**[६] ॥ ४८ ॥

तस्मात् षष्ठ्याः पंचमीविशिष्टस्य षष्ठ्यंतार्थस्य परस्य विधीयमानो विधिस्तस्यादेरलः स्थाने भवति ॥ द्व्यंतरुपसर्गादीदपोऽनात् ॥ २ । २ । १३८ । द्वीपं । अंतरीपं ।

१–कृदतिङ् । ३ । १ । ९३ । २–परश्च ॥ ३ । १ । २ ॥ ३–मिदचोंऽत्यात्परः । १ । १ । ४७ । ४–विप्रतिषेधे परं कार्यं । १ । ४ । २ । ५—अलोंऽत्यस्य । १ । १ । ५२ । ६—आदेः परस्य । १ । १ । ५४ ।

**शिदङिदल्**[१] ॥ ४९ ॥

शिचाङिदल् चादेशः षष्ठ्यंतार्थस्य तस्यैव स्थाने भवति नादेरंतस्य वाऽलः । शित्—जश्शसः शि ॥ १ । २ । १८ ॥ वनानि । धनानि अङिदल्—सामामः । १ । २ । १७६ । " सर्वेषां । विश्वेषां । ङिदल्पर्युदासः किं ? जरायाः ङसिंद्रस्याचि । १ । २ ।३७। जरसा । जरसे । " झोंऽतः । १ । ४ । ८८ । इति यः स निर्दिश्यमानस्यादेशः ।

**स्थानीवानलाश्रये**[२] ॥ ५० ॥

यस्य स्थाने यो विधीयते सः स्थानी इतर आदेशः स्थानीव भवत्यादेशः, स्थानिकार्यं प्रतिपद्यत इत्यर्थः । अनलाश्रये न चेत्तत्कार्यं स्थान्यलाश्रयं भवति ॥ युवा । राजा । सुलोपेऽपि " न्यक् " १ । २ । १३४ । इति दीर्घः पदत्वादि च । कस्मै । कस्मात् । किंवत् । सर्वादित्वात्स्मायादिः । अनलाश्रय इति किं ? सः । पंथाः । अत्र स्थानिवद्भावाभावात् हलः परत्वलक्षणा सोर्लुग्न भवति ॥ आश्रयग्रहणं किं?प्रदीव्य । प्रसीव्य । वलादेरिडत्रवषुणादेः। ४ । २ । १३४ । इतीड् न भवति ॥

**परेऽचः**[३] **प्राचोऽक्विदीर्घयभ्यासदस्क्लुग्विधौ** ॥ ५१ ॥

अजादेशः परनिमित्तकः, ततः पूर्वविधौ कर्तव्ये स्थानिवद्भवति क्विविधिं दीर्घस्य विधिं यकारस्य विधिं द्वित्वविधिं आ एतस्मादारभ्य " दोमोऽस्यादसोमाद्गुश्चाषिन्यसन् " १ । २ । ४४ । " इत्यसदधिकाराद्यो विधिः " संयोगस्यादिस्कोर्लुक् " १ । २ । ९१ ॥ इति सोर्लुग्वर्जितस्तं च वर्जयित्वा । कथयति ।

१—अनेकाल्शित्सर्वस्य । १ । १ ।५५। २–स्थानिवदादेशोऽनल्विधौ । १ ।१ । ५६।३----अचः परस्मिन्पूर्वविधौ ॥ १ । १ । ५७ ॥ न पदान्तद्विर्वचनवरेयलोपस्वरसवर्णानुस्वारदीर्घजश्चर्विधिषु ॥ १ । १ । ५८ ॥

Ac. Gunratnasuri MS Jin Gun Aradhak Trust

अवधीत्—अत्राल्लुगुपांत्यविधौ कर्तव्ये स्थानिवद्भवति ॥ पदिकः—अत्र पद्भावे । क्विविध्यादिप्रतिषेधः किं ? देवयतेर्द्युः । लवमाचष्टे लौः । पौः । अत्र णिलुगल्लुचौ क्विविधौ ऊचि न स्थानिवद्भवतः । शामं शामं । अशामि । शंशामं शंशामं । अशंशामि । अत्र ण्यंताद्यङ् ण्यंताच्च खमुञिञौ च णिलुगल्लुचौ दीर्घविधौ । सौरी बलाका । ब्राह्मणकंडूतिः । अत्राल्लुक् यविधौ यल्लुचि । दद्ध्यत्र । मद्ध्वत्र । अत्र यञ् धकारस्य द्वित्वविधौ । नयनं । लवनं । वैयाकरणः । सौवश्वः । यानि संति । तानि संति । अभिषंति । विषंति । अपयंति । वियंति । अत्रेङ्यन्अल्लुचोऽयादावसद्विधौ । स्कुलुग्विधिप्रतिषेधः किं ? सुकुसयतेः- सुकूः । काष्ठं तक्षयति काष्ठतक् । अत्र संयोगस्यादिस्कोर्लुगिति लुचि स्थानिवदभावात् 'पदस्य' इति लुक् । काष्ठतडित्यण्यंते अस्कुलुगिति प्रायिकोऽयं निषेधः । तेन मधुश्च्युतमाचक्षाणो मधुगित्यत्र णिलोपस्यास्थानिवत्त्वात् 'ङ्नस्तट्त्सोऽश्च' इति पर्युदाससामर्थ्यात् शकारस्यापि 'संयोगस्यादिस्कोर्लुग्' इति लुक् । षडिक इत्यषडित्यतो जस् ।

**श्लुचीगेनत्**[1] ॥ ५२ ॥ परस्य प्रत्ययस्य श्लुचि संजातायां श्लुग्भूतपरनिमित्तकं पूर्वकार्यमिक् एनदित्येतावदेव भवति ॥ वेवेद्धि । शोशवीति । जरीगृहीति । एनत् पश्य । एनच्छ्रितकः । "स्थानीवानलाश्रये" इति सिद्धे नियमार्थं वचनं । तेनान्यानि न भवंति । तद् गर्गाः ।

*** टिदादिः**[2] ॥ ५३ ॥ टिद्यस्य विधीयते स तस्यादिः प्रथमावयवो भवति । 'ङ्नस्तट्सोऽश्चः' गुडलिँट्त्साये । वलादेरिट्—वदिता । वदितुं ।

*** किदंतः**[3] ॥ ५४ ॥ किद्यस्य विधीयते स तस्यान्तः-अवसानावयवो भवति ॥ 'नशिश जक्' । भवाञ्च्छूरः । 'ह्रस्वस्य तक् पिति कृति'—अग्निचित् । योगविभाग उत्तरार्थः ।

**विशेषणं**[1] ॥ ५५ ॥ विशेषणं विशेष्यस्य समुदायस्य अंतावयवो भवति ॥ 'नपोऽचो ह्रस्वः' कीलालपं, ग्रामणि कुलं । स्वृगमीत्यच् । जयः । स्तवः । तरः ।

**प्राक् पंचमी**[2] ॥ ५६ ॥ पंचम्यंतार्थविशेषणमसमानाधिकरणं विशेष्यात् प्राक्-पूर्वं भवति । 'पदाद्वाक्यस्य वस्नसौ युग्विभक्तेः' । धर्मो वो वर्धतां । धर्मो नो वर्धतां । इह न भवति । युष्माकं धर्मो वर्धतां । अस्माकं धर्मो वर्धतां ।

**न सप्तम्यध्यादिषु**[3] ॥ ५७ ॥ इह सप्तमीनिर्दिष्टं विशेषणं विशेष्यात् पूर्वं न भवति, ध्यणादिविधेरन्यत्र । 'एचोऽच्ययवायाव्' । मुनये । साधवे । अनेन परस्यायादिर्न भवति । अध्यादिष्विति किं ? सरसि वत्स्यामः कलिंगेषु, इह मा भूत् ।

**तस्यादेः**[4] ॥ ५८ ॥ तस्य सप्तम्यर्थस्य विशेषणं तस्यादिरवयवो वेदितव्यः । 'जराया ङसिन्द्रस्याचि' । जरसः । जरसां । इह न भवति । जरासु तप्यतेऽनेन । तस्येत्यनेन सप्तमीत्यस्य स्त्रीत्वं न परामृश्यते ।

**प्रत्ययन्यक्ष्यत्**[5]**प्रकृत्यादेः** ॥ ५९ ॥ ष्यदिति 'गुरूपोत्तमस्यानार्षेऽपत्येऽणिञः ष्यङ्' इत्यारभ्या "यूनस्तित्" इत्यतस्तकारेण प्रत्याहारः । प्रत्ययो न्यगुपसर्जनश्च ष्यद्विशेषणं प्रकृत्यादेः समुदायस्य वेदितव्यं नोनाधिकस्य । प्रत्ययः—मातृभोगीणः । क्षीरपायिणः । " सुङ्

---

१-प्रत्ययलोपे प्रत्ययलक्षणं ॥ १ । १ । ६२ । न लुमतांगस्य ॥६३॥ २-३-आद्यंतौ टकितौ । १ । १ ।४६॥

१-येन विधिस्तदंतस्य ॥ १ । १ । ७२ ॥ २—तस्मादित्युत्तरस्य । १ । १ । ६७ । ३—तस्मिन्निति निर्दिष्टे पूर्वस्य । १ । १ । ६६ । ४--आदेः परस्य । १ । १ । ५५ । ५--अणिञोरनार्षयोर्गुरूपोत्तमयोः ष्यङ् गोत्रे । ४ । १ । ७८ ।

Ac. Gunratnasuri MS  Jin Gun Aradhak Trust

पदं" इति पदसंज्ञा ऊनस्य न भवति। तेन "अभिन्ने" इति णः। राज्ञः पुरुषो राजपुरुषः, 'षष्ठ्ययत्नात्' इति समासः अधिकस्य समुदायस्य न भवति। वृद्धस्य राज्ञः पुरुषः। पुत्रमिच्छति पुत्रकाम्यति। 'सुपः कर्तुः काम्यः' अधिकान्न भवति, महांतं पुत्रमिच्छति। न्यक्ष्यत्। अतिकारीषगंध्यबंधुः। अतिकौमुदगंध्यबंधुः। 'बंधौ ष्यस्येस्' न भवति। अनुपसर्जनस्तु ष्यदधिकस्यापि भवति। परमकारीषगंधी बंधुः। परमकौमुदगंधी बंधुः।

* **कृत्सतिकारकस्यापि**[१] ॥६०॥ कृत्प्रत्ययः सतिसंज्ञकस्यापि सकारकस्यापि सतिकारस्यापि प्रकृत्यादेः समुदायस्य विशेषणं भवति, अपिशब्दात् केवलस्यापि। उदकेविशीर्णे। अवतप्तेनकुलस्थितं। देवदत्तनखनिर्भिन्नं। भस्मनिहुतं। सांकोटिनं। व्यावक्रोशि।

**तिङ्ग वाक्यं**[२] ॥ ६१ ॥ इह साक्षात् पारंपर्य्येण वा तिङंतस्य विशेषणं प्रयुज्यमानमप्रयुज्यमानं वा तेन तिङंतेन प्रयुज्यमानेनाप्रयुज्यमानेन वा सह वाक्यसंज्ञं भवति ॥ धर्मो वो रक्षतु। धर्मो नो रक्षतु। साधुर्वो रक्षतु। साधुर्नो रक्षतु। शालीनां ते ओदनं ददाति। शालीनां मे ओदनं ददाति। कुरू ३ ग्रामं च गच्छ। लुनीही ३ सक्तूँश्च पिब। देवदत्तेन वो दातव्यं। देवदत्तेन नो दातव्यं। साकांक्षत्वेऽपि तिङंतभेदे वाक्यभेदार्थं वचनं। ओदनं पच, तव भविष्यति। मम भविष्यति। पच तव भविष्यति। मम भविष्यति। ओदनं तव भविष्यति। मम भविष्यति। अर्थात् प्रकरणाद्वा गतावप्रयोगः।

**सुङ्**[३]**पदं** ॥ ६२ ॥ सुङिति प्रथमैकवचनादारभ्यामहिङो ङकारेण प्रत्याहारः। सुङंतं शब्दरूपं पदसंज्ञं भवति॥ धर्मः। कर्म। पचतः। अपचन्। ब्रूमहे। वः।

**नं क्ये**[१] ॥ ६३ ॥ नकारांतं शब्दरूपं क्ये प्रत्यये परतः पदसंज्ञं भवति॥ क्य इति क्यच्क्यङ्क्यष्क्यङां विशेषकराननुबंधानुत्सृज्य सामान्येन ग्रहणं। राजीयति। राजायते। चर्मायते। ऊष्मायते। क्य इति किं? सामान्यः। वेमन्यः। सुङित्येव—मन्याः।

**सिद्वल्य**[२]**धातोः** ॥ ६४ ॥ सिति वलादौ च प्रत्यये परे पूर्वं पदसंज्ञं भवत्यधातोः न चेत्स प्रत्ययो धातोर्विहितो भवति॥ सिति—भवदीयः। ऊर्णायुः। वलि—पयोभ्यां। पयःसु। राजता। वाक्त्वं। अधातोरिति किं? यज्वा। वच्मि।

**न**[३] **वृत्त्यंतः** ॥६५॥ परार्थाभिधानं वृत्तिः। तद्वाची शब्दः समुदायः समासादिस्तस्यांतः शब्दः पदसंज्ञो न भवति। परमगिरौ। परमदिवौ श्वलिहौ। गोदुहौ बहुदंडिनौ। अंतग्रहणं किं? राजवाक्।

**स्तं**[४]**मत्वर्थे** ॥ ६६ ॥ सकारांतं तकारांतं च शब्दरूपं मत्वर्थीये परे पदसंज्ञं न भवति॥ यशस्वी। यशस्वान्। विदुष्मान्। मरुत्वान्।

* **मनुर्नभोऽगिरो**[५]**वति**॥६७॥मनुस्, नभस्, अंगिरस् इत्येतानि वति प्रत्यये परे पदसंज्ञानि न भवंति॥मनुरिव मनुष्वत्। नभस्वत्। अंगिरस्वत्।

**विरामेऽगिदनाङ्चाद्यण्वानुनासिकः**[६]॥६८॥ विरतिर्विरामः। विरामे वर्त्तमानस्याणो गिदनाङ्चादिवर्जितस्य तदासन्नोऽनुनासिकादेशो वा भवति॥ साँम, साम। खट्वाँ, खट्वा। दधिं,

१–कृद्ग्रहणे गतिकारकपूर्वस्यापि ग्रहणं। २–एकतिङ् वाक्यं इति वार्तिके। ३—सुप्तिङंतं पदं। १।४।१४॥

१—नः क्ये॥ १।४।१५॥ २—सिति च॥ १।४।१६॥ स्वादिष्वसर्वनामस्थाने॥ १।४।१७॥ ३—उत्तरपदत्वे चापदादिविधौ प्रतिषेधः इति वार्तिकं। ४–तसौ मत्वर्थे॥ १।४।१९। ५—नभोऽगिरोमनसां वत्युपसंख्यानं इति वार्तिकं। ६—अणोऽप्रगृह्यस्यानुनासिकः॥ ८।४।५७।

Ac. Gunratnasuri MS Jin Gun Aradhak Trust

दधि । मधुँ, मधु । विराम इति किं ? दधि करोति । अगिदनाङ्चादीति किं ? मुनी । साधू । किम् । अनाङ्ग्रहणं किं ? पाटलीपुत्रादाँ ।

**चर्जशः**[1] ॥ ६९ ॥ विरामे वर्तमानस्य जशः स्थाने तदासन्नश्चरादेशो वा भवति ॥ त्रिष्टुप्, त्रिष्टुब् । वाक्, वाग् । षट्, षड् । तत्, तद् । विराम इति किं ? वागत्र ।

* **न** ॥ ७० ॥ इत ऊर्ध्वं यद्वक्ष्यते तद्विरामे वर्तमानस्य न भवति इत्यधिकृतं वेदितव्यमापादपरिसमाप्तेः । ते आहुः । भवान् लुनाति ॥

**एचोऽच्ययवायाव्**[2] ॥ ७१ ॥ एचः स्थाने अचि परे अय्, अव् आय्, आव्, इत्येते क्रमेणादेशा भवंति ॥ नयनं । लवनं । रायौ । नावौ ।

**यञेवादिकः** ॥ ७२ ॥ एचः स्थानेऽवर्णात्परो यः इगादिष्टस्तस्य स्थानेऽचि परे यञेवादेशो भवति नान्यः ॥ अगमा३ः अग्निभूता ३ यत्रागच्छ । अगमा३ः पटा ३ वत्रागच्छ । एवकारो दीर्घबाधनार्थः । अन्यथा हि पूर्वेऽपवादा अनंतरान् विधीन् बाधंते नोत्तरानिति स्वस्यैव बाधः स्यात् ।

**अस्वे**[5] ॥ ७३ ॥ इकःस्थानेऽस्वे अचि परतस्तदासन्नो यञादेशो भवति ॥ दीर्घापवादः । दध्यशान । मध्वपनय । पित्रर्थः । लाकृतिः । दध्य्लृतकाय दीयतामित्याह । अस्व इति किं ? दधीदं । मधूष्ट्रः । इको यन्भिर्व्यवधानमित्येके तेषामिक इति पंचमी—दधियत्र मधुवत्र । तिरियङ्, भूवादयः ।

**ह्रस्वो वापदे**[6] ॥ ७४ ॥ इकः स्थानेऽस्वे अचि परे ह्रस्वादेशो वा भवति ॥ यञोऽपवादः । न चेत्ताविगचावेकत्र पदे भवतः । नदि एषा, नद्येषा । दधि अत्र, दध्यत्र । मधु अत्र, मध्वत्र । अति एति, अत्येति । अनु एति, अन्वेति । ह्रस्वस्यापि ह्रस्वः पर्जन्यवल्लक्षणप्रवृत्तेः । अपद इति किं ? नद्यौ । वध्वौ । नद्युदकं । वध्वाननं ।

* **ऋत्यकः**[1] ॥ ७५ ॥ अकः स्थाने ऋति—ऋकारे ऌकारे चाचि परे ह्रस्वो वा भवति ॥ मह ऋषिः, महर्षिः । धूलि ऋतः धूल्यृतः । वधु ऋणं, वध्वृणं । कर्तृ ऋष्यः । कर्तृश्यः । ऌति-कन्य ऌकारः, कन्यल्कारः । तव ऌकारः, तवल्कारः । तकारः किं ? कन्या ॠकारः, कन्यर्कारः ।

**ऋस्तोस्साचः**[2] ॥ ७६ ॥ उः-ऋवर्णस्य ऌवर्णस्य चाकः स्थाने ऋति ऋकारे ऌकारे चाचि परे परेणाचा सहितस्य ॠर् इत्यत्र समुदायो व्यंजनसमुदायो वर्णांतरं वा ईषत्स्पृष्टकरणमादेशो वा भवति । ऋति-पितृर्षभः । पितृऋषभः पितृषभः । ऌति-पितॄल्कारः पितृऌकारः । पितृकारः । ऌवर्णस्य-पितॢल्तक इत्याह । पितॢऋतक इत्याह । पितॄतक इत्याह । ऌति ऌवर्णस्य-पितॢल्तक इत्याह, पितॢऌतक इत्याह । पितॄतक इत्याह । ऋवर्णऌवर्णयोरेकत्वप्रतिज्ञानात् ऌ इत्यादेशे ऋफिडादिदर्शनाल्लत्वं । चकारो वेत्यनुकर्षणार्थः । तेनोत्तरत्र नानुवर्तते । साच इत्यधिकारः पदांतेऽत्येङः इति यावत् ।

**दीर्घः**[3] ॥ ७७ ॥ अकः स्थाने अचि परे परेणाचा सहितस्य तदासन्नो नित्यं दीर्घादेशो भवति ॥ दंडाग्रं । सागता । मुनींद्रः । नदीयं । मधूदकं । वधूदरं । पितॄषभः । पितॄकारः । पितॄतकः । ॡवर्णस्यानुकरणादन्यत्र दीर्घो नास्तीति ॡवर्णस्य ॠकार एव दीर्घः ।

---

१—वावसाने । ८ । ४ । ५६ । २—एचोऽयवायावः । ६ । १ । ७८ ॥ ५—इको यणचि । ६ । १ । ७७ । ६—इको सवर्णे शाकल्यस्य ह्रस्वश्च । । ६ । १ । १२७ ॥

१—ऋत्यकः ॥ ६ । १ । १२८ ।
२—ऋति सवर्णे ऋ वा । ऌति सवर्णे ऌ वा इति वार्तिके । ३—अकः सवर्णे दीर्घः ॥ ६ । १ । १०१ ।

Ac. Gunratnasuri MS Jin Gun Aradhak Trust

**शस्यक्**[१] ॥ ७८ ॥ अकः शस्यचि परे परेणाचा सहितस्य यथासंख्यमक् दीर्घो भवति ॥ ताः । शालाः । बुद्धीः । नदीः । धेनूः । वधूः । मातॄः पश्य ।

**नंतः**[२] **पुंसः** ॥७९॥ अकः पुल्लिंगसंबंधिनि शस्याचि परे परेणाचा सहितस्य यथासंख्यमक् दीर्घो नकारांतादेशो भवति ॥ जिनान् । मुनीन् । साधून् । पितॄन् । सप्रेयसीन् ।

**ढ्लुच्यणः**[३] ॥ ८० ॥ ढकारस्य रेफस्य च लुचि पूर्वस्याणो दीर्घो भवति ॥ लीढं । गूढं । पुना रात्रौ । अग्नी रथेन । पटूराजा । ढ्लुक्सहचर्यादिह न भवति ॥ एष करोति । स ददाति ।

**सहिवहोऽस्यौः**[४] ॥८१॥ सहिवहोरवर्णस्य ढ्लुच्योकारो भवति ॥ सोढा । वोढा । सोढुं । वोढुं । अस्येत्यधिकारः "तथानिणेध्येङ्येङ्" इति यावत् ।

**इक्येङर्**[५] ॥ ८२ ॥ "अस्य साचः" इति वर्तते । अवर्णस्थाने इकि परे परेणाचा सहितस्य यथासंख्यमेङर् इत्येते आदेशा भवंति ॥ देवेंद्रः मालेयं । गंधोदकं । मालोढा । परमर्षिः।महर्षिः। तवल्कारः । सल्कारः ।

**एजूच्यैच्**[६] ॥८३॥ अवर्णस्य स्थाने एच्यूजादेशे च परे साचस्तदासन्न ऐजादेशो भवति ॥ तवैषा । खट्वैषा । तवैंद्री । खट्वैंद्री । तवौदनः । खट्वौदनः । तवौपगवः । खट्वौपगवः । ऊचि—धौतः । धौतवान् ।

**प्रस्योढोढ्यूहैषैष्ये**[७] ॥ ८४ ॥ प्रशब्दस्य यदवर्णं तस्य स्थाने ऊढ,ऊढि, ऊह, एष, ऐष्य इत्येतेषु साच आसन्न एजादेशो भवति ॥ प्रौढः । प्रौढिः । प्रौहः । प्रैषः ।प्रैष्यः।

**स्वैरस्वैर्यक्षौहिण्यां**[१] ॥८५॥ स्वैर् , स्वैरिन्, अक्षौहिणी इत्येतेष्ववर्णस्य साच ऐजादेशो भवति॥ स्वस्य ईरःस्वैरः । स्वयमीरितुं शीलमस्येति स्वैरी । अक्षाणामूहोऽस्यामस्तीति अक्षौहिणी सेना ।

**ओमाङि परः**[२] ॥ ८६ ॥ अवर्णस्य स्थाने ओं शब्दे आङादेशे च परे साचः परो ऽजादेशो भवति ॥ तवोंकारः । कोमित्यवोचत् । आङि-आ ऋश्यात् अर्श्यात्। अद्य अर्श्यात् अद्यर्श्यात् । खट्वा अर्श्यात् खट्वर्श्यात् । आ इहि एहि । उप एहि उपेहि । आ ऊढा—ओढा । अद्य-ओढा अद्योढा । खट्वा ओढा—खट्वोढा ।

* **एवेऽनियोगे**[३] ॥८७॥ अवर्णस्य एवशब्दे साचः परोऽजादेशो भवति न चेत् स एवशब्दो नियोगविषयेऽवधारणे वर्त्तते । नियोगः-इदमेव कर्तव्यमिति । इहेव दृश्यते । अद्येव तिष्ठति । तत्त्वाख्यानमेतत् । अनियोग इति किं ? इहैव भव माध्यगाः । अत्रैव त्वं तिष्ठेति नियुज्यते ।

**वौष्ठौतौ**[४]**समासे** ॥८८॥ अवर्णस्यौष्ठशब्दे ओतुशब्दे च परे साचः परोऽजादेशो भवति वा, तौ चेन्निमित्तनिमित्तिनावेकत्र समासे भवतः । बिंबोष्ठी । बिंबौष्ठी । स्थूलोतुः, स्थूलौतुः ।समास इति किं ? राजपुत्रौष्ठं पश्य । देवदत्तौतुं विजृंभितं पश्य ।

**आर्तृतीयाया ऋते**[५] ॥ ८९ ॥ तृतीयांतसंबंधिनोऽवर्णस्य स्थाने ऋतशब्दे परे साच आरादेशो भवति समासे ॥ सुखार्तः । दुःखार्तः । "ऋत्यारुपसर्गस्य" इति पुनरार्वचनात् ह्रस्वो न

१—प्रथमयोः पूर्वसवर्णः । ६ । १ । १०२ ॥
२—तस्माच्छसो नः पुंसि ॥ ६ । १ । १०३ ।
३—ढ्लोपे पूर्वस्य दीर्घो णः ॥ ६ । ३ १११ ॥
४—सहिवहोरोदवर्णस्य ॥ ६ । ३ । ११२ ।
६—आद्गुणः ॥६।१।८७। ५—वृद्धिरेचि ॥६।१।८८।
७-प्रादूहोढोढ्येषैष्येषु । इति वार्तिकं ॥

१—स्वादीरेरिणोः । अक्षादूहिन्यामुपसंख्यानं । इति वार्तिके । २—ओमाङोश्च ॥६।१।९५। ३—एवे चानियोगे ॥ इति वार्तिकं ॥ ४—ओत्वोष्ठयोः समासे वा ५—ऋते च तृतीया समासे । इति वार्तिके ।

Ac. Gunratnasuri MS Jin Gun Aradhak Trust

बाध्यते । सुख ऋतः । दुःख ऋतः । तृतीयाया ऋत इति किं ? परमर्तः । समास इति किं ? सुखेनर्तः ।

**प्रदशार्णवसनकंबलवत्सतरस्यर्णे**[१] ॥९०॥ प्र, दश, ऋण, वसन, कंबल, वत्सतर इत्येतेषाम-वर्णस्य ऋणशब्दे परे साच आर् भवति समासे ॥ प्रगतं ऋणं-प्रार्णं । दशानां ऋणं दशार्णं । दश ऋणानि यस्याः सा दशार्णा नदी, दशार्णो जन-पदः । ऋणावयवं ऋणं ऋणार्णं । ऋणस्य ऋणं ऋणार्णं । वसनमेव ऋणं वसनार्णं । एवं-कंब-लार्णं । वत्सतरार्णं । ह्रस्वो न बाध्यते इति प्र ऋणमित्यादि भवति ॥

**ऋत्यारुपसर्गस्य**[२]॥९१॥ उपसर्गस्य यदवर्णं तस्य स्थाने ऋकारादौ धातौ परे साच आर् भवति सर्वापवादः । प्रार्च्छति । उपार्च्छति । प्रार्च्छति । उपार्च्छति । पुनरार्ग्रहणं ह्रस्वबाधनार्थं ॥

**सुपि वा** ॥९२॥ उपसर्गस्य यदवर्णं तस्य स्थाने सुपि-सुबंतावयवे ऋकारादौ धातौ परे साच आर् भवति वा ॥ पक्षे यथाप्राप्तं । उपा-र्षभीयति, उपर्षभीयति, उपऋषभीयति । उपा-ल्कारीयति । उपल्कारीयति । उपऌकारीयति ।

**तथानिणेध्येङ्येङ्**[४] ॥ ९३ ॥ उपसर्गस्य यदवर्णं तस्य स्थाने इण् गतौ एधि वृद्धावित्ये-ताभ्यामन्यस्मिन्नेङादौ धातौ परे साच एङादेशो भवति, तथा सुब्धातौ तु वा ॥ प्रेलयति । प्रेषयति । उपोखति । प्रोखति । सुब्धातौ-उपेल-कीयति । उपैलकीयति । उपोदनीयति । उपौद-नीयति । अनिणेधीति किं ? उपैति । प्रैधते ।

**पदांतेऽत्येङः**[५]॥९४॥ पदांते य एङ् तस्या-कारे परे परेणाचा सहितस्य एङादेशो भवति ॥ तेऽत्र । पटोऽत्र । पदांते इति किं ? नयनं । लवनं । तकारः किं ? तयाहुः । पटवास्त्व ।

**गोरोद्वा**[१] ॥९५॥ साच इति निवृत्तं । गोश-ब्दस्य यः पदांत एङ् तस्याकारे परे ओकारो वा भवति ॥ ओरोद्वचनं प्रकृतिभावार्थं । गो अग्रं । गवाग्रं, गोऽग्रं ॥हे चित्रगोऽग्रमित्यत्र गोशब्दस्य लाक्ष-णिकत्वान्न भवति ॥ लक्षणप्रतिपदोक्तयोः प्रति पदोक्तस्यैव ग्रहणं न तु लाक्षणिकस्य ।

**अवोऽच्यनक्षे**[२] ॥९६॥ गोशब्दस्य पदांते वर्तमानस्यैङोऽचि परे अव इत्यादेशो वा भवति न चेत्सोऽच् अक्षशब्दस्थः । गवाग्रं । गो अग्रं । गोऽग्रं । गवेश्वरः । गवीश्वरः। पदांत इति किं ? गवि । अनक्ष इति किं ? गो अक्षं । गोऽक्षं ।

**इन्द्रे**[३] ॥९७॥ गोशब्दस्य पदांते वर्तमानस्यैङ इंद्रशब्दस्थेऽचि परे अव इत्यादेशो भवति॥गवेंद्रः।

**वातायनेऽक्षे**[४] ॥ ९८ ॥ गोशब्दस्य पदांते वर्तमानस्यैङोऽक्षशब्दस्थे ऽचि परे वातायने वाच्ये अव इत्यादेशो भवति॥ गवाक्षः।वातायनमित्यर्थः। अन्यत्र-गोऽक्षं । गोअक्षं।

**न प्लुतस्यानितौ**[५]॥९९॥प्लुतस्यानितावचि परे यत्प्राप्नोति तन्न भवति ॥ देवदत्ता३ अत्रा-न्वासि । जिनदत्ता ३ इदमानय । अनिताविति किं ? सुश्लोका ३ इति सुश्लोकेति ।

**गितः**[६]॥१००॥ गानुबंधस्याचि परे तन्निमित्तं यत्प्राप्नोति तन्न भवति ॥ मुनी इमौ । साधू एतौ। पचेते अत्र । पचावहे अत्र आवां ।

**चादेरचोऽनाङः** [७] ॥ १०१ ॥ चादि-

१–प्रवत्सतरकंबलवसनार्णदशानामृणे इति वार्तिकं । २–उपसर्गादृति धातौ ॥ ६ । १ । ९१ । ३–वा सुप्यापि-शलेः ॥ ६ । १ । ९२ । ४–एङि पररूपं ॥ ६ । १ । ९४ । ५–एङः पदांतादति ॥ ६ । १ । १०९ ॥

१–सर्वत्र विभाषा गोः ॥ ६ । १ । १२२ २–४–अवङ् स्फोटायनस्य ॥ ६ । १ । १२३ ॥ ३–इंद्रे च ॥ ६ । १ । १२४ । ५–प्लुतप्रगृह्या अचि नित्यं ॥ ६ । १ । १२५ । ६–ईदूदेद्द्विवचनं प्रगृह्यं । १ । १ । ११ ॥ ७–चादयोऽसत्त्वे । १ । ४ । ५७ । प्रादयः ॥ १ । ४ । ५८ । निपात एकाजनाङ् ॥ १ । १ । १४ ।

Ac. Gunratnasuri MS Jin Gun Aradhak Trust

रसत्त्ववाची । आङ्वर्जितो योऽच् तस्याचि परे तन्निमित्तं न भवति॥ अ अपेहि । इ इंद्रं पश्य । उ उत्तिष्ठ । आ एवं नु मन्यसे । आ एवं किल तत् । अनाङ् इति किं ? आ ईषदुष्णं ओष्णं । आ इहि एहि । आ उदकांतात् ओदकांतात् प्रियमनुव्रजेत् । आ आर्येभ्यः आर्येभ्योऽस्य यशो गतं ।

ईषदर्थे क्रियायोगे मर्यादाभिविधौ च यः ।
एतमातं ङितं विद्यात् वाक्यस्मरणयोरङित् ॥

**ओतः**[1] ॥१०२॥ चादेरोकारांतस्याचि परे यत्प्राप्नोति तन्न भवति॥ अहो इदं । उताहो एवं । अथो असौ । नो इंद्रियं ।

**सौ वेतौ**[2] ॥ १०३ ॥ सुनिमित्तो य ओकारस्तस्य इतिशब्दे परे यत्प्राप्नोति तन्न भवति वा॥ पटो इति, पटविति । साविति किं ? गवित्याह ।

**ऊँ चोञः**[3] ॥ १०४ ॥ उञित्येतस्य इतिशब्दे परे ऊँ इत्ययं दीर्घो अनुनासिकश्च आदेशो भवति वा । चशब्दात् यदन्यत्प्राप्नोति तच्च वा भवति । एवं त्रैरूप्यं भवति । ऊँ इति । उ इति । विति ।

**मयोऽचि वोऽसन्**[4]॥१०५॥ मयिति प्रत्याहारः । मय उत्तरस्य उञः स्थाने अचि परे वकारो वा भवति । स च असन् अभूतवत् । क्रुङ्ङ्वास्ते । क्रुङ्ङुआस्ते । किम्वुष्णं । किमु उष्णं । तद्वस्य मतं । तदु अस्य मतं । किम्विति । किमूँ इति । किमु इति । किमुविति । "अस्वे" इति यञ् । असत्त्वात् द्वित्वमनुस्वारानुनासिकाभावश्च भवति ॥

**हलोऽनुनासिकेऽनुनासिकः स्वः**[5]॥१०६॥ पदांते वर्तमानस्य हलः स्थानेऽनुनासिके परे स्थानिनः स्वोनुनासिकादेशो भवति वा ॥ वाङ्मधुरा, वाग्मधुरा । षण्नयाः । षड्नयाः।तन्नयनं । तद्नयनं । ककुम्मंडलं । ककुब्मंडलं । हलँमात्रं । हल्मात्रं । त्वङूँ इति।त्वगूँ इति । असन्नित्येव । तेन त्वङूँ इत्यादौ ह्रस्वान्ङमः पदांत इति द्वित्वादिर्न भवति ॥

**प्रत्यये**[1] ॥ १०७ ॥ पदांते वर्तमानस्य हलस्स्थानेऽनुनासिकादौ प्रत्यये परे स्थानिनः स्वोऽनुनासिकादेशो नित्यं भवति । वाङ्मयं । षण्णां । पदांत इति किं ? यज्ञः। स्वप्नः। यत्नः।

**रीस्योः**[2] ॥ १०८ ॥ पदांते वर्तमाने रेफे सकारे च ईकारानुबंधे परे यः पूर्वः तस्य स्थाने स्वोऽनुनासिकादेशो भवति ॥ नॄँः पाति । काँस्कान् । भवाँश्छादयति ।

**म्नां जय्यपदांते**[3] ॥१०९॥ मकारनकाराणामपदांते वर्तमानानां जयि परे तन्निमित्तःस्वोऽनुनासिकादेशो भवति ॥ मस्य—गन्ता । गन्तुं । नस्य-शङ्किता । शङ्कितुं । बहुवचनं नस्य णत्वबाधनार्थं । विस्रम्भः । लंघन्ति । अपदांत इति किं ? भवान्परमः । जयीति किं ? क्रुण्वंति ।

**शल्यनुस्वारः**[4] ॥११०॥ मकारनकाराणामपदांते वर्तमानानां स्थाने शलि परेऽनुस्वारो भवति ॥ मस्य-पुंसि । गंस्यते । नस्य-दंशः । यशांसि ।

**मम्मो हलि तौ**[5] ॥ १११ ॥ पदांत इति वर्तते "मम्" ग्रहणात् । ममागमस्य पदांते वर्तमानस्य च मकारस्य स्थाने हलि परे तौ-निमित्तस्वोऽनुनासिकोऽनुस्वारश्च पर्य्यायेण भवतः॥ चङ्क्रम्यते,चंक्रम्यते।अभ्रँलिहो वायुः, अभ्रंलिहो वायुः । मस्य-त्वं करोषि । त्वङ्करोषि । सय्यँन्ता ।

१—ओत् । १ । १ । १५ ॥ २ । संबुद्धौ शाकल्यस्येतावनार्षे । १ । १ । १६ । ३ । उञः । १ । १ । १७ । ऊँ । १ । १ । १८ । ४—मय उञो वो वा ।८ ।३।३३। ५--यरोऽनुनासिकेऽनुनासिको वा ॥८।४।४५।

१—प्रत्यये भाषायां नित्यं ॥ इति वार्तिकं । २—अत्रानुनासिकः पूर्वस्य तु वा ॥ ८ । ३ । २ ॥ ३—अनुस्वारस्य ययि परसवर्णः ॥ ८ । ४ । ५७ ॥ ४—मोऽनुस्वारः ॥ ८ । ३ । २३ । ५—वा पदांतस्य ॥ ८ । ४ । ५८ ॥

Ac. Gunratnasuri MS Jin Gun Aradhak Trust

संयन्ता । पदांत इति किं ? गम्यते । रम्यते ।

**हि ल्व्यम्नि**[1] ॥ ११२ ॥ पदांते वर्तमानस्य मकारस्य स्थाने ल व य म न इत्येतद्वर्णपरे हकारे परें तेषां स्वोऽनुनासिकोऽनुस्वारश्च पर्य्यायेण भवतः । किल्ँह्लादयते । किंह्लादयते । किव्ँह्वयते । किंह्वयते । कियँह्यः । किंह्यः ॥ किम्ह्मलयति । किंह्मलयति । किन्ह्नुषे । किंह्नुषे ।

**सम्राट्**[2] ॥ ११३ ॥ समित्यस्य राजतौ क्विंते परे अनुस्वाराभावो निपात्यते । सम्राट् । सम्राजौ । पंचमः शांतिः ।

**खय् खयश्शरि वा**[3] ॥११४॥ पदांत इति निवृत्तं । खयः शरि परे खयादेशो वा भवति ॥ तछ्शेते । तच्शेते । वथ्सः । वत्सः । अफ्सराः । अप्सराः ।

**शरोऽनु द्वे**[4] ॥ ११५ ॥ शरः परस्य खयः स्थाने अनु यदन्यत्प्राप्नोति तस्मिन्कृते पश्चाद् द्वे रूपे भवतो वा ॥ कश्च्छादयति, कश्छादयति । त्वंक्खनसि । त्वं खनसि । स्त्थाली, स्थाली । अन्वित्युक्तत्वादसान्निति निवृत्तं । द्वित्वे प्राप्नुवच्चर्त्वादि भवति ॥ पुनः खयः परस्य शरः स्थाने द्वे रूपे भवतो वा ॥ तच्श्शेते । तच्शेते । वत्स्सः, वत्सः ।

**यञो मयः**[5] ॥११६॥ यञः परस्य मयः स्थाने द्वे रूपे भवतो वा ॥ वृक्षव्व्करोति । वृक्षव् करोति । वल्म्मीकं । वल्मीकं । अन्वित्येव- प्रोर्ण्णुनाव । ऊर्ज्जिजयिषति । पुनः मयः परस्य यञः स्थाने द्वे रूपे भवतो वा ॥ दध्य्यत्र, दध्यत्र । मध्व्वत्र, मध्वत्र । त्रप्व्वत्र । त्रप्वत्र ।

**अचो ह्रोऽह्वचः**[6] ॥११७॥ अचः परो यो हकारो रेफश्च ताभ्यां परस्याह्वचः हकाराद्रेफादच- श्चान्यस्य वर्णस्य स्थाने द्वे रूपे भवतो वा । ब्रह्म्मा ब्रह्मा । सर्व्वः । सर्वः । दीर्ग्घः । दीर्घः । अह्वच इति किं ? बर्हं । अर्हं । दर्हः ।

**अदीर्घात्**[1] ॥ ११८ ॥ अदीर्घादचः परस्याह्वचः स्थाने द्वे रूपे भवतो वा ॥ दद्ध्यत्र, दध्यत्र । पत्थ्यदनं । पथ्यदनं । त्वक्क्, त्वक् । त्वग्ग् । त्वग् । गो ३ त्त्रातः । गो ३ त्रातः । आन्वित्यधिकारात् कुत्वादौ कृते द्वित्वं । अदीर्घादेकहलीत्यनुक्त्वा 'न संयोगे' अचि' इति योगद्वयारंभाद्विरामेऽप्ययमादेशः । अह्वच इति किं ? सह्यं । वर्य्यः । तितउः । अदीर्घादिति किं ? सूत्रं । पात्रं । वाक् ।

**न संयोगे**[2] ॥ ११९ ॥ हलोऽनंतरास्संयोगः । संयोगे परेऽह्वचः स्थाने द्वे रूपे न भवतः ॥ इंद्रः । चंद्रः । कृत्स्नं । मृत्स्ना ।

**पुत्रस्यादिन्पुत्रादिन्याक्रोशे**[3] ॥ १२० ॥ पुत्रशब्दस्यादिन्शब्दे पुत्रादिन्शब्दे च परे आक्रोशे विषये द्वे रूपे न भवतः ॥ पुत्रादिनी त्वमसि पापे । पुत्रपुत्रादिनी भव । अन्यत्र-पुत्त्रादिनी शिशुमारी ।

**अचि**[4] ॥ १२१ ॥ अदीर्घात्परस्याह्वचः स्थानेऽचि परे द्वे रूपे न भवतः । दधि । मधु ।

**शरः**[5] ॥ १२२ ॥ शरोऽचि परे द्वे रूपे न भवतः । दर्शनं । वर्षः । तर्षः ।

**ह्रस्वान्ङमः पदांते**[6] ॥ १२३ ॥ ह्रस्वात्परस्य पदांते वर्तमानस्य ङमः स्थाने अचि परे द्वे रूपे भवतः ॥ कुङ्ङास्ते । सुगण्णिह । कृषन्निह ॥ असिद्धं बहिरंगमंतरंगे' इति णो न भवति ॥

---

१–यवलपरे यवला वा इति वार्तिकं । २–मो राजि समः क्वौ ॥ ८ । ३ । २५ ॥ ३–चयः शरि पौष्करसादेः इति ४—शरः खय् इति वार्तिकं ५—यणो मयो द्वे वाच्यः । इति वार्तिकं । ६—अचो रहाभ्यां द्वे ।८।४।४६॥

१–अनचि च ॥ ८ । ४ । ४७ ॥ २—त्रिप्रभृतिषु शाकटायनस्य ॥ ८ । ४ । ५० ॥ ३—नादिन्याक्रोशे पुत्रस्य ॥ ८ । ४ ।४८। (तत्परे च) ४—अनचि चेत्याचि निषेधः ५—शरोऽचि ॥ ८ । ४ । ४९ । ६—ङमो ह्रस्वादचि ङमुण्नित्यं ॥ ८ । ३ । ३२ ॥

Ac. Gunratnasuri MS Jin Gun Aradhak Trust

**दीर्घाच्छो[१]वा** ॥ १२४ ॥ पदांते वर्तमानात् दीर्घात्परस्य छकारस्य द्वे रूपे भवतो वा ॥ कन्याच्छत्रं । कन्याछत्रं ।

**प्लुतात्[२]** ॥ १२५ ॥ पदांते वर्तमानात् दीर्घस्थानिकात्प्लुतात्परस्य छकारस्य द्वे रूपे भवतो वा ॥ आगच्छ इंद्रभूते३ च्छत्रमानय । आगच्छ इंद्रभूते ३ छत्रमानय ॥ अदीर्घादिति किं ? आगच्छ भो देवदत्त३च्छत्रमानय ।

**अजाङ्माङः[३]** ॥ १२६ ॥ अचः आङो माङश्चाव्ययादुत्तरस्य छकारस्य द्वे रूपे भवतः । इच्छति । म्लेच्छति । आच्छिनत्ति । माच्छिदत् । आन्वित्येव-प्रश्नः । प्रष्टा ।

**डाज्भाजोऽतो लुगितौ[४]** ॥ १२७ ॥ डाज्भाजः अनेकाचोऽव्यक्तानुकरणस्य यः अत्-शब्दस्तस्य इतिशब्दे लुग्–लोपो भवति ॥ छमत् इति छमिति । पटिति । 'अत' इति वचनात्सर्वलुग् । 'असिद्धं बहिरंगमंतरंगे' इति लुचि जश्त्वं न भवति ॥ चकदिति तडितापि कृतं ॥ इति दकारांतं द्रष्टव्यं ॥ डाज्भाज इति किं ? छत् इति छदिति । जगत् इति जगदिति ॥

**न द्व्युक्तेः[५]** ॥ १२८ ॥ द्वे उक्ती यस्य तस्य डाज्माजे यो अत्शब्दस्तस्य इतौ परे लुग्न भवति ॥ पटत् पटदिति वीप्सायां द्व्युक्तिः । पटत्पटिति । समुदायानुकरणं ।

**तः** ॥ १२९ ॥ द्व्युक्तेर्डाज्भाजोऽतो यस्तकारस्तस्य इतौ परे लुग् भवति ॥ पटत्पटेति करोति । घटत्घटेति करोति ॥

**डाच्यादौ[१]** ॥ १३० ॥ द्व्युक्तेरादौ पूर्वस्यामुक्तावतो यस्तकारस्तस्य डाचि परे नित्यं लुग् भवति ॥ पटपटाकरोति । दमदमाकरोति ॥

**ढ्रो ढ्रि[२]** ॥ १३१ ॥ ढकारस्य रेफस्य च यथासंख्यं ढकारे रेफे च परे लुग् भवति ॥ लीढं । गूढं । अग्नीरथेन । अन्ता रौति ॥

**हलो[३] यमि यमो वा** ॥ १३२ ॥ हलः परस्य यमो यथासंख्यं यमि परे लुग् भवति वा ॥ आदित्यः, आदित्य्यः । केषांचित् 'यमां' इति पाठः । तेषां वचनभेदाद्यथासंख्यं नास्तीति उदाहरणमिदं-बम्यते, बभ्र्यते ।

**जरि जरः स्वे वा[४]** ॥ १३३ ॥ हलः परस्य जरः स्वे जरि परे लुग्भवति वा॥भिन्तः । भिन्त्तः । भिन्तां । भिन्त्तां । स्व इति किं?तर्प्ता।

**उदस्स्थास्तंभः[५]** ॥ १३४ ॥ उदः परस्य स्थास्तंभोर्धात्वोरवयवस्य जरो जरि परे नित्यं लुग् भवति ॥ उत्थाता । उत्थातुं । उत्तंभिता । उत्तंभितुं । उत्त्थाता । उत्त्तंभितेति त्रिसंयोगः । 'अदीर्घात्' इति द्वित्वेन भवति ॥ स्कंधेरुत्कंधकरोगः इति पृषोदरादिषु द्रष्टव्यः ।

**चर्[६]** ॥ १३५ ॥ जरः स्थाने जरि परे नित्यं चरादेशो भवति । देवच्छत्रं । गुडलिट् तरति । नत्स्यते । लप्स्यते । ''जषि जश्'' इति वचनात् खरि चर्त्वं ॥

**जषि जश्[७]** ॥१३६॥ जरः स्थाने जषि परे जश् भवति ॥ चरोऽपवादः । लब्धा । लब्धुं । दोग्धा । बोद्धा । षड्भिः । विद्युद्भद्रा ।

---

१—२—पदांताद्वा । दीर्घात् ॥ ६ । १ । ७५ ॥ छे च । ६ । १ । ७३ । ३--आङ्माङोश्च ॥ ६ । १ । ७४ ॥ ४—अव्यक्तानुकरणस्यात इतौ ॥ ६ । १ । ९८ । ५—६—नाम्रेडितस्यांत्यस्य तु वा ॥ ६ । १ । ९९ । डाचि बहुलं द्वे भवत इति वार्तिकं ।

१--नित्यमाम्रेडिते डाचीति वक्तव्यं' वार्तिकं । २--ढ्रलोपे पूर्वस्य दीर्घोऽणः । [illegible] ३ । १११ ॥ ३---हलो यमां यमि लोपः ॥ [illegible] ४ । ६४ । ४--झरो झरि सवर्णे । ८ । ४ । ६५ ५--उदः स्थास्तंभोः पूर्वस्य ८ । ४ । ६१ । ६–खरि च ८ । ४ । ५५ । ७–झलां जश् झशि । ८ । ४ । ५३

Ac. Gunratnasuri MS Jin Gun Aradhak Trust

**श्चौ श्चू स्त्वोः**[1] ॥१३७॥ सकारस्य शकारे चवर्गे चोपश्लिष्टस्य स्थाने शकारादेशो भवति तथा तवर्गस्य चवर्गः । आपश्शोभंते । तपश्चरति । यशश्छत्रं । श्च्योतति । भृज्जते । तवर्गस्य-तच्छेते । तच्शेते । भवाञ्शेते । तच्चरति । तच्छादयति । तज्जयति । तज्झाषयति । भवाञ्ञकारेण । राज्ञः । यज्ञः । समेवचने यथासंख्यं शैलीयमाचार्यस्य । "न शात्" "टोः पदांते" इति निषेधात्परे 'तोः षि' इति निषेधात्पूर्वे च श्चुत्वष्टुत्वे ।

**ष्टौ ष्टू**[2] ॥१३८॥ सकारस्य षकारे टवर्गे चोपश्लिष्टस्य षकारो भवति तवर्गस्य टवर्गः ॥ कष्षंडे । कष्टीकते । कष्ठकारेण । तवर्गस्य-पेष्टा । पेष्टुं । तट्टीकते । तट्ठकारेण । तड्डीनं । तड्ढौकते । तण्णकारेण । भवाण्डीनः । अट्टते । अड्डुति ।

**न शात्**[3] ॥१३९॥ शकारात्परस्य श्चुत्वं न भवति ॥ अश्नाति । क्लिश्नाति ।

**टोः पदांतेऽनांनगरीनवतेः**[4] ॥ १४० ॥ पदांते वर्तमानाट्टवर्गादुत्तरस्य ष्टुत्वं न भवति नाम्नगरीनवतिशब्दान् वर्जयित्वा ॥ मधुलिट् सीदति । षट्तयं । षण्नयाः । अनाम्नगरीनवतेरिति किं ? षण्णां । षण्णगरी । षण्णवतिः । पदांत इति किं ? ईट्टे । "पदांते" इत्यधिकार आपादपरिसमाप्तेः ।

**तोः षि**[5] ॥ १४१ ॥ तवर्गस्य पदांते वर्तमानस्य षकारे परे ष्टुत्वं न भवति ॥ अग्निचित् षडिकः । महान् षण्ढः ।

**लि लः** ॥ १४२ ॥ पदांते वर्तमानस्य तवर्गस्य स्थाने लकारे परे लकारादेशो भवति ॥ तल्लुनाति । भवाँल्लिखति ॥

१--स्तोः श्चुना श्चुः । ८ । ४ । ४० ॥ २--ष्टुना ष्टुः ॥ ८ । ४-४१ । ३--शात् । ८ । ४ । ४४ । ४--न पदांताट्टो-रनां । ८ । ४ । ४२ । (अनाम्नवतिनगरीणामिति वाच्यं) ५--तोः षि ॥ ८ । ४ । ४३ ॥ ६--तोर्लि । ५ । ४ । ६० ॥

**जशो हो झभ्वा**[1] ॥ १४३ ॥ पदांते वर्तमानाज्जशः परस्य हकारस्य स्थाने यथासंख्यं झषादेशो भवति वा ॥ अज्झलौ, अज्हलौ । त्रिष्टुब्भुतं, त्रिष्टुब्हुतं, वाग्घसति, वाग्हसति । षड्ढलानि, षड् हलानि । तद्धितं, तद्हितम् ।

**शश्छोऽमि**[2] ॥१४४॥ पदांते वर्तमानाज्जश उत्तरस्य शकारस्यामि परे छकारो भवति वा ॥ तच्छोभते । तच्शोभते ।

**ङ्णो गकुडक् शरि**[3] ॥ १४५ ॥ पदांते वर्तमानयोर्ङकारणकारयोश्शरि परे यथासंख्यं गकुडक् इत्येतावागमौ भवतो वा ॥ क्रुङ्क्छेते, क्रुङ्क्शेते । सुगण्ट्छेते, सुगण्ट्शेते ॥

**ड्नस्तड् सोऽश्चः**[4] ॥१४६॥ पदांते वर्तमानाड्डकारान्नकाराच्च परस्य सकारस्य तडागमो वा भवति । अश्चः-श्चसंयोगस्यावयवश्चेत्सकारो न भवति ॥ मधुलिट्त्सीदति, मधुलिट्सीदति । भवान्त्संसदि, भवान्संसदि । अश्च इति किं ? षट्श्च्योतति । भवान्श्चोतति ॥

**नश्शि जक्**[5] ॥१४७॥ पदांते वर्तमानस्य नकारस्य शकारे परे जगागमो वा भवति । अश्चः-श्चसंयोगस्य तु शकारे न भवति ॥ भवाञ्छेते । भवाञ्च्शेते । भवाञ्शेते । कुर्वञ्च्छेते, कुर्वञ्च्शेते, कुर्वञ्शेते ।

**नॄनः पि रीरक्**[6] ॥ १४८ ॥ नॄनित्येतस्य नकारस्य पदांते पदांतस्थस्य पकारे परे 'री' इतीकारानुबंध आदेशो रक्चागमः पर्यायेण भवतो वा ॥ नॄँ ≍ पाहि । नॄं ≍ पाहि, नॄन्पाहि ।

**कांस्कान् सीसक्**[7] ॥१४९॥ कानित्येतस्य शसंतस्य द्विर्वचने कृते पूर्वस्य 'सी' इतीकारानु-

१--झयो होऽन्यतरस्यां ॥८। ४ । ६२ । २--शश्छोऽटि । ८ ।४। ६३ । (छत्वममीति वाच्यं) ३--ङ्णोः कुक् टुक् शरि ।८। ३ । २८ । ४--डसि धुट् ॥ ८ । ३ । २९ ॥ नश्च । ८ । ३ । ३० ॥ ५--शि तुक् ॥ ८ । ३ । ३१ । ६--नॄन्पे ॥ ८ । ३ । १० । ७--कानाम्रेडिते ॥ ८ । ३ । १२ ।

Ac. Gunratnasuri MS     Jin Gun Aradhak Trust

बंध आदेशः सक्चागमः पर्यायेण निपात्यते ॥ काँस्कान्, कांस्कान् ॥ रीस्योरीकारौ "रीस्योः" इति विशेषणार्थौ ।

**छव्यम्यप्रशानः**[१] ॥१५०॥ प्रशान्वर्जितस्य यो नकारस्तस्य पदांतस्याम्परे छवि परतः सीरादेशः सक्चागमः पर्य्यायेण भवतः ॥ भवाँश्छादयति, भवांश्छादयति । भवाँस्तरति । भवांस्तरति । छवीति किं ? भवान्फलति । अमीति किं ? भवान्त्सरुकः । अप्रशान इति किं ? प्रशाञ्चरति ।

**पुमः खयि**[२] ॥१५१॥ पुमित्येतस्य पदांतस्याम्परे खयि परतः सीसकौ भवतः । पुँस्खातं । पुंस्खातं । पुँस्कोकिलः । पुंस्कोकिलः । पुँश्चली । पुंश्चली ।

**समस्स्कृसि ग्लुक् च**[३] ॥ १५२ ॥ स्कृसि ससुट्कस्य कृञोऽवयवे सकारे परे समित्येतस्य सीसकौ ग्लुक् च भवति ॥ सँस्स्कर्ता । संस्स्कर्ता । संस्कर्ता । सँस्स्कर्तुं । संस्स्कर्तुं । संस्कर्तुं । गित्वमुत्तरार्थं ।

**व्योऽष्याघोभोभगोः**[४] ॥ १५३ ॥ अवर्णान्तादघोभो/भग इत्येतेभ्यश्च परस्य पदांतस्य वकारस्य यकारस्य चाषि परे ग्लुग् भवति॥वृक्ष हसति। वृक्षवृश्चमाचक्षाणो वृक्षव् । देवा यांति । अघो- हसति । भो ददाति । भगो देहि । पदांत इति किं ? गव्यं । भव्यं । जय्यं । भो व्योम ।

**अच्यस्पष्टश्च**[५] ॥१५४॥ अवर्णादघोभोभगोभ्यश्च परयोः पदांतयोः व्योरचि परे ग्लुगस्पष्टः अव्यक्तश्रुतिश्चासन्नो भवति ॥ पटउ, पटवुँ । त उ । तयुँ । तस्मै उ । तस्मायुँ । अघो उ । अघोयुँ । अघो अत्र, अघोयॅत्र । भो अत्र, भोयॅत्र । भगो अत्र । भगोयॅत्र । ग्लुचि 'गितः' इति संधिप्रतिषेधः ।

**वाऽनुञ्यात्**[१] ॥ १५५ ॥ अवर्णात्परस्य पदांते व्यः उञ्वर्जितेऽचि परे ग्लुगस्पष्टश्चादेशौ वा भवतः ॥ पक्षे-तादवस्थ्यं । पट इह, पटविँह । देवा आसते । देवायॅसते । देवायासते । पदांत इति किं ? नयनं । लवनं ।

**रेर्यः**[२] ॥१५६॥ अवर्णादघोभोभगो इत्येतेभ्यश्च परस्य रेरिकारानुबंधस्य स्थानेऽषि परे यकारो भवति ॥ क आसते । कयासते । देवा हसंति । देवायासते । अघोयत्र । अघो हसति । भोयत्र । भो हसति । भगोयास्ते । भगो दयते । रेरिति किं ? अन्तर्धयते ।

**अतोऽद्धष्युः**[३] ॥ १५७ ॥ अकारात्परस्य रेस्थाने अकारे हषि च परे उकारादेशो भवति ॥ यत्वापवादः । श्रम(व)णो सि । धर्मो जयति । तकारः किं ? देवायत्र । सुस्रोता ३ अन्वसि । सुस्रोता ३ देहि । सर्वज्ञ आस्ते । रेरिति किं ? अंतरस्मि । मातरस्मि ।

**हल्यनञ्समासे लुक्तस्सात्**[४] ॥ १५८ ॥ तकारस्थानिकात्सकारात्परस्य रेर्हलि परे लुग् भवति । न चेत् सकारो नञ्समासे भवति ॥ एष करोति । स ददाति । परमैष करोति । परमस ददाति । हलीति किं ? एषोऽस्मि।सोऽस्मि । अनञ्समास इति किं ? अनेषो गच्छति । असो गच्छति ।

**तदः पादपूरणे**[५] ॥१५९॥ तदादेःसात्सकारादुत्तरस्य रेराचि परेऽनञ्समासे लुग् भवति पादपूरणे विषये लोपे चेत्पादः पूर्यते । सैष दाशरथी

१--नश्छव्यप्रशान् ॥ ८ । ३ । ७॥ २--पुमः खय्यंपरे । ८ । ३ । ६ ॥ ३--समः सुटि ॥ ८ । ३ । ५ ॥ ( समो वा लोपमेके इति भाष्यं) ४--हलि सर्वेषां । ८ । ३ । २२ । ५--व्योर्लघुप्रयत्नतरः शाकटायनस्य । ८ । ३ । १८ । लोपः शाकल्यस्य । १९ ।

१—उञि च पदे । ८ । ३ । २१ । इति २--भोभगोअघोअपूर्वस्य योऽशि । ८ । ३ । १७ । ३--अतो रोरप्लुतादप्लुते । ६ । १ । ११३ । हशि च । । ११४ । ४--एतत्तदोः सुलोपोऽकोरनञ्समासे हलि । ५—सोऽचि लोपे चेत्पादपूरणं ।

Ac. Gunratnasuri MS Jin Gun Aradhak Trust

रामः । सैष राजा युधिष्ठिरः । पादपूरण इति किं ? स एष भरतो राजा यो न्याये पथि वर्तते।

**रोऽह्नोऽप्यसुब्रूरूपरात्रिरथंतरे**[१] ॥ १६० ॥ अहन्नित्यस्य रेरषि परे रेफादेशो भवति न सुब्रूरूपरात्रिरथंतरेषु। अहरेति । अहर्ददाति । असुब्रूरूपरात्रिरथंतर इति किं ? अहोभ्यां । अहोभिः । दीर्घाहोऽयं । अहोरात्रिर्गता । अहोरथंतरं ।

**विसर्जनीयस्य**[२] ॥ १६१ ॥ विसर्जनीयस्याषि परे रेफो भवति ॥ मुनिरस्मि । साधुरस्मि । रज्जूर्ह्रयते । पतिर्दयते । विसर्जनीयस्येत्यधिकार आपादपरिसमाप्तेः ।

**वाऽहर्पत्यादिषु**[३] ॥१६२॥ अहर्पतीत्येवमादिषु शब्देषु विसर्जनीयस्य स्थाने रेफो वा भवति ॥ अहर्पतिः । अह ≍ पतिः । गीर्पतिः । गी ≍ पतिः । धूर्प्पतिः । धू≍ पतिः । प्रचेता राजन् । प्रचेतो राजन् । वा रेफादत्र रेरुत्वबाधनाय पक्षे विसर्जनीयः ।

**सश्छव्यशरि**[४] ॥ १६३ ॥ विसर्जनीयस्य स्थानेऽशर्प्परे छवि परतः सकारो भवति ॥ कश्छादयति । कस्तरति । अन्तस्तुदति । मातष्टकारेण । अशरीति किं ? असेः त्सरुकः ।

**शरि वा**[५] ॥१६४॥ विसर्जनीयस्याशर्प्परे शरि परे सकारो वा भवति ॥ कश्शोभते । कः शोभते । मातष्षंडे । मातःषंडे । अन्तास्सिक्तं । अन्तः सिक्तं ।

**लुक् खयि परे**[६] ॥१६५॥ विसर्जनीयस्य खयि परे शरि परतो लुग् वा भवति ॥ अंतस्खलति । अतः स्खलति । अंतस्स्खलति । चक्षुस्पंदते । चक्षुः स्पंदते । चक्षुस्स्पंदते ।

**कुपौ ≍ क ≍ पं**[१] ॥१६६॥ विसर्जनीयस्य कवर्गीये पवर्गीये चाशर्प्परे खयि परे ≍ क ≍ प इति जिह्वामूलीयोपध्मानीयौ यथासंख्यमादेशौ वा भवतः ॥ क ≍ करोति । कः ≍ करोति । क ≍ खनति । कः खनति । अन्त ≍ पचति । अन्तः पचति । अन्त ≍ फलति । अन्तः फलति । अशर्प्परे इति किं ? वासः क्षौमं । अद्भिःप्सातं । खयीति किं ? अंतर्गच्छति । अंतर्भाषते ।

**तिरसस्तेस्सिः**[२] ॥ १६७ ॥ तिसंज्ञकस्य तिरश्शब्दस्य संबंधिनो विसर्जनीयस्य स्थाने कवर्गीये पर्वगीये चाशर्प्परे खयि परे सिरिकारानुबंध आदेशो वा भवति ॥ तिरस्कृत्य । तिरः कृत्य । तिरस्करोति । तिरः करोति । तेरिति किं ? तिरः कृत्वा ।

**नमस्पुरसः**[३] ॥१६८॥ नमस्पुरस् इत्येतयोस्तिसंज्ञयोस्संबंधिनो विसर्जनीयस्य कुपावशर्प्परे खयि परे नित्यं सिर् भवति ॥ नमस्कृत्य । नमस्करोति । पुरस्कृत्य । पुरस्करोति । तेरिति किं ? नमःकृत्वा । पुरःकृत्वा । योगविभागो नित्यार्थः ॥

**चतुर्निर्दुर्बहिराविः≍प्रादुसां**[४] ॥ १६९ ॥ चतुर्, निर्, दुर्, बहिस् प्रादुस्, इत्येतेषां विसर्जनीयस्य कुपावशर्प्परे खयि परे सिर् भवति ॥ चतुष्कंटकं । चतुष्पात्रं । निष्करोति । निष्पचति । दुष्करोति । दुष्पचति । बहिष्करोति । बहिष्पचति । आविष्करोति । आविष्पचति ।

---

१--रो5सुपि।८।२।६९। "अह्नो रूपरात्रिरथंतरषूपसंख्यानं"। २—नहि पाणिनीये विसर्गस्थाने रेफोतस्सूत्राभावः३—अ इरादीनां पत्यादिषु वा ।४—विसर्जनीयस्य सः । ८ ।३।३। ४ शर्परे विसर्जनीयः । ८ । ३ । ३५ । ५—वा शरि । ८ । ३ ।६३ । ६—खर्परे शरि वा लोपो वक्तव्यः ।

१—कुप्वो ≍ क≍पौ च । ८ । ३ । ३७ । २—तिरसोऽन्यतरस्यां । ८ । ३ । ४२ । ३—नमस्पुरसोर्गत्योः । ८ । ३ । ४ । ४—इदुदुपधस्य चाप्रत्ययस्य । ८ । ३ । ४१ ।

Ac. Gunratnasuri MS Jin Gun Aradhak Trust

प्रादुष्करोति। प्रादुष्पचति। निष्कुलः। दुष्पुरुषः।

**सुचो वा**[1] ॥१७०॥ सुच्प्रत्ययांतस्य संबंधिनो विसर्जनीयस्य कुपावशर्प्परे खयि परे सिर् वा भवति ॥ द्विष्करोति। द्विᳵ करोति। त्रिष्खनति। त्रिᳵ खनति। चतुष्पचति। चतुᳶ पचति॥

**इसुसोऽपेक्षायां**[2] ॥१७१॥ इसुस्प्रत्ययांतस्य संबंधिनो विसर्जनीयस्य कुपावशर्प्परे खयि परे सिर् वा भवति ॥ स्थानिनिमित्ते पदे चेत्परस्परापेक्षायां भवतः। सर्पिष्करोति, सर्पिᳵ करोति। सर्पिष्पिबति। सर्पिᳶ पिबति ॥ धनुष्खंडयति, धनुᳵ खंडयति। धनुष्फलति, धनुᳶ फलति। परमसर्पिष्करोति, परमसर्पिᳵ करोति। परमधनुष्करोति, परमधनुᳵ करोति। परमधनुष्खंडयति। परमधनुᳵ खंडयति। इसा साहचर्यादुसोऽत्रातिङो ग्रहणादिह न भवति ॥ चक्रुᳵ कुलानि। भिन्द्युᳶ पापानि। अपेक्षायामिति किं ? तिष्ठतु सर्पिः पिब त्वमुदकं। तिष्ठतु धनुः खंडय काष्ठं।

**नाक्रियैकार्थे** ॥१७२॥ इसुसप्रत्ययांतस्य विसर्जनीयस्य स्थाने कुपावशर्प्परे खयि परे क्रियापदवर्जितसमानाधिकरणपदस्थे परे स्थानिनिमित्तपदयोरपेक्षायां सिर्न्न भवति ॥ सर्पिः कारकं। यजुः पीतकं। क्रियाप्रतिषेधः किं ? सर्पिष्क्रियते। सर्पिः क्रियते। एकार्थ इति किं ! सर्पिष्कुंभे। सर्पिः कुंभे।

**समासेऽसमस्तस्य**[4] ॥१७३॥ पूर्वेणासमस्तस्य इसुसप्रत्ययांतस्य संबंधिनो विसर्जनीयस्य स्थाने कुपावशर्प्परे खयि परे सिर् भवति ते चेत्स्थानिनिमित्तपदे एकत्र समासे भवतः ॥ सर्पिष्कुडं। सर्पिष्पानं। धनुष्खंडं। धनुष्फलं। समास इति किं ? तिष्ठतु सर्पिः पिब त्वमुदकं। असमस्तस्येति किं ? परमसर्पिᳵ कुंडं। इंद्रधनुᳵ खंडं।

**पदेऽधश्शिरसः**[1] ॥१७४॥ पूर्वेणाकृतसमासयोरधस्शिरस् इत्येतयोर्विसर्जनीयस्य पदशब्दे परे समासे सिर् भवति ॥ अधस्पदं। शिरस्पदं। समास इति किं ? अधᳶ पदं। शिरᳶ पदं। असमस्तस्येति किं। परमशिरᳶ पदं।

[2]**कृकमिकंसकुशाकर्णीकुंभपात्रेऽतोऽनव्ययस्य** ॥ १७५ ॥ अनव्ययस्य पूर्वेणासमस्तस्य संबंधिनोऽकारात्परस्य विसर्जनीयस्य स्थाने डुकृञ्, कमूङ्, कंस, कुशा, कर्णी, कुंभ, पात्र इत्येतेषु परतः समासे सिर् भवति ॥ अयस्कृत्। अयस्कारः। यशस्कारः। यशस्कामः। पयस्कामः। अयस्कंसः। अयस्कुशा। अयस्कर्णी। पयस्कुंभः। पयस्पात्रं। पयस्पात्री। प्रातिपदिकग्रहणे लिंगविशिष्टस्यापि ग्रहणं भवति ॥ अनव्ययस्येति किं। स्वः कारः। समास इति किं ? अयः करोति। असमस्तस्येति किं। परमयशᳵ कामः। "शीलिकामीति" णविधौ कामिग्रहणादत्राण्यतंग्रहणं। तेन स्त्रियां—पयस्कामीति भवति ॥

**प्रत्यये**[3] ॥१७६॥ अनव्ययस्य संबंधिनो विसर्जनीयस्य कुपावशर्प्परे खयि प्रत्ययस्थे परे सिर्भवति ॥ काम्यकल्पकपाशाः प्रत्ययास्तान् कवयः प्रयोजयंति ॥ यशस्काम्यति। गीष्कल्पं। यशस्कल्पं। यशस्कं। सुधूष्पाशा।

**न रह्नः काम्ये**[4] ॥१७७॥ रेफान्तस्याल्नश्च विसर्जनीयस्य काम्यप्रत्यये सिर् न भवति ॥ धूः काम्यति। अहः काम्यति।

१–द्विस्त्रिश्चतुरिति कृत्वोऽर्थे। ८। ३। ४३।
२–इसुसोः सामर्थ्ये। ८। ३। ४४।
४–नित्यं समासेऽनुत्तरपदस्थस्य॥ ८। ३। ४५।

१–अधःशिरसी पदे ॥ ८। ३। ४७। २–अतः कृकमिकंसकुंभपात्रकुशाकर्णीष्वनव्ययस्य ॥ ८। ३। ४६।
३–सोऽपदादौ ॥ ८। ३। ३८। ४।(काम्ये. रोरेवेति वाच्यं)

Ac. Gunratnasuri MS Jin Gun Aradhak Trust

**ह्रस्वात्सुपस्तिर्**[1] ॥ १७८ ॥ ह्रस्वात्परस्य विसर्जनीयस्य सुबंताद्विहिते तकारादौ प्रत्यये परे सिर् भवति ॥ तरतमतस्तयत्वतल्त्या: प्रत्ययास्तान् कवयः प्रयोजयंति । सर्पिष्टरं । सर्पिष्टमं । सर्पिष्ट:।चतुष्टयं । चतुष्ट्वं । चतुष्टा ।निष्ट्यः।

**निसोऽनासेवायां तपे**[2] ॥ १७९ ॥ निस: संबंधिनो विसर्जनीयस्य तकारादौ तपतौ परतः सिर् भवति अनासेवायामर्थे ॥ आसेवा पुन: पुन: करणं । निष्टपति स्वर्णं । निष्टप्ताः अरातयः । अनासेवायामिति किं? निस्तपति स्वर्णं स्वर्णकारः । तीति किं? निरतपत् । शब्रनिर्देशादिह न भवति, निस्तातप्तिः ।

स्तिपा शपानुबंधेन निर्दिष्टं यद्द गणेन च ।
यत्रैकाज्ग्रहणं किंचित् पंचैतानि न यङ्लुचि ॥

**कस्कादिषु**[1] ॥१८०॥ कस्क इत्येवंप्रकारेषु शब्देषु विसर्जनीयस्य स्थाने कुपावशर्प्परे स्वयि परे सिरादेशो भवति ॥ कस्क: । कौतस्कुतः । सर्पिष्कुंडिका । सर्पिष्कुंडिकादीनामिह गणपाठः। तेन—परमसर्पिष्कुंडिकेत्यादि सिद्धं । बहुवचनादाकृतिगणोऽयं । तेन-भास्कर इत्यादि सिद्धं ।

इति शब्दानुशासने चिंतामणौ शाकटायनलघुवृत्तौ
प्रथमस्याध्यायस्य प्रथमः पादः ।

## द्वितीय: पाद: ।

**नपोऽचो ह्रस्वः**[3] ॥ १ ॥ इयमयामिदमीति शब्दव्यवस्थाहेतुरुपदेशगम्य: प्रातिपदिकार्थधर्मो लिंगं स्त्रीपुंनपुंसकत्वानि । नप:-नपुंसकत्वाभिधायिनोऽजंतस्य शब्दरूपस्य ह्रस्वादेशो भवति ॥ क्षीरपं । ग्रामणि । नतभ्रु । अतिह्रि । अतिरि । अतिद्यु । अतिनु । कुलं । नप इति किं? क्षीरपा:, ग्रामणीः स्त्री पुमान् वा ।

**पंचतोऽनेकतरस्यान्यादेर्दक् स्वमोः**[4]॥२॥ नपुंसकत्वाभिधायिनां सर्वाद्यंतर्वर्त्तिनां पंचानामन्यादीनां तत्संबंधिनोः सु अमित्येतयोः परतः दगागमो भवत्येकतरशब्दं वर्जयित्वा । अन्यत्तिष्ठति । अन्यत् पश्य । हे अन्यत् । अन्यतरत् । इतरत् । कतरत् । कतमत् । अनेकतरस्येति किं? एकतरं तिष्ठति । एकतरं पश्य । नप इति किं? अन्यः पुरुषः । अन्या स्त्री । तत्संबंधिविज्ञानादिह न भवति ॥ प्रियान्यं, अत्यन्यं कुलं । इह तु भवति-परमान्यत् तिष्ठति । परमान्यत् पश्य ।

**अलुग्वा**[2] ॥३॥ "न डान्लुक्" इति यो लुचोऽभाव: प्रतिषेध उक्तः स नपुंसकस्य वा भवति ॥ हे चर्म, हे चर्मन् । हे दंडि, हे दंडिन् कुलं ।

**अतोऽम्**[3] ॥ ४ ॥ अकारांतस्य नपुंसकस्य संबंधिनो: स्वमोरमित्यादेशो भवति ॥ स्लुचोऽपवाद: । धनं तिष्ठति । धनं पश्य । अम्विधानं ङसर्थं-अतिजरसं कुलं तिष्ठति । अतिजरसं कुलं पश्य ।

१-ह्रस्वात्तादौ तद्धिते ।८।३।१०१।२। निसस्तपतावनासेवने।१०२।३-ह्रस्वो नपुंसके प्रातिपदिकस्य । १।२। ४७॥४-अद्ड्डतरादिभ्यः पंचभ्यः॥ ७ । २ । २५ ॥

१-कस्कादिषु च । ८ । ३ । ४८ ।
२-(संबुद्धौ नपुंसकानां नलोपो वा वाच्यः) इति वार्तिकं॥
३-अतोऽम्। १ । १ । ३४ ॥

Ac. Gunratnasuri MS Jin Gun Aradhak Trust

**श्लुक्**[1] ॥५॥ नपः संबंधिनोः स्वमोश्श्लुक् भवति ॥ दधि तिष्ठति । दधि पश्य । मधु । कर्तृ । यत् । तत् । कुलं ।

**जरसो वा**[2] ॥६॥ जरसन्तस्य नपः स्वमोः श्लुग् भवति वा ॥ अतिजरः । अतिजरसं कुलं ।

**इको लुग्**[3] ॥७॥ इगंतस्य नपः संबंधिनोः स्वमोः श्लुक् वा भवति ॥ लुग्वद्भवतीत्यर्थः । हे वारे । वारि । हे त्रपो । हे त्रपु । हे कर्तः । हे कर्तृ । प्रियतिसृ कुलं । प्रियत्रि कुलं । श्लुचो लुग्वचनममः सर्वलोपार्थं ।

**पुमाँश्चान्यतोऽच्यापि**[4] ॥८॥ यदिगंतं शब्दरूपमन्यतो विशेष्यवशान्नपुंसकार्थे वर्तते तदर्थोऽजादावपि टादौ सुपि परे पुंवद्वा भवति ॥ नम्ह्रस्वौ न भवत इत्यर्थः । ग्रामण्या कुलेन । ग्रामणिना कुलेन । ग्रामण्ये, ग्रामणिने । ग्रामण्यः, ग्रामणिनः । ग्रामण्यः, ग्रामणिनः । ग्रामण्योः, ग्रामणिनोः । ग्रामण्यां, ग्रामणिनां । ग्रामण्यां, ग्रामणिनि । ग्रामण्योः । ग्रामणिनोः । एवं कर्त्रा, कर्तृणा । कर्त्रे, कर्तृणे । शुचये, शुचिने । मृदवे, मृदुने । शुचेः, शुचिनः । मृदोः, मृदुनः । शुच्योः, शुचिनोः । मृद्वोः, मृदुनोः । शुचौ, शुचिनि । मृदौ, मृदुनि ॥ अन्यत इति किं ? त्रपुणे । जतुने । पीलुने । फलाय अचीति किं ? ग्रामणिभ्यां । ग्रामणिभिः । आपीति किं ? ग्रामणिनी, शुचिनी कुले । इकृ इति किं ? कीलालपेन कुलेन ।

**दध्यस्थिसक्थ्यक्ष्णोऽनङ्**[5] ॥ ९ ॥ दधि, अस्थि, सक्थि, आक्षि इत्येतेषामिगंतानां नपामनङादेशो नित्यं भवति तत्संबंधिन्यन्यसंबंधिनि वाऽजादावापि परे । दध्ना । दध्ने । दध्नि, दधनि । अस्थ्ना । अस्थ्ने । अस्थ्नि, अस्थनि । सक्थ्ना । सक्थ्ने । सक्थ्नि, सक्थनि । अक्ष्णा । अक्ष्णे । अक्ष्णि, अक्षणि । प्रियदध्ना । प्रियास्थ्ना । अतिसक्थ्ना । प्रियाक्ष्णा पुरुषेण।प्रियदध्न्या । प्रियास्थ्न्या । परमास्थ्न्या स्त्रिया । अचीति किं ? दधिभ्यां । दधिभिः । दधिभ्यः । आपीति किं ? दधिनी । दधीनि । नप इति किं ? दधिना । दधये । दधिर्नामकश्चित् ।



**नम् सुपि**[1] ॥ १० ॥ इगंतस्य नपोऽजादौ सुपि परे नमागमो भवति ॥ वारिणी । त्रपुणी । कर्तृणी कुले । वारिणा । वारिणे । वारिणः । वारिणोः । वारीणां । वारिणि ।

**शावचः**[2] ॥ ११ ॥ अजंतस्य नपः शौ "जश्शसश्शिः" इत्येतस्मिन्परे नम् भवति ॥ वनानि।धनानि।वारीणि।त्रपूणी।कर्तृणि । कुलानि ।

**जलां**[3] ॥ १२ ॥ अचः परा या जल्जातिः तदंतस्य नपःशौ परे नित्यं नम् भवति॥उदश्विंति। पयांसि।काष्ठतंक्षि । अच इति किं ? बहूर्जि, सूर्जि ।

**ततः प्रागार्यवज्रस्य**[4] ॥ १३ ॥ जलंतस्य नपः शौ परे ततोऽन्याया जल्जातेः प्रागार्यवज्रस्याचार्यस्य मतेन नम् भवति ॥ बहूंर्जि । सूंर्जि । अन्येषां–बहूर्जि । सूर्जि ।

**अज्झश्शतुः**[5] ॥ १४ ॥ अद्भवति झिर्यस्मात् ततोऽज्झेर्द्विरुक्तात् जक्षादेश्च पंचकात्परो यः शतृप्रत्ययस्तदंतस्य नपः शौ परे आर्यवज्रस्य मते नम् भवति अन्येषां तु न भवति । ददंति । ददति । दधंति । दधति । जक्षंति । जक्षति । जाग्रंति । जाग्रति । दरिद्रति। दरिद्रंति । चकासंति । चकासति । शासंति । शासति कुलानि



Ac. Gunratnasuri MS Jin Gun Aradhak Trust

अज्झेरिति किं ? पचंति, पठंति कुलानि ।

**न नम्**[1]॥ १५ ॥अज्झेः परो यः शता तदंतस्य शब्दरूपस्य यो नम् प्राप्नोति स सर्वो न भवति ॥ दधती । ददती स्त्री । दधती । ददती कुले । ददत् । ददतौ । ददतः । ददतं । ददतौ । एवं जक्षत् । जक्षतौ । इत्यादि ।

**ङीग्योर्वादश्नः**[2] ॥ १६ ॥ श्नावर्जितादवर्णांतात्परो यः शता तदंतस्य ङी गी इत्येतयोः परयोर्न्नम् भवति वा ॥ तुदंती । तुदती स्त्री । तुदंती । तुदती कुले । एवं करिष्यंती । करिष्यती । भांती । भाती । अश्न इति किं ? क्रीणती स्त्री क्रीणती कुले ।

**शप्श्यात्**[3]॥१७॥अवर्णाच्छपःश्याच्च परस्य शतुर्ङीग्योर्न्नित्यं नम् भवति ॥ भवंती कुले।दिव्यंती स्त्री।दिव्यंती कुले।आदिति किं?घ्नती। अदती ।

**जश्शसाश्शिः**[4] ॥ १८ ॥ नपः संबंधिनोः जश्शसोः शि इत्यादेशो भवति ॥ धनानि तिष्ठंति । वनानि पश्य । वारीणि । त्रपूणि । कर्तॄणि । यशांसि ।

**आडश्चौतो गीः**[5] ॥ १९ ॥ नप आडंतस्य च संबंधिन औकारस्य सुपः स्थाने गी इत्ययमादेशो भवति ॥ वने तिष्ठतः । वने पश्य । वारिणी । त्रपुणी । कर्तृणी । यशसी । आडः-बहुराजे नगर्यौ । शाले तिष्ठतः । शाले पश्य । परमशाले । तत्संबंधिविज्ञानादिह न भवति ॥ प्रियशालौ ग्रामौ । आड इति किं ? क्षीरपौ ।

**ङितो याट्**[6] ॥ २० ॥ आडंतस्य संबंधिनः ङकारानुबंधस्य सुपो याडागमो भवति ॥ शालायै । शालायाः । शालायाः । शालायां । बहुराजायै । बहुराजायाः । बहुराजायां ।

**टौस्येत्**[1] ॥ २१ ॥ आडंतस्य संबंधिनो टा ओसित्येतयोः परतः एकारादेशो भवति ॥ शालया । शालयोः । परमशालया । परमशालयोः ।

**इदुतो गिग्वौतोऽस्त्रेः**[2] ॥ २२ ॥ इकारादुकाराच्च परस्यौकारस्य सुपः स्थाने यथासंख्यं गि गु इत्यादेशौ भवतः स्त्रीशब्देकारं वर्जयित्वा । पती तिष्ठतः । पती पश्य । साधू पश्य । अस्त्रेरिति किं ? अतिस्त्रियौ पुरुषौ । अस्त्रेरितीदमेव ज्ञापकं–इयुवपवादेनेदुत्कार्यं भवति ॥तेनातिस्त्रियः । सहस्त्रियः । इत्यादि सिद्धं ।

**जस्येङ्**[3] ॥ २३ ॥ इकारांतस्य उकारांतस्य च जसि परे एङ् भवति ॥ पतयः । साधवः । बुद्धयः । धेनवः ।

**ङिरौत्**[4] ॥ २४ ॥ इकारादुकाराच्च परस्य ङि इत्येतस्य औत् इत्ययमादेशो भवति ॥ सख्यौ । पत्यौ ।

**न्यंशादां**[5] ॥ २५ ॥ नि इत्येतस्मादंशादवयवात् याटः आटश्च परस्य ङेराम् इत्ययमादेशो भवति ॥ नियां । ग्रामण्यां । शालायां । बहुराजायां । नद्यां । बध्वां ।

**घेर्डौरनाटि**[6] ॥ २६ ॥ घिसंज्ञकात्परो यो ङिस्तस्यानाटः डौ इति डिदादेशो भवति ॥ मुनौ । साधौ । धेनौ । बुद्धौ । घेरिति किं ? सख्यौ । पत्यौ । पताविति केचित् । अनाटीति किं ? बुद्ध्यां । धेन्वां ।

**नाऽस्त्रीटः**[7]॥ २७ ॥ घेरस्त्रीविषयस्य टः इति तृतीयैकवचनस्य ना इत्यादेशो भवति ॥ मुनिना । साधुना । मुनिपातिना । अस्त्रीति किं ? बुद्ध्या।धेन्वा।घेरिति किं?सख्या । पत्या ।

---

१-नाम्यस्ताच्छतुः ॥ ७८ ॥ २--आच्छीनद्योर्नुम् ॥ ८० ॥ ३—शप्श्यनोर्नित्यं ॥ ८१ । ४—जश्शसोः शिः । २० ॥ ५—नपुंसकाच्च ॥ १९ औङ आपः ॥ १८ ॥ ६—याडापः ॥ ७ । ३ । ११३ ॥

१ आङि चापः ॥ १०५ ॥ २—प्रथमयोः पूर्वसवर्णदीर्घः । ६ । १ । १०२ ॥ ३— जसि च ॥ ७ । ३ । १९ ॥ ४—औत् ॥१८ । ५—ङेरांनद्याम्नीभ्यः॥ ७ । ३ । ११६ ॥ ६--अच्च घेः ॥ ११९ ॥ १ ७--आङो नाऽस्त्रियां॥१२०॥

Ac. Gunratnasuri MS Jin Gun Aradhak Trust

**ङ्येङ्**[1] ॥ २८ ॥ घिसंज्ञकस्य ङि-ङकारादौ सुपि परे एङ् भवति ॥ मुनये । साधवे । मुनेः । साधोः । बुद्धये । धेनवे । ङीति किं ? बुद्धयै । धेन्वै ।

**स्त्रिया वाट्**[2] ॥ २९ ॥ स्त्रीलिंगमर्थमभिदधतः इदुदंताच्छब्दात्परस्य तत्संबंधिनोऽन्यसंबंधिनो वा ङितः सुपः आडागमो वा भवति॥ बुद्ध्यै, बुद्धये । धेन्वै, धेनवे । बुद्ध्याः, बुद्धेः । धेन्वाः, धेनोः । बुद्ध्यां, बुद्धौ । धेन्वां, धेनौ । शुच्यै, शुचये । पट्वै, पटवे । पत्यै, पतये । जीवपत्यै, जीवपतये । स्त्रियै, स्त्रिये । प्रियबुद्ध्यै, प्रियबुद्धये । अतिधेन्वै । अतिधेनवे । कन्यापत्यै । कन्यापतये । स्त्रियै पुरुषाय वा ॥

**य्वोऽपुंसः**[3] ॥ ३० ॥ अपुंसि स्त्रियामर्थे वर्तमानादीकारांतादूकारांताच्च परस्य तत्संबंधिनोऽन्यसंबंधिनो वा ङितः सुपो नित्यमाडागमो भवति।नद्यै । लक्ष्म्यै । नद्याः । लक्ष्म्याः । नद्यां । लक्ष्म्यां । कुट्यै । वध्वै । कुट्याः । वध्वाः । कुट्यां । वध्वां । अतिकुट्यै । अतिवध्वै । खरकुटीव खरकुटी तस्यै खरकुट्यै ।कुमारीवाचरतीति कुमारी तस्यै कुमार्यै स्त्रियै पुरुषाय वा । अपुंस इति किं ? ग्रामण्ये । खलप्वे । स्त्रियै पुरुषाय वा ।

**वेयुवोऽस्त्रियाः**[4] ॥ ३१ ॥ इयुवादेशभाविनौ यावीकारोकारौ तदंतादपुमर्थात् स्त्रीवृत्तेः परस्य तत्संबंधिनोऽन्यसंबंधिनो वा ङितःसुपो वा आट् भवति स्त्रीशब्दं वर्जयित्वा॥श्रियै । श्रिये भ्रुवै । भ्रुवे । श्रियः । श्रियाः । भ्रुवाः । भ्रुवः। श्रियां । श्रियि । भ्रुवां । भ्रुवि । अतिश्रियै । अतिश्रिये । प्रियश्रियै । प्रियाश्रिये । अतिभ्रुवै । अतिभ्रुवे । पृथुभ्रुवै । पृथुभ्रुवे । स्त्रियै पुरुषाय वा । इयुव इति किं ? नद्यै । पुनर्भ्वै । अस्त्रिया इति किं ? स्त्रियै । परमस्त्रियै । अपुंस इति किं ? यवक्रिये । कटप्रुवे स्त्रियै पुरुषाय वा ।

**नामामः**[1] ॥ ३२ ॥ इयुवादेशभावीकारोकारांतादपुमर्थात्परस्य तत्संबंधिनोऽन्यसंबंधिनो वा सुप आमो नामादेशो वा भवति स्त्रीशब्दं वर्जयित्वा । श्रीणां । श्रियां । भ्रूणां–भ्रुवां ॥ अतिश्रीणां । अतिश्रियां । पृथुभ्रूणां, पृथुभ्रुवां । स्त्रीणां पुरुषाणां वा । अस्त्रिया इति किं ? स्त्रीणां । परमस्त्रीणां ।

**नम्ह्रस्वाद्साटः**[2] ॥ ३३ ॥ नमंतात् ह्रस्वांतादाडंतात्संभवदाडश्च शब्दात् परस्यामो नित्यं नाम्भवति ॥ वारीणां । त्रपूणां । ह्रस्वात्-धनानां । मुनीनां । धेनूनां । पितॄणां । आड्-शालानां । बहुराजानां । साटः-नदीनां । वधूनां । स्त्रीणां ।

**रष्णां संख्यानां**[3] ॥ ३४ ॥ रेफषकारनकारांतानां संख्यावाचिनां संबंधिन आमो नाम् भवति ॥ चतुर्णां । परमचतुर्णां । षण्णां । परमषण्णां । अष्टानां । परमाष्टानां । संबंधिन इति किं ? अतिचतुरां । अतिषषां । प्रियाष्टानां ।

**त्रेस्त्रयः**[4] ॥ ३५ ॥ त्रिशब्दस्यामस्संबंधिनस्त्रयादेशो भवति ॥ त्रयाणां । परमत्रयाणां । आमस्संबंधिविधानादिह न भवति ॥ अत्रीणां । अतित्रीणां ।

**मोऽणोऽमः**[5] ॥ ३६ ॥ अणः परस्यामादेर्मकारो भवति ॥ धनं । मुनिं । धेनुं । नदीं।वधूं।

**जरायाः ङसिंद्रस्याचि**[6] ॥ ३७ ॥ जराशब्दस्य स्वसंबंधिन्यन्यसंबंधिनि वा अजादौ

१—घेर्ङिति ॥ १११ । २—३–ङिति ह्रस्वश्च ॥ १४ । ६ । आण्नद्याः । ७ । ३ । ११२ । ४–ङिति ह्रस्वश्च । १ । ४ । ६ । नेयङुवङ्स्थानावस्त्री ।१।४।४

१–वामि ॥ १ । ४ । ५ । २--ह्रस्वनद्यापो नुट् । ७ । १ । ५४ । ३—षट्चतुर्भ्यश्च॥ ७ । १ । ५५ ।४--त्रेस्त्रयः ॥ ७ । १ । ५३ । ५--आमि पूर्वः ॥ ६ । १ । १०७ ॥ ६--जरायाः जरसन्यतरस्यां ॥ ७ । २ । १०१ ॥

Ac. Gunratnasuri MS Jin Gun Aradhak Trust

सुपि परे इंद्रस्याचार्यस्य मते ङसादेशो भवति ॥ जरसौ । जरसः । एकदेशे विकृतस्यानन्यत्वात् अतिजरसी । अतिजरसी कुले । अन्येषां मते न भवति । जरे । जराः ।

**धातोस्तिकारकसमस्तानेकाचोऽतत्संयोगाद्यञ्य्वोः**[1] ॥ ३८ ॥ तिकारकघटको यो धातुः समस्तः कृतसमासः यश्चानेकाच् तयोर्यो विवर्णोवर्णौ तयोरजादौ सुपि परे यञ् भवति न चेत्ताविवर्णोवर्णौ तस्य धातोरवयवात्संयोगात्परौ भवतः । सुल्वौ । सुल्वः । यवल्वौ । यवल्वः । खलप्वौ । खलप्वः । अनेकाचः-वस्विच्छति वसूः । क्यचः क्विप् । वस्वौ । वस्वः । तिकारकेत्यादीति किं ? लुवौ । लुवः । परमलुवौ । परमलुवः । अतत्संयोगादिति किं ? कटप्रुवौ । तद्ग्रहणं किं ? उल्ल्वौ । सकृल्ल्वौ ।

**दृन्पुनःकरवर्षाभिर्भुवः**[2] ॥ ३९ ॥ दृन्, पुनर्, कर, वर्षा इत्येतैरेव सह समस्तस्य भू इत्येतस्य क्विबंतस्योवर्णस्याचि परे सुपि यञ् भवति ॥ दृन्भ्वौ । दृन्भ्वः । करभ्वौ । करभ्वः । कार इत्यपि पाठः । कारभ्वौ, कारभ्वः । वर्षाभ्वौ, वर्षाभ्वः । एतैरिति किं ? स्वयंभुवौ ।

**प्रत्ययेऽसुधीणः**[3] ॥ ४० ॥ तिकारकसमस्तानेकाचो धातोः सुधी इणित्येतद्वर्जितस्येवर्णस्यातत्संयोगात्परस्याजादौ प्रत्यये परे यञ् भवति ॥ सुन्यौ । सुन्यः । सेनान्यौ । सेनान्यः । प्रध्यौ । प्रध्यः । अनेकाचः-निन्ये । निन्याते । निन्यिरे । असुधीण इति किं ? सुधियौ । सुधियः । ईयतुः । ईयुः । सुष्ठु ध्यायति दधातीति वा सुधीः । अस्मादेव निपातनाद्धीभावः ।

**भ्रूहल्श्नोश्चेयुवौ**[1] ॥ ४१ ॥ भ्रूशब्दस्य हल उत्तरस्य श्नुप्रत्ययस्य धातोश्चेवर्णोवर्णयोरजादौ प्रत्यये परे यथासंख्यमियू उव् इत्येतावादेशौ भवतः ॥ भ्रुवौ । भ्रुवः । आप्नुवन्ति । राध्नुवंति । नियौ । नियः । लुवौ । लुवः । अचीति किं ? भ्रूः । आप्नुतः । नीः । लूः ।

**स्त्रियाः**[2] ॥४२॥ स्त्रीशब्दस्य य इवर्णस्तस्याजादौ प्रत्यये परे इय् भवति ॥ स्त्रियौ । स्त्रियः । अतिस्त्रियौ । अतिस्त्रियः ।

**वाऽम्शसि**[3] ॥४३॥ स्त्री इत्येतस्येवर्णस्यामि शसि च परे इयादेशो वा भवति ॥ स्त्रियं, स्त्रीं । स्त्रियः, स्त्रीः । अतिस्त्रियं । अतिस्त्रीं । अतिस्त्रियः, अतिस्त्रीन् पुरुषान् ।

**दो मोऽस्यादसो माद्गुश्चाषिन्यसन्**[4] ॥४४॥ अदस् इत्येतस्यावर्णान्तस्य दकारस्य मकारो भवति तस्मान्मकारात्परस्यालः स्थाने गु इत्यादेशो भवति स च गुः षेर्नाभावाच्चान्यस्मिन्कार्ये कर्तव्ये असन्नलब्धात्मा पूर्वावस्थो भवति ॥ अमू । अमुं । अमू।अमून् । अमूदृक् । अमूदृशः। अमूदृक्षः । अस्येति कि ? अदःकुंडं । प्रियादसौ । अषिनीति किं ? अमुष्मै । अमुना । असन्निति किं ? अमुया । अमूभ्यां। असन्नधिकारः"नोम्यादिभ्यः" इति यावत् ।

असत्त्वेऽमू सुकर्माणःपिपठीः सुभुदौजिढत् ।
गुडलिण्मान् भवानिष्टं राजभिश्चेति सिद्ध्यति१ ॥

**वाऽद्रेः**[5] ॥ ४५ ॥ अद्र्यंतस्यादसो दकारस्य वा यथासंभवं विकल्पेन मकारो भवति मात्परस्यालः स्थाने गुः नित्यं भवति ॥ अमुद्र्यङ् ।

१--एरनेकाचोऽसंयोगपूर्वस्य ॥ ६ । ४ । ८२ । ओः सुपि । ६ । ४ । ८३ । ( गतिकारकेतर पूर्वपदस्य नेष्यते ) २--दृन्करपुनःपूर्वस्य भुवो यण् वक्तव्यः ) वर्षाभ्वश्च । ६ । ४ । ८ । ३--न भूसुध्योः ॥ ६ । ४ । ८५ ।१-अचि श्नुधातुभ्रुवां य्वोरियङुवङौ॥६ ।४।७७ २-स्त्रियाः ।६ । ७९ ॥ ३-वाम्शसोः । ६ । ४ । ८० ॥ ४-अदसो सेर्दादुदो मः । ८ । २ । ८० ॥ न मुने । ८ । २ । ३ ।५-अदसोऽद्रेः पृथङ्मुत्वं केचिदिच्छंति लत्ववत्। केचिंदत्यसदेशस्य नेत्येके सेर्हि दृश्यते ॥

Ac. Gunratnasuri MS Jin Gun Aradhak Trust

अदमुयङ् । अमुमुयङ् । अदद्र्यङ् ।

**गी बहुष्वेः**[1] ॥ ४६ ॥ बहुषु वर्तमानस्यादसो मकारात्परस्य एकारस्य स्थाने गी इत्यादेशो भवति ॥ गोरपवादः । अमी । अमीभिः । अमीभ्यः । बहुष्विति किं ? अमू कुले । अमू कन्ये । एरिति किं ? अमून् । अमूः । मादिति किं ? अमुके । अमुकेभ्यः ।

**न्लुक् सुबाश्रये**[2] ॥ ४७ ॥ "नः" इति यो नकारलोपः स सुबाश्रये सुपि परे यत् परस्य कार्यं यच्च सुपस्तस्मिन्कर्तव्येऽसन् भवति ॥ राजभ्यां । राजसु । सुपः-राजभिः । सुबाश्रय इति किं ? राजीयति ।

**श्योऽलुचि**[3] ॥ ४८ ॥ चक्षादेशस्य ख्शाञः "शो यः" इति यः शकारादेशो यकारस्स लुचोऽन्यस्मिन्कर्तव्येऽसन् भवति ॥ पुंख्यानं । अत्रासत्वादमि "पुमः खयि" इति न भवति ॥ नमः ख्यात्रे "कुपौ ≍क ≍पं" इत्यस्याशरीति प्रतिषेधः । पर्याख्यानं । "श्चुल्टुस्तौ नांतरे" इति णत्वप्रतिषेधः । आख्यातं । हलो यञ् "आतोऽध्याख्यः" इति नत्वं न भवतीति । अलुचीति किं ? सौप्रख्यं । सत्त्वात् "हलो यमि यमो वा" इति लोपः ॥

**परे**[4] ॥४९॥ अधिकारोऽयं "नोम्र्यादिभ्यः" इति यावत् । तत्र परे परे कार्ये कर्तव्ये पूर्वः पूर्वो विधिरसन् भवतीति वेदितव्यः । सुमुट् । पिपठीः । पर इति किं ? सर्पिष्टरं । गीस्तरा ।

**षृान्नो णः**[5] ॥५०॥ परिभाषेयं । स्थाननिमित्तनियमार्थो यः कश्चिदिह शास्त्रे णो नाम विधीयते स सर्वः षकाराद्रेफाच्च परस्य नकारस्य स्थाने भवति । स चातः परेऽसन् भवतीति वेदितव्यः । पूष्णः । तक्ष्णः । चतुर्णां । तीर्णं । आस्तीर्णं ।

**श्चुल्टुस्तौ नांतरे**[1] ॥ ५१ ॥ शकारे चवर्गे लकारे टवर्गे सकारे तवर्गे चांतरे स्थाननिमित्तयोर्मध्ये सति णो न भवति। शकारे-रशना। राशिना । चवर्गे-अर्चना । मूर्च्छना । आर्जनं । लकारे-वृषलेन । प्रकल्प्यमानं । प्रवलमानं । टवर्गे-पृष्टेन । पृष्ठेन । दृढेन । करणेन । सकारे-रसना । रसेन । तवर्गे-वर्तमानं । तीर्थेन । नर्दनं । वर्धनं । एतेष्विति किं ? मूर्खेण । गर्वेण । पुष्पेण । तिसृणां । मातृणां । अज्भक्तिमध्यगतरेफमृवर्णं प्रतिज्ञायते ॥

**घि घ्नः**[2] ॥ ५२ ॥ हंतेर्घकारे स्थाननिमित्तयोरंतरे सति णो न भवतीति ॥ वृत्रघ्ने । ब्रह्मघ्ने । घीति किं ? वृत्रहणौ । वृत्रहणः ।

**पदेऽनाङ्यतद्धिते**[3] ॥५३॥ आङ्वर्जिते पदे स्थाननिमित्तयोरंतरे सति णो न भवति न चेत्तत्पदं तद्धितप्रत्यये परे भवति ॥ प्रावनद्धं । पर्यावनद्धं । माषकुंभवापेन । चतुरंगयोगेन । अनाङीति किं ? प्राणद्धं । पर्याणद्धं । अतद्धिते इति किं ? आर्द्रगोमयेण ।

**अंतक्षुभ्नादीनां**[4] ॥ ५४ ॥ पदांतस्य क्षुभ्नादीनाञ्च नकारस्य णो न भवति । वृक्षान् । नरान् । क्षुभ्नादेः—क्षुभ्नाति । तृप्नोति ॥

**नृतेर्यङः**[5] ॥५५॥ नृतेर्धातोर्यङंतस्य णो न भवति ॥ नरीनृत्यते । नर्नर्त्ति । नरीनर्त्ति । नर्नरीति ।

**अभिन्ने**[6] ॥५६॥ षृाभ्यां परस्य नकारस्य णो भवति न चेत्स्थाननिमित्तात् भिन्नेऽन्यस्मिन्

---

१-एत ईद्बहुवचने ॥ ८१ ॥ २-नलोपः सुप्स्वरसंज्ञातुग्विधिषु कृति ॥ ३-नास्ति सूत्रं ४-पूर्वत्रासिद्धं ॥ ८ । २ । १ ॥ ५--रषाभ्यां नो णः समानपदे ॥ ८ । ४ । १ ॥

१--अट्कुप्वाङ्नुम्व्यवायेपि ॥ ८ । ४ । २ ॥ २-हंतेरत्पूर्वस्य ॥ ८ । ४ । २२ ॥ ३--पदव्यवायेपि ॥ ३८ ॥ ४--५पदांतस्य ॥ ३७ ॥ क्षुभ्नादिषु च ॥ ३९ ॥ ६--रषाभ्यां नो णः समानपदे ॥ १ ॥

Ac. Gunratnasuri MS Jin Gun Aradhak Trust

पदे वर्तते ॥ पूष्णः । तक्ष्णः । चतुर्णां । तीर्णं । पद इति किं ? मुनिर्नयति । अभिन्ने वाक्ये मा भूत् । मेषनासिकः । समासपदे ह्यभिन्नेऽप्यवयवौ तु भिन्नपदे । गर्गभगोऽस्या अस्तीति गर्गभगिणी । मातृभोगीणः । इत्यत्र नकारः प्रत्ययस्थो न भिन्नपदस्थः ।

**पूर्वपदस्थाद्वांतनम्सुपः**[1] ॥५७॥ पूर्वपदस्थात् षात्परो य उत्तरपदस्यांतो यश्च नमः यश्च सुबवयवो नकारः तस्य वा णो भवति ॥ माषवापिणौ । माषवापिनौ । व्रीहिवापिणौ । व्रीहिवापिनौ । नम्-माषवापाणि । माषवापानि । प्रहिण्वन् । प्रहिन्वन् । सुप्-माषवापेण, माषवापेन । व्रीहिवापेण, व्रीहिवापेन । पूर्वपदस्थादिति किं ? कूपवारिणा । अंतनम्सुप इति किं ? गर्गाणां भगिनी गर्गभगिनी ।

**सकेकाचोः**[2] ॥ ५८ ॥ पूर्वपदस्थात्षादुत्तरस्य कवर्गवत्येकाचि चोत्तरपदे तदंतस्य नमः सुबवयवस्य च नकारस्य नित्यं णो भवति ॥ मोक्षगामिणं । स्वर्गकामाणि कुलानि । पुष्पमेघाणां । एकाचि-ब्रह्माहणं।माषपाणि । क्षीरपेण ।

**क्तोऽषि** ॥५९॥ क्तक्तवत्वोः क्त्वाप्रत्ययस्य च तकारस्य य आदेशः स षादेशादन्यस्मिन् विधौ वर्तमानेऽसन् भवति ॥ क्षामिमान् । शुष्किका । लून्यूः । बुद्ध्वा । दग्ध्वा । अषीति किं ? वृक्णः । वृक्णवान् ।

**किञस्साष्षिः**[3] ॥६०॥ परिभाषेयं स्थानिनिमित्तनियमार्था । यः कश्चिदिह शास्त्रे षिर्नाम विधीयते स सर्वः कवर्गादिञश्च परस्य सकारस्य स्थाने भवति ॥ स च परस्मिन्कार्ये प्रवर्तमानेऽसन् भवतीति वेदितव्यः । वाक्षु । त्वक्षु । इञ्-सर्पिषा । धनुषा ।

**शर्नमः**[4] ॥ ६१ ॥ इयमपि परिभाषा॥किञः परो यः शर् नम् च तस्मात्परस्य सकारस्य षिर्भवतीति वेदितव्यं । सर्पिःषु।धनुःषु।सर्पींषि।धनूंषि।

**सिचो न यङि**[1] ॥ ६२ ॥ सिची क्षरणे इत्यस्य यङि सर्वः षिरादेशो न भवति । सेसिच्यते । आभिसेसिच्यते । यङीति किं ? सिषेच । अभिषिषिक्षति ।

**सुञस्स्यसनि**[2] ॥ ६३ ॥ सुञः स्ये सनि च प्रत्यये परे सर्वः षिर्न भवति । परिसोष्यति । अभ्यसोष्यत् । सनि-सुसूषति । क्विप्-सुसूः । स्यसनीति किं ? सुषाव । अभिषुणोति ।

**सेधतेर्गतौ**[3] ॥ ६४ ॥ सेधतेर्गतौ वर्तमानस्य सर्वः षिर्न भवति । अभिसेधति । अभिसेधयते गाः । गताविति किं ? निषेधं । प्रतिषेधत्यकार्यात् । निषेधसूत्रत्रयमपि परिभाषैव ।

**शास्वसिघस्सिकृतस्यासक्सातोऽबहुपदात्**[4] ॥ ६५ ॥ किञः किञ्पराच्च शर्नमः परो यः शासि वसि घसि इत्येतेषां यश्च सिः "तिरसस्तेस्सिः" इत्यादिना विहितः यश्च कृतो-विहितः सगागमःस स्थानिकवर्जितो यश्च कृतस्य सात्प्रत्ययवर्जितस्यावयवस्सकारस्तस्य स्थाने षिरादेशो भवति न चेत्स बहुप्रत्ययात्पदाच्च परो भवति ॥ शास्-अशिषत् । शिष्टः । शिष्टवान् । वसि-उषितः । उषितवान् । घसि-जक्षतुः । जक्षुः । सि-चतुष्कंटकं । द्विष्पचति । कृत-एषः । सिषेच । कृतावयवस्य-वाक्षु । वक्ष्यति । सर्पिःषु । सर्पींषि । शासादीति किं ? असिसेकत् । असिसेकत् । असक्सात इति किं ? दधिस्यति । निस्से । सुपिस्स्यते । मुनिसात्करोति । अबहुपदादिति

---

1-प्रातिपदिकांतनुम्विभक्तिषु च ॥११॥२-एकाजुत्तरपदे णः ॥ १२ ॥ कुमति च ॥ १३ ॥ ३-४-इण्कोः ॥८।३।७॥नुम्विसर्जनीयशर्व्यवायेपि ॥५८॥

1-सिचो यङि ॥ ११२ ॥
2सुनोतेः स्यसनोः॥ ८ । ४ १७ । 3-सेधतेर्गतौ । ८।३।११३। 4-शासिवसिघसीनां च । ८ । ३ । ६० 5। आदेशप्रत्यययोः । ८ । ३ । ५९ ॥

Ac. Gunratnasuri MS Jin Gun Aradhak Trust

किं ? बहुसेकूं । बहुसेचौ । दधिसेक् । दधिसेचौ

**षढः[1] कस्सि** ॥ ६६ ॥ षढयोस्सकारे परे ककारादेशो भवति ॥ पक्ष्यीत। तोक्ष्यति। विविक्षति । अद्राक्षीत् । ढस्य-लेक्ष्यति । अलेक्ष्यत् । निहोक्ष्यति ।

**रः पदांते विसर्जनीयः[2]** ॥ ६७ ॥ रेफस्य पदांते वर्तमानस्य विसर्जनीयादेशो भवति । सजूः । सजुःषु । अहः । अहःसु । वृक्षः । प्रातः । गीः । पदांत इति किं ? गिरा । गिरः पदांत इत्यधिकारः "पदस्य" इति यावत् ।

**धातोर्व्रीकृद्दीर्घोऽयहल्नि चाच्छुर्कुरोः[3]**॥६८॥ छुर् कुर् इत्येतद्वर्जितस्य धातोरवयवे वकारे रेफे च पदांते यप्रत्ययवर्जितहल्परे नकारे परे च तदवयवः पूर्व इग्दीर्घो भवति ॥ गीः । धूः । आशीः । सजूः । गीर्षु । धूर्षु । अयहल्नि-दीव्यात् । तूर्व्वति । कूर्दते । शीर्णं । प्रदीव्ना । प्रदीव्नि । अयहल्नि चेति किं ? गिरौ; गिरः । किरति । गिरति । यप्रतिषेधः किं ? गिर्यः । धुर्यः । निरनुबंधोपादानादिह भवत्येव-दीव्यति । कीर्यते । अच्छुर्कुरोरिति किं?धुर्यात् । कुर्यात् । उकारः किं ? कुरशब्दे—कूर्यते । हलीति सिद्धे 'न' ग्रहणं "असिद्धं बहिरंगमंतरंगे" इति । विव्यतुः । विव्युरित्यादिवत् श्वादेशस्यासिद्धत्वं प्राप्तं स्तन्मा भूदित्येवमर्थं । नग्रहणादिह न भवति ॥ मुर्मुर्काम्यति ।

**म्वोश्च मो निः[4]** ॥६९॥ मकारांतस्य धातोरंतस्य पदांते मकारवकारयोश्च परयोर्नकारो भवति ॥ प्रशान् । प्रदान् । प्रदान्सु । प्रतान् । प्रतान्भिः । प्रतान्सु । नस्यासिद्धत्वाल्लुग्न भवति ॥ म्वोः-नन्नन्मि । नन्नन्वः । नन्नन्मः । जंगन्मि ।.जगन्वान् । म्वोश्चेति ।किं ? प्रतामौ । प्रतामः ॥

**अनडुद्द्युदुष्णिग्दिग्दृक्स्पृग्दधृक्परिव्राट्[1]** ॥७०॥ अनडुहित्यादीनां शब्दरूपाणि पदांते कृतदत्वादीनि निपात्यंते ॥ अनडुह् इत्येतस्य दत्वं-स्वनडुत्कुलं । अनडुद्भ्यां । अनडुत्सु । दिव इत्येतस्य उत्वं । विमलद्यु दिनं । द्युभ्यां । द्युषु । तकाराद्-अद्यौर्द्यौर्भवतीति द्युभवति । च्वौ दीर्घो न भवति ॥ उष्णिहः-उष्णिक् । उष्णिग्भ्यां । उष्णिक्षु । दिशः-दिक् । दिग्भ्यां । दिक्षु । दृशः-दृक् । दृग्भ्यां । दृक्षु । सदृक् । यादृक् । तादृक् । स्पृशः-घृतस्पृक् । घृतस्पृग्भ्यां । घृतस्पृक्षु । दधृषः-दधृक् । दधृग्भ्यां । दधृक्षु । एषां गत्वं । परिव्राडित्येतस्य डत्वं । परिव्राट् । परिव्राड्भ्यां । परिव्राट्सु । पदांत इति किं? अनड्वाहौ । अनड्वाहः । दिवौ । दिवः । इत्यादि ।

**नग्वा[2]** ॥ ७१ ॥ नगिति नशेर्धातोस्सकारस्य पदांते गत्वं वा निपात्यते । जीवनक् । जीवनग्भ्यां । जीवनक्षु । पक्षे षः-जविनट् । जीवनड्भ्यां । जीवनट्सु । पदांत इति किं ? जीवनशौ ।

**सजूरहस्सोऽतिप्यक्संस्रसुध्वंसो रि[3]**॥७२॥ सजुष् अहन्नित्येतयोरंत्यस्यालस्सकारस्य च पदांते वर्तमानस्य रिर्भवति कुसंसुध्वंसु इत्येतान्वर्जयित्वा अतिपि-न चेत्तिपपरो भवति । सजूः । सजूर्भ्यां । अहः । अहोभ्यां । वृक्षः । पयः । अतिपीति किं ? अचकात् । अन्वशात् भवान्

---

१–षढोः कः षिः । ८ । २ । ४१ ॥ २–खरवसानयोर्विसर्जनियः । ८ । ३ । १५ ॥ ३–र्वोरुपधाया; दीर्घ इकः । ८ । २ । ७६ ॥ हुलि च ॥७७॥ न भकुर्छुरां ॥ ७९ ॥ ४–मो नो धातो : ॥६४॥ म्वोश्च ॥६५॥

१–वसुस्रंसुध्वंस्वनडुहां दः ॥७२॥ दिव उत् । ६ । १ । १३१ । ऋत्विग्दधृग्स्रग्दिगुष्णिगंचुयुजिक्रुंचां च ॥ ३ । २ । ५९ । ( परौ वृजे षः पदांते ) २।नशेर्वा॥ ८ । २ । ६३ ।३-ससजुषो रु. ॥ ६६ ॥ अहन्॥ ६८ ॥

Ac. Gunratnasuri MS Jin Gun Aradhak Trust

अक्वस्रस्रंसुध्वंसेोरिति किं ? विद्वत् । उपसेदिवत् कुलं । उखास्रत्, पर्णध्वत् । पदांत इति किं ? संजुषो । सजुष इत्यादि ।

**सिपि दश्च वा**[1] ॥ ७३ ॥ पदांते दकारस्य च सिपि रिर्वा भवति । अभिनस्त्वं । अभिनत्त्वं। अचकास्त्वं । अचकात्त्वं ।

**रः सुप्सि**[2] ॥ ७४ ॥ रेफस्य सुपः सकारे परे रिर्भवति । विसर्जनीयापवादः । वार्षु । गीर्षु ।

**जलो जश्**[3] ॥ ७५ ॥ जलः पदांते वर्तमानस्य जश् भवति ॥ ऋत्विग् । ऋत्विग्भिः । त्रिष्टुब् । त्रिष्टुब्भिः । सुमुग् । सुमुग्भिः । गुडालिड्।गुडलिड्भिः । क्रुद् । क्रुद्भिः।पदांत इति किं ? त्रिष्टुभौ । त्रिष्टुभः ।

**बशो भष् झषस्स्ध्वोश्चैकाचः प्रत्यये**[4]॥७६॥ पदांते यो झष् यश्च सकारादौ ध्वशब्दादौ च प्रत्यये परतः तदंतस्यैकाचोऽवयवस्य बशः स्थाने भषादेशो भवति ॥ धर्मभुद् । धर्मभुद्भ्यां। धर्मभुत्सु । एवं-पर्णघुट् । गोधुक्।स्ध्वोः-भोत्स्यते। अबुद्ध्वं । निघोक्ष्यते । म्यघुढ्वं । धोक्ष्यते । अधुग्ध्वं । स्ध्वोश्चेति किं ? धर्मबुधौ । धर्मबुधः ।

**धाञो जलि च**[5] ॥ ७७ ॥ झषंतस्य धाञो बशः स्थाने जलादौ प्रत्यये परे भष् भवति ॥ धत्तः । धत्थः । धत्से । धध्वे । झष इति किं ? दधाति । दधासि । जलीति किं ? दध्वः।दध्मः । चकारो जलि च पदांते चेत्युत्तरत्र समुच्चयार्थः ।

**यङोऽन्येषां**[6] ॥ ७८ ॥ दधातेर्यङ्लुगंतस्य झषंतस्य बशः स्थाने जलादौ प्रत्यये परे केषामाचार्याणां भष् भवति ॥ दात्तः । दात्थः । अन्येषां-धात्तः । धात्थः ।

**धेस्तथः**[1] ॥ ७९ ॥ धेटो यङ्लुगंतात्झषंतात्परयोः तकारथकारयोः स्थाने एकेषां मतेन भष् भवति ॥ दाद्धः । दाद्धः । अन्येषां-धात्तः । धात्थः ।

**अधः**[2] ॥८०॥ अदधातेर्झषंतात् परयोस्तथयोस्स्थाने भष् भवति ॥ लब्धा । लब्धुं । अलब्ध । अलब्धाः । एवं-दोग्धा । लेढा । बोद्धा । धाप्रतिषेधात्-धत्ते । धत्थः ।

**इञो लिलुङां धो ढः**[3] ॥ ८१ ॥ इञः परयोर्ल्योः-लिङो लिटश्च लुङश्च धकारस्य ढकारो भवति ॥ चेषीढ्वं । च्योषीढ्वं । चकृढ्वे । ववृढ्वे । अचेढ्वं । अच्योढ्वं ।

**वेड्ञेः**[4] ॥८२॥ इञः परस्मादिटः ञिटश्च परेषां लिलुङां धकारस्य ढकारादेशो भवति वा ॥ अविषीध्वं । अविषीढ्वं । उपदिदीयध्वं, उपदिदीयढ्वं । अलविध्वं । अलविढ्वं । ञेः-लाविषीध्वं । लाविषीढ्वं । अलाविध्वं । अलाविढ्वं ।

**हः**[5] ॥८३॥ हकारस्य पदांते जलि च प्रत्यये परे ढकारो भवति ॥ परिषट् । परिषड्भ्यां । परिषट्सु । जलि-वोढा । वक्ष्यति ।

**दादेरेधादेर्घः**[6] ॥८४॥एधादेर्धातोर्यो दकारादिरवंयवस्तदवयवस्य हकारस्य पदांते जलि च प्रत्यये परे घकारो भवति ॥ गोधुक् । गोधुग्भ्यां। गोधुक्षु । अधोक् । जलि-अधाक्षीत् । दग्धा । धक्ष्यते । एधादेरिति किं ? दामलिट् । गुडलिट् । दृषद्धुट् ।

**नि घ्नः**[7] ॥ ८५ ॥ हंतेर्हकारस्य नकारे परे घकारो भवति ॥ वृत्रघ्ना।घ्नन् । घ्नंति । पित्तघ्नं ।

---

१।सिपि धातोः रुर्वा ॥ ७५ ॥ २ । रोः सुपि ॥ ८ । ३ । १६ ॥ ३।झलां जशोंऽते । ८ । ३९ ॥ ४।एकाचो बशो भष् झषंतस्य स्ध्वोः ॥ ८ । २ । ३७ ॥ ५ । दधस्तथोश्च ॥ ३८ ॥ ६ । नास्ति सूत्रं ।

१।२ । झषस्तथोर्धोऽधः ॥ ४० ॥
३–इणः षीध्वंलुङ्लिटां धोंऽगात्॥ ८ । ३ । ७८ ॥ ४–विभाषेटः ॥७९॥ ५–हो ढः । ८ । २ । ३१ ॥ ६–दादेर्धातोर्घः ॥३२॥ ७–हो हंतेर्ञ्णिन्नेषु ॥७।३।५४॥

**द्रुहमुहस्नुहस्निहो वा**[1] ॥८६॥ द्रुह् मुह् स्नुह् स्निह् इत्येतेषां हकारस्य पदांते जलि च परे घकारो वा भवति ॥ मित्रध्रुक् । मित्रध्रुग्भ्यां। मित्रध्रुक्षु । मित्रध्रुट् । मित्रध्रुड्भ्यां । मित्रध्रुट्सु । एवमुन्मुक् । उन्मुट् । उत्स्नुक् । उत्स्नुट् । उन्स्निक्, उत्स्निट् । जलि-द्रोग्धा । द्रोढा । मोग्धा । मोढा । स्नोग्धा, स्नोढा। स्नेग्धा । स्नेढा ।

**नहो धः**[2]॥८७॥नहो हकारस्य पदांते जलि च परे धकारो भवति ॥ उपानत् । उपानद्भ्यां । उपानत्सु । जलि-सन्नद्धा । सन्नत्स्यति ।

**चोः कुः**[3] ॥८८॥ चवर्गस्य पदांते जलि च परे कवर्गो भवति ॥ वाक् । वाग्भिः । वाक्षु । एवं-त्वक् । स्रक् । ऋत्विक् । जलि-वक्ता । वक्ष्यति । जलीति किं ? वाचौ । वाचः ।

**युज्यंचिक्रुंचः**[4] ॥ ८९ ॥ युज् अंच् क्रुंच् इत्येतेषां पदांते जलि च परे कवर्गो भवति ॥ युङ् । प्राङ् । क्रुङ् । क्रुङ्भ्यां । क्रुंङ्क्षु ।

**व्रश्चभ्रस्जसृजमृजयजराजभ्राजच्छशः षः**[5] ॥९०॥ व्रश्च् भ्रस्ज सृज् मृज् यज् राज् भ्राज् इत्येतेषां छकारस्य शकारस्य च पदांते जलि च परे षकारो भवति । मूलवृट् । मूलवृड्भ्यां । एवं-धानाभृट् । तीर्थसृट् । कंसपरिमृट् । देवेट् । विराट् । परेतराट् । विभ्राट् । छस्य-विट् । शस्य-गोविट् । जलि-व्रष्टा । व्रष्टुं । एवं-भ्रष्टा । भ्रष्टुं । स्रष्टा । मार्ष्टा । यष्टा । राष्टिः । भ्राष्टिः। छस्य-प्रष्टा । शस्य-उपविष्टा । उपवेक्ष्यते । भ्राजः राजसहचारितस्य षत्वमन्यस्य कुत्वमेव-विभ्राक् । जलीति किं ? मूलवृश्चौ । मूलवृश्चः । वृश्चादि-साहचर्यादधातोर्नेष्यते। निशायाः-निज्भ्यां। निच्छु।

**संयोगस्यादिस्कोर्लुक्**[1] ॥ ९१ ॥ पदांते यः संयोगो यश्च जलि प्रत्यये तस्यादेः सकारस्य ककारस्य च लुग्भवति । मस्ज्-साधुमक् । साधुमग्भ्यां । तक्ष्-काष्ठतक्।काष्ठतग्भ्यां । जलि-लग्नः । लग्नवान् । वृक्णः।वृक्णवान् । आचष्टे।

**पदस्य**[2] ॥ ९२ ॥ संयोगांतस्य पदस्य लुग् भवति ॥ श्रीमान् । श्रेयान् । पुंभ्यां । पुंसु ।

**रात्सः**[3] ॥ ९३ ॥ रेफात्परो यः सकारस्तदंतस्य लुग्भवति ॥ चिकीः । चिकीर्भ्यां । चिकीर्षु । रात्स एव इति नियमादिह न भवति ॥ ऊर्ग् । न्यमाड्ड्ढ़े ।

**ला**[4] ॥ ९४ ॥ लादेशेन सह प्रकृतेर्यः संयोगस्तदंतस्य पदस्य लुग् भवति ॥ शकेः—अशाशक् । वस्के-अवावक् । अजागर् भवान् ।

**नः**[5] ॥ ९५ ॥ नकारांतस्य पदस्य लुग् भवति ॥ राजा । राजभ्यां । राजसु । पदस्येति किं ? राजानौ । राजानः ।

**मांतोपांतजयो**[6] **मतोर्मो वः** ॥९६॥ मश्च अश्च मौ, तावंतौ उपांतौ यस्य तस्मान्मकारांतान्मकारोपांतादवर्णांतादवर्णोपांताज्जयंताच्च परस्य मतोर्मकारस्य वकारो भवति ॥ मांतात्-किंवान्। मोपांतात्-दाडिमवान् । अवर्णांतात्-वृक्षवान् । शालावान् । अवर्णोपांतात्-अहर्वान् । यशस्वान् । सम्राड्वान् । जयः-विद्युद्वान् । दृषद्वान् । एतेभ्य इति किं ? अग्निमान् । वायुमान् ।

**नाम्नि**[7] ॥ ९७ ॥ संज्ञायां विषये मतोर्मकारस्य वकारो भवति ॥ अहीवती । कपीवती । मुनीवती । एवंनाम्न्यो नद्यः । आसंदीवान् नाम ग्रामः ।

१—वा द्रुहमुहष्णुहष्णिहां ॥८। २। ३३॥ २—नहो धः ॥ ८। २। ३४॥ ३—चोः कुः ॥३०॥ ४—ऋत्विगित्यादिना सूत्रेण निपातितं ॥ ५—व्रश्चभ्रस्जसृजमृजयजराजभ्राजछशां षः ॥ ८। २। ३६॥

१—स्कोःसंयोगाद्योरंते च ॥ ८। २। २९॥ २—संयोगांतस्य लोपः॥ ८। २। २३। ३-रात्सस्य॥ २४॥ ४—नास्ति सूत्रं । ५—नलोपः प्रातिपदिकांतस्य ॥ ८। २। ७॥ ६—मादुपधायाश्च मतोर्वोऽयवादिभ्यः ॥ ९॥ झयः ॥ १०। ७—संज्ञायां ॥ ८। २। ११॥

Ac. Gunratnasuri MS Jin Gun Aradhak Trust

**अष्ठीवच्चक्रीवत्कक्षीवच्चर्मण्वद्रुमण्वत्**[1] ॥ ९८ ॥ एते शब्दा मतौ नाम्नि विषये निपात्यंते ॥ अष्ठीवान् नाम शरीरैकदेशः । चक्रीवान् रासभः, राजा च । कक्षीवान् नामर्षिः गजश्च । चर्मण्वती नाम नदी । रुमण्वान् नाम पर्वतः मंत्री च । नाम्नीति किं ? अस्थिमान् । चक्रवान् । कक्षावान् । चर्मवान् । लवणवान् ।

**अब्धौ चोदन्वान्**[2] ॥ ९९ ॥ आपो धीयंतेऽस्मिन्नित्यब्धिः । अब्धौ नाम्नि च उदन्वानिति निपात्यते । उदन्वान् घटः । उदन्वान्मेघः । नाम्नि-उदन्वान् समुद्रः ऋषेराश्रयश्च । अब्धौ चेति किं ? उदकवान् घटः । अत्रोदकमात्रस्य संबंधमात्रं विवक्षितं न तद्वानित्यर्थः ।

**राजन्वान् सुराज्ञि**[3] ॥ १०० ॥ शोभनो राजा यस्य तस्मिन्विवक्षिते राजन्वानिति मतौ लुगभावो निपात्यते ॥ राजन्वान् देशः । राजन्वती पृथिवी । सुराज्ञीति किं ? राजवान् देशः ।

**नोर्म्यादिभ्यः**[4] ॥ १०१ ॥ " ऊर्मि " इत्येवमादिभ्यः परस्य मतोर्मो वत्वं न भवति ऊर्मिमान् । यवमान् । गरुत्मान् । इक्षुमती ।

**ङ्यौऋृतोऽपदस्यार्**[5] ॥१०२॥ अपदस्य ऋकारस्य ङौ औटि च परे अर्भवति । पितरि । पितरौ । पितरः । पितरं । पितरौ । ङ्यौटीति किं? पित्रा । तकारः किं ? द्वौ ग्रौ । अपदस्येति किं ? कर्तृ कुलं, पश्य ।

**ङसोऽतो ड्डः**[6] ॥ १०३ ॥ अपदस्य ऋकारात्परस्य ङकारोपलक्षितस्य ङसिङसोरकारस्य ड्ड इति उत् डिदादेशो भवति ॥ पितुरागच्छति । पितुः स्वं । अत इति किं ? मात्रे । पित्रे ।

**ख्यत्य उः**[1] ॥१०४॥ अपदस्य ख्य् त्य् इत्येताभ्यामनच्काभ्यां परस्य ङात उकारो भवति ॥ सख्युरागच्छति । सख्युः स्वं । पत्युरागच्छति । पत्युः स्वं । ख्यत्य् इत्यनच्कग्रहणादिह न भवति ॥ मुख्यात् । अपत्यात् । अत इति तकारादिह न भवति सख्याः । पत्याः ॥

**एङो लुक्**[2] ॥१०५॥ अपदस्य एङः परस्य ङातः लुग्भवति । मुनेरागच्छति । मुनेःस्वं । साधोः । गोः ।

**एदे**[3] ॥ १०६ ॥ अकारांतस्यापदस्य एकारे अकारे च परे लुग्भवति ॥ पचे । यजे । पठंति । पचंति । यः । सः ।

**डित्यंत्याजादेः**[4] ॥१०७॥ अचां सन्निविष्टानां योंऽत्योऽच् तदादेश्शब्दरूपस्य डिति परे लुग् भवति ॥ मुनौ । साधौ । पिता । माता ।

**नः पथिमथ्यृभुक्षः**[5] ॥१०८॥ पथिन्,मथिन्, ऋभुक्षिन् इत्येतेषां नकारांतानामपदसंज्ञानामंत्याजादेर्लुग् भवति ॥ पथः । पथा । मथः । मथा । ऋभुक्षः । ऋभुक्षा । सुपथी नगरी । सुमथी स्त्री । अनृभुक्षी सेना । न इति किं ? पंथानमिच्छतः पथ्यः पश्य । मथ्यः पश्य । अपदस्येति किं ? पथिभ्यां । पथिभिः ।

**श्यनप्सुट्यन्**[6] ॥१०९॥ पथ्यादीनां नकारांतानां शौ अनपुंसकविषये सुटि च परे अंत्याजादेरन्नित्ययमादेशो भवति ॥ सुपंथानि वनानि । सुमंथानि कुलानि । अनृभुक्षाणि बलानि । पंथानौ । पंथानः । पंथानं । पंथानौ । एवं मंथानावित्यादि । नपः प्रतिषेधः किं ? सुमथी वने । सुपथी कुले ।

**थो नट्**[7] ॥११०॥ पथ्यादीनां नकारांतानां श्यनप्सुटि परे थकारस्य नडागमो भवति ॥

---

१—आसंदीवदष्ठीवच्चक्रीवत्कक्षीवद्रुमण्वच्चर्मण्वती॥ १२ ॥ २—उदन्वानुदधौ च ॥ १३ ॥

३—राजन्वान्सौराज्ये ॥१४॥ ४—मादुपधायाश्च मतोर्वोऽयवादिभ्यः । ८ । २ । ९ ॥ ५—ऋतो ङिसर्वनामस्थानयोः । ७ ।३।११०॥६—ऋत उत्॥६।१।१११॥

१-ख्यत्यात्परस्य ॥ ११२ ॥ २—ङसिङसोश्च ॥ ११०॥ ३-अतो गुणे ॥ ९७ ॥ ४-५-भस्य टेर्लोपः ।८८। ६-इतोऽत् सर्वनामस्थाने।६८। ७।थो न्थः॥ ७ । १ । ८७ ।

Ac. Gunratnasuri MS Jin Gun Aradhak Trust

अटावितौ । तथैवोदाहृतं ॥

**आस्स्यनः**[1] ॥१११॥ पथ्यादीनां सकारादौ श्यनप्सुटि परे अनः आकारो भवति ॥ पंथाः। मंथाः । ऋभुक्षाः ।

**द्यौः**[2] ॥११२॥ दिवित्यव्युत्पन्नस्य तत्संबंधिन्यन्यसंबंधिनि वा सकारादौ श्यनप्सुटि परे औकारादेशो निपात्यते॥ द्यौः । हे द्यौः।प्रियद्यौः ।

**अनडुहो नम्**[3] ॥११३॥ अनडुह् इत्येतस्य तत्संबंधिन्यन्यसंबंधिनि वा सकारादौ श्यनप्सुटि परे नमागमो भवति ॥ अनड्वान् । बह्वनड्वान्।

**उगिदचोऽनेधादेः**[4]॥११४॥उगिद्यस्य तस्यानेधादेरंचतेश्च तत्संबंधिन्यन्यसंबंधिनि वा श्यनप्सुटि परे नम् भवति ॥ गोमंति। पचंति। प्राञ्चि। कुलानि । गोमान् । गोमंतौ । गोमंतः । गोमंतं । गोमंतौ । एवं-पचन् । प्राङ् । अनेधादेरिति किं ? उखास्रत् । अधातोरित्यनुक्तेः गोमत्यतेःक्विपि-गोमान् । प्रियगोमान् । श्यनप्सुटीति किं?गोमतः पश्य । गोमती कुले ।

**युञ्जोऽसमासे**[5] ॥११५॥ युजृञ् योग इत्यस्यासमासे श्यनप्सुटि नं भवति॥ युंजि कुलानि । युङ् । युंजौ । युंजः । युंजं । युंजौ । ऋनिर्देशाद्युजी समाधावित्यस्य न भवति ॥ युजमापन्ना मुनयः। असमास इति किं ? अश्वयुक्॥

**पुंसो ङस्**[6] ॥११६॥ पुंस इत्येतस्य तत्संबंधिन्यन्यसंबंधिनि वा श्यनप्सुटि परे ङस् इत्यादेशो भवति ॥ बहुपुमांसि कुलानि । पुमान् । पुमांसौ । पुमांसः । पुंमासं । पुमांसौ । श्यनप्सुटीति किं ? पुंसः पश्य । द्विपुंसी कुले ।

**ओत औ**[7] ॥११७॥ श्यनप्सुटि परे ओकारस्य औकारो भवति ॥ गौः । गावौ । गावः। द्यौः। द्यावौ । द्यावः। सुगौः। अतिद्यौः। तकारो निर्देशार्थः । लाक्षणिकत्वादिह न भवति ॥ हे चित्रगो । श्यनप्सुटीति किं ? गवा । द्यवा ।

**डाऽमृशसः**[1] ॥११८॥ ओकारांतात्परस्य श्यनप्सुटोऽमृशसः आदेः डा इति डिदाकारो भवति ॥ गां । गाः । द्यां। द्याः ।

**ऋत्सखिदुशनस्पुरुदंशोऽनेहसस्सोः**[2]॥११९॥ ऋकारांतादिकारांताच्च सखिशब्दादुशनस्पुरुदंशस् अनेहस् इत्येतेभ्यश्च परस्य श्यनप्सुटि सोः डा भवति ॥ पिता । कर्ता । सखा । प्रियसखा । उशना । पुरुदंशा । अनेहा । तकारः किं ? गॄ निगरणार्थः।इयं सखी । सोरिति किं ? उशनसौ । उशनसः। पुरुदंशौ । पुरुदंशः। श्यनप्सुटीति किं? कर्तृ । सखि । कुलं ।

**हल्ङ्याब्दीर्घाल्लुक्**[3] ॥१२०॥ हलः ङी आङ् इति दीर्घाभ्यां च परस्य श्यनप्सुटः सोर्लुक् भवति ॥ राजा । उखास्रत् । नारी । किशोरी । सप्रेयसी पुमान् । बाला । बहुराजा। ङ्याडिति किं ? लक्ष्मीः । तंत्री । ग्रामणीः । कीलालपः । दीर्घादिति किं ? निष्कौशांबिः । अतिखट्वः ।

**वोशनोशनन्नघो**[4]**भगोभोस्स्वमश्चैकामंत्रणे** ॥१२१॥उशन् उशनन् अघोर् भगोर् भोर् इत्येते शब्दा वा निपात्यंते एकामंत्रणे श्यनप्सुटि परतः सु अमित्येतयोश्च लुक् । प्रसिद्धतत्संबंधस्य कार्यांतरं प्रत्यभिमुखीकरणमामंत्रणमुच्यते। हे उशन । हे उशनन् । हे उशनः। हे अघोः । हे अघवन् । हे भगोः । हे भगवन् । हे भोः ।

१—पथिमथ्यृभुक्षामात्॥८५॥ २—दिव औत्।६।१।१३१॥ ३—सावनडुहः ॥ ७ । १ । ८२ ॥ ४—उगिदचां सर्वनामस्थानेऽधातोः । ७ । १ । ७० ॥ ५—युजेरसमासे । ७ । १ । ७१ ॥ ६—पुंसोऽसुङ् ॥ ७ । १ । ८९ ॥ ७—गोतो णित् । ७ । १ । ९० ॥ ( ओतो णिदिति वाच्यं )

१—ओतोऽम्शसोः । ६ । १ । ९३ । २-.अनङ् सौ । ७ । २ । ९३ । ऋदुशनस्पुरुदंसोऽनेहसां च । ७ । २ । ९४ । ३ । हल्ङ्याब्भ्यो दीर्घात्सुतिस्यपृक्तं हल्। ६ । १ । ६८॥ ४ ।(उशनसः संबुद्धौ वानङ् नलोपश्च वा वाच्यः)

Ac. Gunratnasuri MS Jin Gun Aradhak Trust

हे भवन् । एकग्रहणं किं ? हे उशनसौ । हे उशनसः । हे अघवंतौ । हे अघवंतः । हे भगवंतौ । हे भगवंतः । हे भवंतौ । हे भवंतः । आमंत्रण इति किं ? उशना । मघवान् । भगवान् । भवान् । भोः इति सर्वादेर्भवच्छब्दस्य निपातनादिह न भवति ॥ हे भवन् । शत्रंतोऽयं भवच्छब्दः । भो ब्राह्मणि इत्यत्राव्ययं द्रष्टव्यं ।

**ह्रस्वोऽन्नित्याटः**[1] ॥ १२२ ॥ अकारांतस्य यस्य च 'य्वोऽपुंसः'इति नित्यमाङ् विधीयते तस्य चैकामंत्रणे श्यनप्सुटि ह्रस्वो भवति सोरमश्च लुक् ॥ हे देव । हे नदि । हे धन । हे वधु । हे लक्ष्मि । अन्नित्याट इति किं ? हे कीलालपाः। हे सेनानीः । नित्यग्रहणं किं ? श्रीः । हे भ्रूः।

**द्व्यचोंऽबार्थस्य**[2] ॥ १२३ ॥ द्वावचौ यस्य तस्यांबार्थस्यैकामंत्रणे श्यनप्सुटि ह्रस्वो भवति सोश्च लुक् । हे अंब । हे अन्व । हे अल्ल । हे अक्क । हे अत्त । हे प्रियांब । द्व्यच इति किं ? हे अम्बाले । हे अंबिके । हे मातरिति परत्वादर् ।

**एदाडः**[3] ॥ १२४ ॥ आङ एकामंत्रणे एकारो भवति सोश्च लुक् । हे शाले । हे माले ।

**ह्रस्वैतो लुचि चारेङ्**[4] ॥ १२५ ॥ ह्रस्वांतस्यैदंतस्य चैकामंत्रणे लुचि श्यनप्सुटि चारेङ् चासन्न आदेशो भवति सोश्च लुक् ॥ हे पितः । हे मातः । हे शुचे । हे पटो । हे अतिहे । हे से । लुचि—कर्तः । हे वारे । हे त्रपो ।

**पुत्रेऽर्हे मातुः कचोड्**[5] ॥१२६॥ स्वपदार्थोपसर्जनो यो मातृशब्दः पुत्रे वर्तते बहुव्रीहौ तस्मात्परस्य कचः श्यनप्सुट्येकामंत्रणे अडिति डिदादेशो भवति अर्हे पुत्रस्य प्रशंसायां ॥ हे गार्गीमात । हे वात्सीमात । अर्हे इति किं ? अरे गार्गीमातृक ।

**वोऽनडुच्चतुरोः**[1] ॥ १२७ ॥ अनडुह् चतुर् इत्येतयोरुकारस्यैकामंत्रणे श्यनप्सुटि वशब्दो भवति ॥ हे अनड्वन् । हे बह्वनड्वन् । हे प्रियचत्वः । हे अतिचत्वः ।

**वाः**[2] ॥ १२८ ॥ अनडुच्चतुरोरुकारस्य श्यनप्सुटि वा इत्यादेशो भवति ॥ बह्वनड्वांहि । चत्वारि कुलानि । अनड्वान् । अनड्वाहौ । अनड्वाहः । अनड्वाहं । अनड्वाहौ । चत्वारः। प्रियचत्वाः । प्रियचत्वारौ । प्रियचत्वारः ।

**न डान्लुक्**[3] ॥ १२९ ॥ ऋत्सखित् इति यो डादेशः यश्च "नः" इति नकारस्य लुक् तौ द्वावप्यत्रैकामंत्रणे न भवतः । हे पितः । हे सखे । हे राजन् । हे दंडिन् ।

**सखित ऐ च**[4] ॥ १३० ॥ इकारांतस्य सखिशब्दस्य तत्संबंधिन्यन्यसंबंधिनि वा श्यनप्सुटि परे ऐकारो भवति न चैकामंत्रणे ॥ सखायौ । सखायः । सखायं । सखायौ। प्रियसखायौ। प्रियसखायः । इत्यादि । तकारः किं ? इमे सख्यौ । श्यनप्सुटीति किं ? सखीन् । सख्यौ । न चैकामंत्रण इति किं ? हे सखे । चकार एकामंत्रणे न चेति समुच्चयार्थः ।

**क्रोष्टो**[5] × **क्रोष्टृ** ॥ १३१ ॥ क्रोष्टुशब्दस्य तत्संबंधिन्यन्यसंबंधिनि वा श्यनप्सुटि क्रोष्टृ इति तृप्रत्ययांतादेशो भवति न चैकामंत्रणे । क्रोष्टा । क्रोष्टारौ । क्रोष्टारः । क्रोष्टारं । क्रोष्टारौ । अतिक्रोष्टा । प्रियक्रोष्टा । पंचभिः क्रोष्टुभिः क्रीतौ पंचक्रोष्टारौ रथौ । श्यनप्सुटीति किं?

१ । २ । एङ्ह्रस्वात्संबुद्धेः ।६।१।६९। अंबार्थनद्योर्ह्रस्वः । ७।१०७॥ ३ । संबुद्धौ च ।७।४।१०६॥ ४ । ह्रस्वस्य गुणः । ७ । ४ । १०८ ॥५—मातॄणां मातच् पुत्रार्थमर्हते ।

१—अम् संबुद्धौ ॥ ७ । १ । ९९॥ २—चतुरनडुहोरामुदात्तः ॥९८॥ ३—तत्तद्विधायकेष्वसंबुद्धेरिति निषेधः । ४—न ङिसंबुद्ध्योः । ८ । २ । ८ ॥ सख्युरसंबुद्धौ ॥ ७ । १ । ९ ॥ ५—तृज्वत् क्रोष्टुः ॥७।१।९५।

Ac. Gunratnasuri MS Jin Gun Aradhak Trust

क्रोष्टून् । कृशक्रोष्टुवनं । न चैकामंत्रण इति किं ? हे क्रोष्टो ॥

**वाच्यापि**[१] ॥१३२॥ क्रोष्टुशब्दस्य तत्संबंधिन्यन्यसंबंधिनि वा आपि तृतीयैकवचनादौ सुप्यजादौ वा क्रोष्टृ इत्यादेशो भवति ॥ क्रोष्ट्रा । क्रोष्टुना । क्रोष्ट्रे । क्रोष्टवे । क्रोष्टुः । क्रोष्टोः । क्रोष्ट्रोः।क्रोष्ट्वोः।क्रोष्टरि।क्रोष्टौ।आमि नित्यत्वान्नाम् । क्रोष्टूनां । अचीति किं ? क्रोष्टुभ्यां । क्रोष्टुषु।आपीति किं ? क्रोष्टून् ।

**त्रप्स्वसृनप्तृनेष्टृत्वष्टृक्षत्तृहोतृपोतृप्रशास्त्रदीर्घः**[२] ॥१३३॥ तृप्रत्ययांतस्य अप् स्वसृ नप्तृ नेष्टृ त्वष्टृ क्षत्तृ होतृ पोतृ प्रशास्तृ इत्येतेषां च तत्संबंधिन्यन्यसंबंधिनि वा श्यनप्सुटि तदासन्नोऽकारो दीर्घो भवति न चैकामंत्रणे । तृ-कर्ता । कर्तारौ । कर्तारः।कर्तारं।कर्तारौ।अप्-आपः।स्वापः। स्वसारौ । स्वसारः । नप्तारौ । नप्तारः । नेष्टारौ । नेष्टारः । त्वष्टारौ । त्वष्टारः। क्षत्तारौ । क्षत्तारः। होतारौ । होतारः । पोतारौ । पोतारः । प्रशास्तारौ । प्रशास्तारः । अतिकर्तारौ । अतिकर्तारः। श्यनप्सुटीति किं ? अपः पश्य । कर्तरि । स्वसरि । न चैकामंत्रण इति किं ? हे कर्तः। हे स्वसः।

**न्यक्**[३] ॥ १३४ ॥ श्यनप्सुटि परे यो नकारस्तस्मिन्पूर्वोऽक् दीर्घो भवति ॥ वनानि । दधीनि । मधूनि । कर्तॄणि । राजा । राजानौ । राजानः । राजानं । राजानौ । न चैकामंत्रण इति किं ? हे राजन् । हे तक्षन् ।

**स्महतः**[४] ॥ १३५ ॥ सकारांतस्य महच्छब्दस्य च श्यनप्सुटि निमित्तो यो नकारस्तस्मिन् पूर्वोऽक् दीर्घो भवति ॥ श्रेयांसि । महांति कुलानि । श्रेयान् । श्रेयांसौ । महान् । महान्तौ । इत्यादि । प्रियश्रेयान् । अतिमहान् । न चैकामंत्रणे-हे श्रेयन् । हे महन् । निमित्तविज्ञानादिह न भवति ॥ सुहिन् । सुहिंसौ ।

**इन्हन्पूषार्यम्णश्शौ**[१] ॥१३६॥ इन्, हन्, पूषन्, अर्यमन्, इत्येतेषां शावेव परे यो नकारस्तस्मिन्पूर्वोऽक् दीर्घो भवति ॥ बहुदंडीनि । बहुब्रह्महाणि । बहुपूषाणि । बह्वर्यमाणि कुलानि । "न्यक्" इति सिद्धे नियमार्थं वचनं । शावेव नान्यत्र इति । तेनेह न भवति । दंडिनौ । ब्रह्महणौ । पूषणौ । अर्यमणौ । "अर्थवद्ग्रहणे नानर्थकस्येति" प्लीहान् । प्लीहानौ। प्लीहानः । इत्यत्र नियमो नास्ति। वाग्मिनौ । वाग्मिनः इत्यत्र तु " अनिनस्मन्ग्रहणान्यर्थवतोऽनर्थकस्य चेति,, भवति

**सावतोश्च**[२] ॥ १३७ ॥ अत्वित्युकारानुबंधस्य इन् हन्-पूषन्-अर्यमनित्येतेषां च सौ यो नकारस्तस्मिन् पूर्वोऽग् दीर्घो भवति ॥ भवान् । गोमान् । दंडी । वाग्मी । ब्रह्महा । पूषा । अर्यमा । प्रियगोमान् । प्रियदंडी इत्यादि । न चैकामंत्रण इति किं ? हे गोमन् । हे दंडिन् ।

**असोऽनेधादेः**[३] ॥ १३८ ॥ अनेधादेरसंतस्य सौ परे यस्तदासन्नोऽक् स दीर्घो भवति ॥ वेधाः । अप्सराः । सुपयाः गौः । सुस्रोताः नदी । अनेधादेरिति किं ? पिंडग्रः । चर्मवः। नचैकामंत्रणे-हे वेधः । हे सुपयः ।

**श्वे**[४] ॥१३९॥ श्वोऽच इति यश्शकारानुबंधः श्वादेशस्तस्मिन् पूर्वोऽक् दीर्घो भवति ॥ प्राचः। प्राचा । दधीचः दधीचा । प्राची प्रतीची । प्राच्यः । प्रतीच्यः ।

१-विभाषा तृतीयादिष्वचि ॥९७॥ २-अप्तृन्तृच्स्वसृनप्तृनेष्टृत्वष्टृक्षत्तृहोतृपोतृप्रशास्तॄणां ॥ ६ । ४ । ११ ।
३-सर्वनामस्थाने चासंबुद्धौ ॥ ६ । ४ ।८॥४-सांतमहतः संयोगस्य॥ १० ॥

१इन्हन्पूषार्यम्णां शौ ॥ ६ ।४।१२॥ २-३-सौ च ॥६।४।१३। अत्वसंतस्य चाधातोः६।४।१४।-४चौ॥ ६।३।१०८॥

Ac. Gunratnasuri MS Jin Gun Aradhak Trust

**नाम्यातिसृचतुष्षः**[1] ॥ १४० ॥ नाम्यादेशे तिसृचतुष्षकारांतवर्जितस्य पूर्वोऽक् दीर्घो भवति ॥ धनानां । शुचीनां । पटूनां । मातॄणां । अतिसृचतुष्ष इति किं ? तिसृणां। चतुर्णां । षण्णाम् ।

**नुर्वा**[2] ॥ १४१ ॥ नृ इत्येतस्य नामि परे पूर्वोऽग् दीर्घो भवति वा । नृणां । नॄणां ।

**संख्याविसायादह्नस्याहन्**[3] **ङौ** ॥ १४२ ॥ संख्यायाः वि साय इत्येताभ्यां च परस्य अह्न इत्येतस्य ङौ परे वा अहन् इत्यादेशो भवति ॥ द्वयोरन्होर्भवः द्व्यह्नः, तास्मिन् द्व्यह्नि । द्व्यहनि।द्व्यह्ने । तावदह्नि । तावदहनि, तावदह्ने । विगतमहः, व्यह्नः तास्मिन् व्यह्नि, व्यहनि, व्यह्ने। सायमहः सायाह्नः।सायाह्नि।सायाहनि ।साहाह्ने ।

**पद्दन्नोमास्हृन्निशसन्यूषन्दोषन्यकन्शकन्नुदन्नासंश्चासुटि**[4] ॥ १४३ ॥ पाद दंत नासिका मास हृदय निशा असृज् यूष दोस् यकृत् सकृत् उदक आसन्न इत्येतेषामसुटि सुटोऽन्यस्मिन् सुपि परे यथाक्रमं पद् दत् नस् मास् हृद् निश् असन् यूषन् दोषन् यकन् शकन् उदन् आसन् इत्येते आदेशा भवंति वा । पदा। पादेन दद्भिः। दंतैः। नसा । नासिकया । मासि, मासे । हृदि , हृदये । निशि, निशायां । अस्ना । असृजा । यूष्णा,यूषेण । दोष्णा , दोषा ।यक्ना, यकृता, । शक्ना, शकृता । उद्ना । उदकेन । आसनि, आस्नि,आसने । असुटीति किं ? पादः पादौ । चेन वानुकृष्यते

**पादोऽपदस्य**[5] **ग्यसुट्छिण्यादौ पद्** ॥१४४॥ अपदसंज्ञकस्य यःपाद् इत्यवयवस्तस्य गी इत्येतास्मिन्सुट्छिण्यादिवर्जिते चान्यस्मिन् प्रत्यये परे पद् इत्यादेशो भवति ॥ द्विपदी कुले ।द्विपदः पश्य । द्विपदी इयं । द्विपदिकां ददाति । अपदस्येति किं ? द्विपाद्भ्यां।द्विपाद्भिः। ग्यसुट्छिण्यादाविति किं ? द्विपादौ । द्विपादः । व्याघ्रपांदि कुलानि पश्य । पादयति । पादुकः ।

**क्वसू उस्**[1] ॥ १४५ ॥ अपदसंज्ञकस्यावयवो यः क्वसुस्तस्य ग्यसुट्छिण्यादौ प्रत्यये परे उसादेशो भवति ॥ विदुषी कुले । विदुषी स्त्री विदुषः । विदुषा । विदुष्मान् । पेचुषी कुले । पेचुषः । पेचुषा । पेचुष्मान् । ग्यसुट्छिण्यादाविति किं ? विद्वांसौ । पेचिवांसौ । विद्वांसि कुलानि विद्वयति । विद्वस्यति ।

**श्चोऽच**[2]॥ १४६ ॥ अपदसंज्ञकस्यावयवो योंऽचतिर्लुप्तनकारस्तस्य ग्यसुट्छिण्यादौ प्रत्यये परे श्च इत्यादेशो भवति।।दधीची । मधूची स्त्री। दधीचः । मधूचः । ग्ययुट्छिण्यादाविति किं ? दध्यंचि । मध्वांचि । दध्यंचौ । दध्यंचः । दध्ययति । दध्यच्यते ।

**उद ई**[3] ॥ १४७ ॥ उत् इत्येतस्यात्परस्यापदसंज्ञकावयवस्य लुप्तनकारस्यांचतेर्ग्यसुट्छिण्यादौ प्रत्यये परे ई इत्यादेशो भवति ॥ उदीची कुले । उदीचः, उदीचा । उदीची इयं । अन्यत्र-उदंचौ उदंचः । उदंचि कुलानि । उदयति । उदच्यते । पदत्वे-उदग्भ्यां। लुप्तनकारस्य ग्रहणात्-उदंचः । उदंचौ । उदंचि ।

**श्वयुवन्मघोनां वस्येसुप्युत्**[4] ॥ १४८ ॥ श्वन् युवन् मघवन् इत्येतेभ्योऽपदसंज्ञकावयवेभ्यः ग्यसुट्छिण्यादावीप्रत्यये सुपि च परे तदवयवस्य

१-नामि॥६।४।३।न तिसृचतसृ।६।४।४।२- नृ च॥६।४।६। ३-संख्याविसायपूर्वस्याह्नस्याहनन्यतरस्यां ६ । ३ ।११०। ४--पद्दन्नोमास्हृन्निशसन्यूषन्दोषन्यकञ्छकन्नुदन्नासञ्छस्प्रभृतिषु ॥ ६ । १ । ६३ ॥ ५-पादः पत् । ६ ।४।

१-वसोः संप्रसारणं ॥ ६ । ४ । १३१ ॥ २--अचः ॥ ६ । ४ । १३८ ॥ ३-उद ईत्॥ ६ । । १३९ ॥ ४-श्वयुवमघोनामतद्धिते ॥ ५ । ४ । १४४ ।

Ac. Gunratnasuri MS  Jin Gun Aradhak Trust

वशब्दस्य उशादेशो भवति ॥ शुनीयं । प्रियशुनी कुले । शुनः । शुना । अतियूनीयं । अतियूनी कुले । यूनः । यूना । अतिमघोनीयं । अतिमघोनी कुले । मघोनः । मघोना । ईसुपीति किं ? शौनं मासं । यौवनं । माघवनं । अन्यत्र-श्वान्नौ । युवानौ । मघवानौ । प्रियश्वानि कुलानि । पदत्वे-श्वभ्यां ।

**श्वोऽनोऽहल्वमात्**[1] ॥१४९॥ अपदसंज्ञकावयवस्य अन् इत्येतस्य ग्यसुट्छिण्यादावीसुपि परे श्वादेशो भवति न चेत्सोऽन्शब्दः हलोऽनंतराद्वकारान्मकाराच्च परः स्यात् ॥ राज्ञीयं । सुराज्ञी कुले । राज्ञः। राज्ञा । तक्ष्णः। तक्ष्णा । अहल्वमादिति किं ? पर्वणा । कर्मणा । हल्ग्रहणं किं ? दीव्ना । साम्ना । अन्यत्र-राजानौ । राजानः । सुराजानि कुलानि । पदत्वे-राजभ्यां । राजभिः ।

**ङिग्योर्वा**[2] ॥१५०॥ अपदसंज्ञकावयवस्य अन्नित्येतस्य ङौ ग्यादेशे च परे श्वो भवति वा न चेत्सोऽन्शब्दः हल्वमात्परो भवति ॥ राज्ञि । राजनि । साम्नि । सामनि । अह्नि । अहनि ।

**आतोऽनाङः श्लुक्**[3] ॥१५१॥ अपदस्याकारस्य ग्यसुट्छिण्यादौ सुपि परे श्लुग् भवति आङंतं वर्जयित्वा ॥ अंबु पिबतीति अंबुपः । अंबुपा । शुभंयः । शुभंया । अनाङ इति किं ? शालाः, मालाः पश्य ।

**डतिष्णां संख्यानां जश्शसः**[4] ॥ १५२॥ डति षकारनकारांतायाः संख्यायाः संबंधिनः जश्शस् इत्येतस्य सुपः श्लुग्भवति ॥ कति तिष्ठंति । कति पश्य । एवं-षट् । पंच । सप्त । नव । दश । परमषट् । परमपंच । तत्संबंधिविज्ञानादिह न भवति । प्रियषषः तिष्ठंति । प्रियपंचानः तिष्ठंति । प्रियषषः पश्य । प्रियपंचानः पश्य ।

**अष्ट औश्**[1] ॥१५३॥ अष्ट इति कृताकारस्याष्टन् इत्येतस्य संबंधिनोर्जश्शसोरौश् इत्याकारादेशो भवति ॥ अष्टौ तिष्ठंति । अष्टौ पश्य। परमाष्टौ । आकारांतपरिग्रहादिह न भवति । अष्ट तिष्ठंति । तत्संबंधिविज्ञानादिह न भवति ॥ प्रियाः अष्टौ येषां ते प्रियाष्टानः तिष्ठंति। प्रियाष्टनः पश्य ।

**अव्ययस्य**[2] ॥१५४॥ अव्ययस्य संबंधिनः सुपः श्लुग्भवति ॥ स्वः । उच्चैः । नीचैः । परमनीचैः। तत्संबंधिविज्ञानादिह न भवति ॥ अत्युच्चैसौ । अत्युच्चैसः ।

**अव्ययीभावस्य**[3] ॥१५५॥ अव्ययीभावस्य संबंधिनः सुपः श्लुग्भवति । अधिस्त्रि । उपवधु ।

**नातः**[4] ॥१५६॥ अकारांतस्याव्ययीभावस्य सुपः श्लुग्न भवति । उपकुंभेन । उपकुंभात् ।

**अमपंचम्याः**[5] ॥ १५७॥ अकारांतस्याव्ययीभावस्य संबंधिनः सुपः अं इत्यादेशो भवति पंचमीं वर्जयित्वा ॥ उपकुंभं तिष्ठति पश्य देहि स्वं । अपंचम्या इति किं ? उपकुंभात् ।

**तृतीयाया वा**[6] ॥१५८॥ अकारांतस्याव्ययीभावस्य तृतीयायाः अम् वा भवति ॥ उपकुंभेन, उपकुंभं, कृतं ॥

**सप्तम्याः**[7] ॥१५९॥ अकारांतस्याव्ययीभावस्य सप्तम्या अं वा भवति ॥ उपकुंभे, उपकुंभं निधेहि ।

**नद्यृद्धवंश्यस्य**[8] ॥१६०॥ नद्यंतस्य ऋद्धांतस्य वंश्यस्यांतस्य चाकारस्याव्ययीभावस्य सप्तम्या नित्यमम् भवति ॥ उन्मत्तगंगं । सप्तगोदावरं

१--अल्लोपोऽनः । ६ । ४ । १३४ [ न संयोगाद्वमंतात् । ६ । ४ । १३७॥ २--विभाषा ङिश्योः । ६ ।४। १३६ ॥ ३--आतो धातोः । ६ । ४ । १४० ॥ ४-षड्भ्यो लुक् ॥ ७ । १ । २२ ।

१--अष्टाभ्य औश् । ७ । १ । २१ ॥ २--अव्ययादाप्सुपः । २ । ४ । ८२ ॥ ३-अव्ययीभावश्च । १ । १ । ४१ ॥ ४--५-नाव्ययीभावादतोम् त्वपंचम्याः २ । ४।८३। ६--७ तृतीया सप्तम्योर्बहुलं ॥२।४।८४॥ ८--"सप्तम्या ऋद्धिनदीसमाससंख्यावयवेभ्यो नित्यमम्" वार्त्तिकं

Ac. Gunratnasuri MS Jin Gun Aradhak Trust

वसति । सुमद्रं । सुमगधं वसति । एकविंशतिभारद्वाजं । त्रिकोशलं वसति । प्रदिपदोक्तग्रहणादिह न भवति ॥ उपगंगे ।

**परस्परान्योऽन्येतरेतरस्यां सुपो वाऽपुंसि**[1] ॥१६१॥ परस्पर अन्योन्य इतरेतर इत्येतेषामपुंसि स्त्रियां नपुंसके च प्रयुज्यमानानां संबंधिनः सुपः स्थाने आमित्यादेशो भवति वा ॥ इमे सख्यौ परस्परां भोजयतः। परस्परं भोजयतः।आभिःसखीभिः परस्परेण भोज्यते। परस्परां भोज्यते । इमाः सख्यः परस्परां प्रयच्छंति । परस्परस्मै प्रयच्छंति । एवमन्योन्यां, अन्योन्यं । इतरेतरां, इतरेतरं । नपुंसके-इमे कुले परस्परां परस्परं वा भोजयतः। एवं सर्वत्रापि। अपुंसीति किं ? परस्परमिमे जनाः भोजयंति । अमित्यन्ये । पुंसीत्यपरे । इमे परस्परादयः शब्दाः कर्मव्यतिहारैकत्वविषयाः सर्वत्र पुंस्त्वोपादानाःअस्मादेव निपातनात् परादयः सर्वादयः कृतद्विर्वचनादयो विज्ञेयाः।

**भ्यत्याः**[2]॥१६२॥ भकारयकारादौ अकारादौ जसि शसि च सुपि परे अकारस्य आकारो भवति ॥ देवाभ्यां । देवाय । देवाः। देवान्। नित्यस्वादम्ङसिङस्सु "मो णोऽमः" इत्यादि । देवं। देवात् । देवस्य ।

**बहोसि स्भ्येत्**[3] ॥१६३॥ सकारभकारादौ बहुविषये ओसि च सुपि परे अकारस्य एकारो भवति ॥ देवेषु । सर्वेषां । देवेभ्यः । देवयोः ।

**ऐस् भिसोऽद्मशः**[4] ॥१६४॥ अकारात्परस्य सुपो भिसः स्थाने ऐसादेशो भवति अद्मशःदकारादेशो यो मकारस्तदनंतरादकारात् इदमादेशाद्मशः परस्य तु न भवति ॥ देवैः। अतिजरसैः। अद्मश इति किं ? अमीभिः। एभिः।

**ङसास्येयस्स्येनाद्यं**[1] ॥१६५॥ अकारात्परेषां ङस्-आ-असि-ए इत्येतेषां सुपां स्य-इन-आत्-य इत्येते यथाक्रममादेशा भवंति ॥ धनस्य । धनेन । धनात् । धनाय । अतिजरसस्य । अतिजरसेन । अतिजरसात् ।

**सर्वादेङर्यस्येः स्मिन्स्मात्स्मै**[2] ॥१६६॥ अकारांतस्य सर्वादेर्गणस्य संबंधिनां ङि असि ए इत्येतेषां सुपां यथाक्रमं स्मिन् स्मात् स्मै इत्येते आदेशा भवंति ॥ सर्वस्मिन् । सर्वस्मात् । सर्वस्मै । तस्मिन् । तस्मात् । तस्मै । परमसर्वस्मिन् । अतत्संबंधिनां—प्रियसर्वे । प्रियसर्वात्।प्रियसर्वाय।

**जशश्शिः**[3] ॥१६७॥ अकारांतस्य सर्वादेः संबंधिनो जशः स्थाने शि इत्यादेशो भवति ॥ सर्वे । विश्वे । त्ये । ते ।

**नेमार्धप्रथमचरमाल्पकतिपयतयस्य**[4] **वा** ॥ १६८ ॥ नेमादीनां तय इत्येतत्प्रत्ययांतानां चाकारांतानां संबंधिनो जशश्शिर्भवति वा ॥ नेमे, नेमाः। अर्धे, अर्धाः । प्रथमे, प्रथमाः । चरमे, चरमाः। अल्पे । अल्पाः। कतिपये, कतिपयाः। द्वितये, द्वितयाः । त्रितये, त्रितयाः । द्वये । द्वयाः। परमनेमे । परमनेमाः।

**द्वंद्वे**[5]॥१६९॥ द्वंद्वसमासे वर्तमानानामकारांतानां संबंधिनो जशः स्थाने शिर्भवति वा ॥ कतरकतमे । कतरकतमाः । परमकतरकतमे । परमकतरकतमाः ।

**न सर्वादिः**[6] ॥१७०॥ द्वंद्वसमासे सर्वादिः

१–(स्त्रीनपुंसकयोरुत्तरपदस्थाया विभक्तेरांभावो वक्तव्यः) २—सुपि च । ७ । ४ । १०२ प्रथमयोः पूर्वसवर्णः । ६ । १ । १०२ ॥ ३–बहुवचनं झल्येत् । ७ । ३ । १०३ ॥ ओसि च ॥ १०४ ॥ ४–अतो भिस ऐस् । ७ । १ । ९ । नेदमदसोरकोः । ७ । १ । ११ ।

१–टाङसिङसामिनात्स्याः । ७ । १ । १२ । २–सर्वनाम्नः स्मै ॥१४॥ ङसिङ्योः स्मात्स्मिनौ ॥१५॥ ३–जशः शिः ॥ १७ ॥ ४–प्रथमचरमतयाल्पार्द्धकतिपयनेमाश्च । १ । १ । ३३॥ ५–विभाषा जशि ॥ ३२ ॥ ६–द्वंद्वे च ॥३१॥



Ac. Gunratnasuri MS Jin Gun Aradhak Trust

सर्वादिर्न भवति ॥ पूर्वापराय । पूर्वापरात् । पूर्वापराणां । अधरोत्तराय । अधरोत्तरात् । अधरोत्तराणां । कतरकतमकाः।

**पूर्वावरं तृतीयायोगे**[1] ॥१७१॥ पूर्व अवर इत्येतौ सर्वादी तृतीयांतेन योगे संबंधे सर्वादी न भवतः ॥ मासेन पूर्वाय मासपूर्वाय । संवत्सरेणावराय । संवत्सरावराय । योगग्रहणं किं ? आगमिष्यति वटुः मासेन, पूर्वस्मै दीयतां कंबलः।

**नव पूर्वा वादौ**[2] ॥१७२॥ पूर्वादयो नव सर्वादयः अकारादाविकारादौ च सुपि परे सर्वादयो वा भवंति ॥ पूर्वे, पूर्वाः । पूर्वस्मात्, पूर्वात् । पूर्वस्मिन्, पूर्वे । परे, पराः । परस्मात्, परात् । परस्मिन्, परे ॥

**तीयं ङिति**[3] ॥१७३॥ तीयप्रत्ययांतं ङिति ङित्कार्ये कर्तव्ये सर्वादिर्वा भवति ॥ द्वितीयस्मै, द्वितीयाय । द्वितीयस्यै, द्वितीयायै । तृतीयस्मात्, तृतीयात् । तृतीयस्याः, तृतीयायाः ।

**विदिक् च**[4] ॥१७४॥ विदिक्वाची सर्वादिः सर्वादिर्वा भवति ॥ उत्तरपूर्वस्यै, उत्तरपूर्वायै । उत्तरपूर्वासां । उत्तरपूर्वाणां । चेन वानुकृष्यते ।

**ङस्याद्यस्य**[5] ॥१७५॥ अवर्णांतानां सर्वादीनां तत्संबंधिनि याडादौ सुपि परे ङस् इत्यादेशो भवति ॥ सर्वस्यै । सर्वस्याः । सर्वस्यां । परमसर्वस्यै । तत्संबंधिविज्ञानादिह न भवति । अतिसर्वायै ।

**सामामः**[6] ॥१७६॥ अवर्णांतानां सर्वादीनां संबंधिन आमः षष्ठीबहुवचनस्य स्थाने साम् भवति ॥ सर्वेषां । सर्वासां । तेषां । तासां । परमसर्वेषां । परमसर्वासां । अतत्संबंधिनः-प्रियसर्वाणां॥

**युष्मदस्मद्भ्यामाकं**[1] ॥१७७॥ युष्मद् अस्मद् इत्येताभ्यां परस्य आमः तत्संबंधिनोऽन्यसंबंधिनो वा स्थाने आकमित्यादेशो भवति । युष्माकं । अस्माकं । प्रिययुष्माकं । प्रियास्माकं । आकमित्याकारो ण्यंतार्थः—युष्मानाचक्षाणानां युष्माकं । अस्माकं । अन्यथा—युष्मकं, अस्मकमिति स्यात् ॥

**ङश्शोभ्यसोऽश्नाभ्यं**[2] ॥ १७८ ॥ युष्मदस्मद्भ्यामुत्तरेषां तत्संबंधिनामन्यसंबंधिनां वा ङस् शस् भ्यस् इत्येतेषां सुपामश् न अभ्यं च यथाक्रममादेशा भवंति ॥ तव । मम । अतितव । अतिमम । युष्मान्, अस्मान् । प्रिययुष्मान् । प्रियास्मान् । युष्मभ्यं । अस्मभ्यं । प्रिययुष्मभ्यं । प्रियास्मभ्यं ।

**भ्योऽसोऽद्**[3] ॥ १७९ ॥ युष्मदस्मद्भ्यामुत्तरस्य तत्संबंधिनोऽन्यसंबंधिनो वा अस्सहचरितस्य भ्यसः पंचमीबहुवचनस्य, असश्च पंचम्येकवचनस्य अदित्यादेशो भवति॥ त्वत्, त्वद् । मत्, मद् । अतित्वत् । अतित्वद् । अतिमद्, अतिमत् । युष्मद् । अस्मद् । अतियुष्मद् । अत्यस्मद् ।

**ङेस्सुटोऽम्**[4] ॥ १८० ॥ युष्मदस्मद्भ्यां परस्य तत्संबंधिनोऽन्यसंबंधिनो वा ङे इत्येतस्य सुटश्च सुपः स्थाने अमित्यादेशो भवति ॥ तुभ्यं । मह्यं । अतितुभ्यं । अतिमह्यं । त्वं । अहं । युवां । आवां । यूयं । वयं । त्वां । मां । युवां । आवां ।

१--तृतीयासमासे । १ । १ । ३० ॥
२-पूर्वापरावरदक्षिणोत्तरापराधराणि व्यवस्थायामसंज्ञायां॥ ॥३४॥ स्वमज्ञातिधनाख्यायां ॥३५॥ अंतरं बहिर्योगोपसंव्यानयोः ॥३६॥ पूर्वादिभ्यो नवभ्यो वा । ७ । १ । १६
३-(तीयस्य ङित्सु वा) ४--विभाषा दिक्समासे बहुव्रीहौ । १ । १ । २८ ॥ ५--सर्वनाम्नः स्याड्ढ्रस्वश्च । ७ । ३ । ११४ । ६--आमि सर्वनाम्नः सुट् ॥ ७ । १ । ५२ ।

१ । सामाकं । ७ । १ ३३ ॥ २- युष्मदस्मद्भ्यां ङसोऽश् । ७ । १ । २७ । शसो नः । ७ । १ । २० । भ्यसोऽभ्यं। ३० ॥ ३-पंचम्या अत् ॥ ३१ ॥एकवचनस्य च । ३२ ॥ ४-ङेसुटोरम् । २८ ॥

Ac. Gunratnasuri MS Jin Gun Aradhak Trust

**दोर्लुक्**[1] ॥ १८१ ॥ दकारांतयोर्युष्मदस्मदोस्तत्संबंधिन्यन्यसंबंधिनि वा सुपि परे लुग्भवति ॥ युष्मभ्यं । अस्मभ्यं । त्वद् । मद् । युष्मद् । अस्मद् । युष्माकं । अस्माकं । अतियुष्माकं । अत्यस्माकं । दोरिति किं ? मोरुत्तरो विकल्पः ।

**वा**[2] ॥ १८२ ॥ मकारांतयोर्युष्मदस्मदोस्तत्संबंधिन्यन्यसंबंधिनि वा सुपि परे वा लुग्भवति । युष्मानाचक्षाणेभ्यः युष्मभ्यं—युषभ्यं । अस्मभ्यं । असभ्यं । युष्मद् । युषद् । अस्मद् । असद् । युष्माकं । युषाकं । अस्माकं । असाकं ।

**अमौद्धल्याः**[3] ॥१८३ ॥ युष्मदस्मदोस्तत्संबंधिन्यन्यसंबंधिनि वा अमि द्वितीयैकवचने औकारयोर्हलादौ च सुपि परे आकारो भवति। त्वां।मां।अतित्वां । अतिमां।युवां । आवां ।युष्मान्। अस्मान् । युवांभ्यां । आवाभ्यां । युष्माभिः। अस्माभिः । युष्मासु । अस्मासु ।

**यौसि यः**[4] ॥१८४॥ युष्मदस्मदोस्तत्संबंधिष्वन्यसंबंधिषु वा इ आ ओस् इत्येतेषु सुप्सु परतः यकारो भवति ॥ त्वयि । मयि । त्वया । मया।युवयोः । आवयोः । प्रियत्वयि । प्रियमयि

**मंतस्य युवावौ द्वयोः**[5] ॥१८५॥ द्वित्वविशिष्टेऽर्थे वर्तमानयोर्युस्मदस्मदोर्मकारावसानो योऽवयवस्तस्य तत्संबंधिन्यन्यसंबंधिनि वा सुपि परे यथासंख्यं युव आव इत्यादेशौ भवतः । युवां । आवां । युवाभ्यां । आवाभ्यां । युवयोः । आवयोः । अतिक्रांतौ युवां—अतियुवां । अत्यावां। अतिक्रांतं युवां-अतियुवां,अत्यावां । अतिक्रांतान् युवां,अतियुवान्, अत्यावान् । एवमतियुवया । अत्यावया । अतियुवाभ्यां । अत्यावाभ्यां । अतियुवाभिः । अत्यावाभिः । इत्यादि नेयं । सुजसूङेङस्सु परत्वात् त्वाहादयः । मंतस्येति किं ? सर्वस्य मा भूत् ॥ युवकयोः । युवकाभ्यां ।

**त्वमौ प्रत्ययोत्तरपदे चैकस्मिन्**[1]॥१८६॥ एकत्वविशिष्टेऽर्थे वर्तमानयोर्युष्मदस्मदोर्मपर्यंतस्य तत्संबंधिन्यन्यसंबंधिनि वा सुपि प्रत्ययोत्तरपदयोश्च परतो यथाक्रमं त्व म इत्यादेशौ भवतः । त्वां।मां।त्वया।मया।त्वद्।मद्।त्वयि।मयि।अतिक्रांतौ त्वां अतित्वां।अतिमां। अतिक्रांतं त्वां अतित्वां । अतिमां । अतिक्रांतौ त्वां अतित्वां । अतिमां । अतित्वान् । अतिमान् । अतित्वया । अतिमया । अतित्वाभ्यां । अतिमाभ्यां । एवं नेयं । त्वदीयः । मदीयः । त्वद्यति । मद्यति । त्वत्कृतं । मत्कृतं । त्वत्प्रधानं । मत्प्रधानं । त्वत्पुत्रः । मत्पुत्रः । प्रत्ययोत्तरपदे चेति किं ? अधियुष्मद् । अध्यस्मद् । एकस्मिन्निति किं ? युष्माकं । अस्माकं । युष्मदस्माद्विशेषणादिह न भवति ॥ युष्मानतिक्रांतमतियुष्माम् । अत्यस्माम् । अतियुष्मया । अत्यस्मया ।

**त्वाहौ सौ**[2] ॥ १८७॥ युष्मदस्मदोस्तत्संबंधिन्यन्यसंबंधिनि वा सौ परे यथासंख्यं त्व अहं इत्यादेशौ भवतः ॥ त्वं । अहं । अतिक्रांतस्त्वां अतित्वं । अत्यहं । अतिक्रांतो युवां अतित्वं । अत्यहं । अतिक्रांतो युष्मान्—अतित्वं । अत्यहं ।

**यूयवयौ जसि**[3] ॥१८८॥ युस्मदस्मदोस्तत्संबंधिन्यन्यसंबंधिनि वा जसि परे यथासंख्यं यूय वय इत्यादेशौ भवतः ॥ यूयं । वयं । प्रियस्त्वं येषां ते प्रिययूयं । प्रियवयं । प्रियौ युवां येषां ते प्रिययूयं । प्रियवयं ।

१--२शेषे लोपः । ७ । २ । ९० । ३-द्वितीयायां च । ७ । २ । ८७ । प्रथमायाश्च द्विवचने भाषायां । ७ । ४। ८८ । युष्मदस्मदोरनादेशे ॥ ८६ । ४-योऽचि॥ ८९ ।५–मपर्यंतस्य । ७ । २ । ९ ॥ युवावौ द्विवचने॥ ९२ ॥

१ ।त्वमावेकवचने । ७ । २ । ९७ । प्रत्ययोत्तरपदयोश्च ॥ ९८ ॥ २—त्वाहौ सौ । ७ । २ । ९४ । ३—यूयवयौ जसि । ७ । २ । ९३ ।

Ac. Gunratnasuri MS Jin Gun Aradhak Trust

**तुभ्यमह्यौ ङयि**[1] ॥१८९॥ युष्मदस्मदोस्तत्संबंधिन्यन्यसंबंधिनि वा ङयि परे यथासंख्यं तुभ्य, मह्य इत्यादेशौ भवतः ॥ तुभ्यं । मह्यं । प्रियस्त्वं यस्य तस्मै प्रियतुभ्यं । प्रियमह्यं । प्रियौ युवां प्रिया यूयं वा यस्य तस्मै प्रियतुभ्यं।प्रियमह्यं।

**तवममौ ङसि**[2] ॥१९०॥ युष्मदस्मदोस्तत्संबंधिन्यन्यसंबंधिनि वा ङसि परे यथासंख्यं तव मम इत्यादेशौ भवतः ॥ तव । मम । प्रियस्त्वं यस्य तस्य प्रियतव । प्रियमम । प्रियौ युवां यस्य तस्य प्रियतव । प्रियमम । प्रिया यूयं यस्य तस्य प्रियतव । प्रियमम ।

**पदाद्वाक्यस्य वस्नसौ युग्विभक्तेः**[3] ॥ १९१ ॥ वाक्यस्यावयवात्पदात्परयोस्तद्वाक्यस्यैवावयवयोः युष्मदस्मदोर्युग्विभक्त्यंतयोर्यथासंख्यं वस् नस् इत्यादेशौ भवतः ॥ धर्मो वो रक्षतु । धर्मो नो रक्षतु।दानं वो दीयते।दानं नो दीयते । शीलं वः स्वं । शीलं नः स्वं । पदादिति किं ? युष्मान् धर्मो रक्षतु । अस्मान् धर्मो रक्षतु। वाक्यस्येति किं ? ओदनं पचत युष्माकं भविष्यति । अस्माकं भविष्यति ॥ वाक्यस्येति षष्ठी पदावयवयोर्माभूत् । इति युष्मदुपाध्यायो ब्रूते । अत्यस्मान् पश्यंति ॥

**वांनावौ द्वित्वे**[4] ॥१९२॥ वाक्यस्यावयवात्पदात्परयोस्तद्वाक्यस्यैवावयवयोर्युष्मदस्मदोर्द्वित्वविषययोर्युग्विभक्त्यंतयोर्यथासंख्यं वां नौ इत्यादेशौ भवतः ॥ धर्मो वां रक्षतु । धर्मो नौ रक्षतु । दानं वां दीयते । दानं नौ दीयते । शीलं वां स्वं । शीलं नौ स्वं ।

---

१-तुभ्यमह्यौ ङयि॥९५॥२—तवममौ ङसि ॥९६॥

३—पदात् । ८ । १ । १७ । बहुवचनस्य वस्नसौ । ८ । १ । २१ ॥ ४-युष्मदस्मदोः षष्ठीचतुर्थीद्वितियास्थयोर्वांनावौ ॥ ८ । १ । २० ।

**तेमयावेकत्वे**[1] ॥१९३॥ वाक्यस्यावयवात्पदात्परयोस्तद्वाक्यस्यैवावयवयोर्युष्मदस्मदोरेकत्वविषये युग्विभक्त्यंतयोर्यथासंख्यं ते मे इत्यादेशौ भवतः ॥ दानं ते दीयते । दानं मे दीयते । शीलं ते स्वं । शीलं मे स्वं ।

**त्वामौ द्वितीयायाः**[2] ॥१९४॥ वाक्यस्यावयवात्पदात्परयोस्तद्वाक्यस्यैवावयवयोर्युष्मदस्मदोर्द्वितीयैकवचनांतयोर्यथासंख्यं त्वा मा इत्यादेशौ भवतः। धर्मस्त्वा रक्षतु । धर्मो मा रक्षतु ।

**नेवामंत्र्यं पूर्वं**[3] ॥ १९५ ॥ यदा (था) मंत्र्यते संबोध्यते तत्पदं युष्मदस्मद्भ्यां पूर्वं नेवाऽसदिव भवति ॥ भो देवदत्त युष्मान् रक्षतु धर्मः। भो देवदत्त अस्मान् रक्षतु धर्मः। देवदत्त युवाभ्यां दानं दीयते । देवदत्त आवाभ्यां दानं दीयते । देवदत्त तव शीलं स्वं । देवदत्त मम शीलं स्वं ।

**जस्विशेष्यं वाऽऽमंत्र्ये**[4]॥ १९६ ॥ जसंतमामंत्र्यपदं विशेष्यं युष्मदस्मद्भ्यां पूर्वं तद्विशेषणे आमंत्र्यपदे परे नेव भवति वा।।नेत्येतस्यापवादः। देवाः शरण्याः युष्मानथो शरणं प्रपद्ये । देवाः शरण्याः वोऽथो शरणं प्रपद्ये । देवाः शरण्या अस्मानथो रक्षतु। देवाः शरण्याः नोऽथो रक्षतु ।

**न**[5] ॥१९७॥ आमंत्र्यपदं विशेष्यं युष्मदस्मद्भ्यां पूर्वमामंत्र्यपदे तद्विशेषणे परे न नेवाऽविद्यमानवन्न भवति । साधू सुविहितौ वां शरण्यं प्रपद्ये । साधो सुविहित त्वा शरण्यं प्रपद्ये । साधु सुविहितौ नौ रक्षतं । साधो सुविहित मा रक्ष ।

---

१—तेमयावेकवचनस्य । ८ । १ । २२ ।

२—त्वामौ द्वितीयायाः । ८ । १ । २३ ।

३—आमंत्रितं पूर्वमविद्यमानवत् । ८ । १ । ७३ ॥

४—विभाषितं विशेषवचनं ।८। १ । ७४ ॥

५-नामंत्रिते समानाधिकरणे सामान्यवचनं ॥७२॥

Ac. Gunratnasuri MS Jin Gun Aradhak Trust

**पादाद्योः** ॥१९८॥ पदात्परयोर्युष्मदस्मदोर्यदुक्तं वस्नसादि तत्पादस्यादिभूतयोर्न भवति।

वीरो विश्वेश्वरो देवो युष्माकं कुलदेवता ।
स एव नाथो भगवानस्माकं पापनाशनः॥१॥

**मनसीक्षार्थैः** ॥ १९९ ॥ ईक्षा दर्शनं तदर्थैर्धातुभिः सह तद्वद्यद्वाक्यं तस्य पदात्परयोर्युष्मदस्मदोर्यदुक्तं वस्नसादि तन्न भवति सा चेदीक्षा मनसि मनोविषया भवति ॥जनो युष्मान्समीक्ष्य गतः ।जनस्त्वामुपेक्षते।दानं युवाभ्यां देयमालोक्यागतः।जनस्तत्र कार्यमालोचयति । एवमस्मदः। मनसीति किं ? जनो वः पश्यति । जनो नः पश्यति चक्षुषेत्यर्थः ।

**चवाऽहहैवयोगे** ॥२००॥ च वा अह ह एव इत्येतैर्योगे संबंधे पदात्परयोर्युष्मदस्मदोर्यदुक्तं वस्नसादि तन्न भवति ॥ जनो युष्मांश्च जनो युष्मान्वा, जनो युष्मान्नह, जनो युष्मान्ह, जनो युष्मान्नेव पश्यति । ज्ञानं युष्मभ्यं च, दीयते । शीलं युष्माकं च स्वं । जनो युवां च जनो त्वां च पश्यति । एवमस्मदः । योगे इति किं ? ज्ञानं च शीलं च वः स्वं ॥

**नित्यमन्वादेशे** ॥२०१॥ कथितस्यानुकथनमन्वादेशः। तद्विषये पदात्परयोर्युष्मदस्मदोर्यदुक्तं वस्नसादि तन्नित्यं भवति ॥ यूयं विनीतास्तद्वो गुरवः, वयं विनीतास्तन्नो गुरवः, युवां शीलवंतौ तद्वां गुरवः, आवां शीलवंतौ तन्नो गुरवः मानयंति । त्वं शीलवानथो क्षमाश्रमणैः तत्ते ज्ञानं दीयते । अहं शीलवान् अथो क्षमाश्रमणैः तन्मे ज्ञानं दीयते । धनवांस्त्वमथो त्वा लोकः, धनवानहमथो मा लोकः, मानयति। अन्वादेशे नित्यवचनादन्यत्र विकल्पः। धर्मो वः, धर्मो युष्मान्,धर्मो नः,धर्मोऽस्मान् रक्षत्वित्यादि।

**पदात्प्रथमया वा**[1] ॥ २०२ ॥ पदात्परं यत्प्रथमांतं पदं तस्मात्परयोर्युष्मदस्मदोरन्वादेशे यदुक्तं वस्नसादि तद् वा भवति ॥ यूयं विनीतास्तद् गुरवो वः,यूयं विनीतास्तद् गुरवो युष्मान्, वयं विनीतास्तद् गुरवो नः,वयं विनीतास्तद्गुरवोऽस्मान् ,युवां सुशीलौ तद् गुरवो वां,तद्गुरवो युवां, आवां सुशीलौ तद् गुरवो नौ,तद् गुरव आवां मानयंति । अथो क्षमा तत् श्रमणास्ते, अथो क्षमा तत् श्रमणास्तुभ्यं, अथो क्षमा तत् श्रमणा मे, अथो क्षमा तत् श्रमणा मह्यं, ज्ञानं प्रयच्छंति । धनवांस्त्वं तल्लोकस्त्वा, तल्लोकस्त्वां धनवानहं तल्लोको मा, तल्लोको मां मानयति ॥

**त्यदां द्वितीयाटौस्येनदेतदः**[1] ॥ २०३ ॥ एतदित्येतस्य त्यदादीनां संबंधिनि द्वितीयायां टायामोसि च सुपि परे अन्वादेशे एनदित्यादेशो भवति॥ अधीतमेतत्सूत्रमथो एनन्नो व्याचद्ध्वं ॥ एतमावश्यकमध्यापय, अथो एनं यथाक्रमं सूत्रं । सुशीलौ एतौ अथो एनौ गुरवो मानयंति । सुस्थितास्सुपराक्रांता एते तद्देवा अप्येनान्नमस्यंति- एतेन रात्रिरधीता अथो एनेनाहरप्यधीतं । एतयोः शोभनं शीलं अथो एनयोर्महतीयं कीर्तिः। एनच्छ्रितकः इत्यत्र अर्थात्प्रकरणाद्वापेक्ष्य निर्ज्ञाने इदमुदाहरणं । त्यदामिति किं ? एतदं संगृहाण अथो एतदमध्यापय । संज्ञा, न त्यदादिः । सुब्विशेषणं किं ? एतं संगृहाण प्रियैतदमध्यापय। अन्वादेशे इति किं ? देवदत्तमध्यापय । एतं च गुरुदत्तं । न पश्चात्कथनमात्रमन्वादेशः ।

**इदमः**[2]॥ २०४ इदमित्येतस्य त्यदादीनां संबंधिनि द्वितीयायां टायामोसि च सुपि परे अन्वादेशे एनद्भवति ॥ अधीतामिदं सूत्रमथो एनन्नो व्याचद्ध्वं । इदमावश्यकमध्यापय, अथो

१-सपूर्वायाः प्रथमाया विभाषा ॥ २६ ॥

१-२-द्वितीयाटौस्स्वेनः । २ । ४ । ३४ ।

Ac. Gunratnasuri MS Jin Gun Aradhak Trust

एनं यथाक्रमं सूत्रं । सुशीलाविमौ अथो एनौ गुरवो मानयंति । सुस्थिताः सुपराक्रांता इमे अथो देवा अप्येनान्नमस्यंति।अनेन रात्रिरधीता अथो एनेनाहरप्यधीतं । अनयोः शोभनं शीलं अथो एनयोर्महतीयं कीर्तिः ॥ योगविभाग उत्तरार्थः ।

**स्भ्येऽश्**[1] ॥ २०५ ॥ इदमः सकारभकारयकारादिके त्यदादिसंबंधिनि सुपि परे अन्वादेशे अश् इत्ययमादेशो भवति ॥ शैक्षको ऽयकमध्येता अथोऽस्मै साधु दीयतां सूत्रं । शैक्षकाविमकावध्येतारौ अथो आभ्यां साधु दीयतां सूत्रं । बालिकेयं याचते अथो अस्यै दीयतां मोदकः । स्भ्ये इति किं ? इमे । इमके। परत्वान्मत्वादि भवति ॥ अन्वादेशविधिः सुपा प्रकृतिं विशेष्य विधीयत इति । परमेतं । परमेनं । परमेमकस्मै । इत्येनदादि न भवति ॥ शकारः सर्वादेशार्थः । सककारार्थं वचनं ।

**अकः**[2] ॥ २०६ ॥ इदमः ककाररहितस्य सकारभकारयकारादिके त्यदादिसंबंधिनि सुपि परे अश् भवति ॥ अस्मै । अस्मात् । अस्य । एषां। आसां। अस्मिन् । एषु । आसु । आभ्यां एभिः । एभ्यः । आभ्यः । अस्यै । अस्याः । अस्यां । अक इति किं ? इमकस्मै । इमकाभ्यां। इमकस्यै । त्यदादिसंबंधिविज्ञानादिह न भवति॥ प्रियेदंसु । प्रियेदंभ्यां । इह तु भवति ॥ परमास्मै । परमाभ्यां ।

**टौस्यनः**[3] ॥ २०७ ॥ इदमः ककाररहितस्य त्यदादिसंबंधिनि टायामोसि च सुपि अन इत्यादेशो भवति ॥ अनेन । अनया । अनयोः । अनयोः । परमानेन । परमानयोः ।

१-इदमोऽन्वादेशेऽशनुदात्तस्तृतीयादौ।२।४।३२॥ २--हलि लोपः । ७ । २ । ११३ । ३ । अनाप्यकः । ७। २।११२। ३-द्वितीयाटौस्स्वेनः । २ । ४ । ३४ ॥

त्यदादिसंबंधिविज्ञानादिह न भवति ॥ प्रियेदमा। अतीदमा । अक इति किं ? इमकेन ।

**दो मः**[1] ॥ २०८ ॥ इदमस्त्यदादिसंबंधिनि सुपि परे दकारस्य मकारो भवति ॥ इमौ । इमे । इमं । इमौ । इमान् । इमकौ । परमेमौ । त्यदादिसंबंधिविज्ञानादिह न भवति। प्रियेदमौ ॥

**सौ**[2] ॥ २०९ ॥ इदमस्त्यदादिसंबंधिनि सौ प्रथमैकवचने परे मकारो भवति ॥ अत्वापवादः । अयं । परमायं । इयं । परमेयं ।

**पुंसीदोऽय्**[3] ॥ २१० ॥ पुंसि वर्तमानस्येदमः त्यदादिसंबंधिनि सौ इद्रूपस्याय् भवति॥ इयोऽपवादः । अयं । परमायं देवदत्तः । त्यदादिसंबंधिविज्ञानादिह न भवति ॥ प्रियेदं देवदत्तः ।

**इय्**[4] ॥ २११ ॥ इदमस्त्यदादिसंबंधिनि सौ इद्रूपस्य इय् भवति ॥ इयं परमेयं । पारिशेष्यात्स्त्रियामयमादेशः।नपि तु नित्यत्वात्प्रथममेव श्लुक् भवति ॥ इदं कुंडलं ।

**औस्सुलुक् चादसोऽनोः**[5] ॥ २१२ ॥ अनुकारस्यादसः सौ औकारो भवति । अत्वापवादः । तस्य च सोर्लुक् भवति॥ असौ । असकौ। हे असौ । हे असकौ स्त्री पुमान्वा । अनोरिति किं ? असुकः । साविति किं ? अदः। अमू ।

**वाऽकोऽस्योः**[6] ॥ २१३ ॥ अदसो योऽक् तस्याकारस्य सौ उकारो वा भवति ॥ असुकः। असुकौ । हे असुक । हे असुकौ ।

**दस्सः** ॥२१४॥ अदसो दकारस्य सौ सकारो भवति ॥ असौ । असकौ ।

१-दश्च । ७ । २ । १०९॥ २--इदमो मः । ७ । २ । १०८ ॥ ३-इदोऽय् पुंसि । ७ । २ । १११ । ४-यः सौ ।७।२।११० ॥ ५-अदस औ सुलोपश्च।७।१।१०७ । ६-औत्वप्रतिषेधः साकच्कस्य वा वक्तव्यः सादुत्वं च इति वार्तिकं ।

Ac. Gunratnasuri MS Jin Gun Aradhak Trust

**तोऽष्टानां**[1] ॥ २१५ ॥ त्यदादीनामष्टानां तकारस्य त्यदादिसंबंधिनि सौ सकारो भवति ॥ स्यः । स्या । स्यकः । सः । सा । सकः । एषः । एषा । एषकः । परमस्यः । परमसः । परमैषः । साविति किं ? त्यद् । त्यौ । त्यदादिसंबंधिविज्ञानादिह न भवति । प्रियैतद् ।

**सौ चात्**[2] ॥ २१६ ॥ त्यदादीनामष्टानां त्यदादिसंबंधिनि सुपि सौ च परे अकारो भवति ॥ ततः । तत्र । तदा । यतः । यत्र । यदा । स्यः । इमे । एते । एकः । द्वौ । त्यकौ । परमत्यकौ । त्यदादिसंबंधिविज्ञानादिह न भवति । प्रियत्यदौ ।

**किमः कः**[3] ॥२१७॥ किमः त्यदादिसंबंधिनि सुपि सौ च परे ककारादेशो भवति ॥ कदा । कः । कौ । के । परमकौ । त्यदादिसंबंधिविज्ञानादिह न भवति । प्रियकिमौ । सौ चेति किं ? कार्कि । नित्यत्वात्सोश्श्लुक् । न च लक्षणांतरबाधनेनानित्यत्वं ।

**भेऽपोऽद्**[4] ॥ २१८ ॥ अपः भकारादौ तत्संबंधिन्यन्यसंबंधिनि वा सुपि परे अदित्ययमादेशो भवति ॥ अद्भिः । अद्भ्यः । स्वाद्भिः । अत्यद्भिः । सुपीति किं ? अब्भिक्षुः ।

**वाष्टन आः**[5] ॥ २१९ ॥ अष्टन् इत्येतस्य तत्संबंधिन्यन्यसंबंधिनि वा सुपि परे आकारो वा भवति । अष्टाभिः । अष्टभिः । प्रियाष्टाः । आकारांतः—प्रियाष्टाः । नांतः—प्रियाष्टौ । प्रियाष्टानौ । प्रियाष्टाभ्यः । प्रियाष्टभ्यः । सुपीति किं ? अष्टसूत्री ।

१—तदोः सः सावनन्त्ययोः । ७ । २ । १०६ । २—त्यदादीनामः । ७ । २ । १०२ । ३—किमः कः । ७ । २ । १०३ । ४—अपो भि । ७ । ४ । ७८ । ५—अष्टन आ विभक्तौ । ७ । २ । ८४ ।

**रायः स्भिः**[1] ॥ २२० ॥ रै इत्येतस्य तत्संबंधिन्यन्यसंबंधिनि वा सकारादौ भकारादौ च सुपि परे आकारो भवति ॥ राः । राभ्यां । अतिराभ्यां कुलाभ्यां ॥ सुपीति किं ? रैसूत्रं ।

**त्रिचतुरः**[2] **स्त्रियां तिसृचतसृ** ॥ २२१ ॥ त्रिचतुरोः स्त्रीलिंगेऽर्थे वर्तमानयोः तत्संबंधिन्यन्यसंबंधिनि वा सुपि यथासंख्यं तिसृ, चतसृ इत्येतावादेशौ भवतः । तिस्रः, चतस्रः तिष्ठंति पश्य वा । तिसृभिः । चतसृभिः । प्रियतिसा । प्रियचतसा पुमान् । प्रियातिसृणि । प्रियचतसृणि । स्त्रियामिति किं ? त्रयः । चत्वारः । प्रियाः त्रयोऽस्याः प्रियत्रिः ।

**रोऽनपोऽच्युः**[3] ॥ २२२ ॥ तिसृ, चतसृ इत्येतयोः ऋकारस्यानपुंसकस्य तत्संबंधिन्यन्यसंबंधिनि वा अजादौ सुपि परे रेफो भवति ॥ तिस्रः । चतस्रः । प्रियतिस्रः । प्रियचतस्रः आगतं । प्रियतिस्रः स्वं । प्रियचतस्रः । अनप इति किं ? प्रियतिसृणि । प्रियचतसृणि । शैस्यक् इत्यादेरयमपवादः ।

**ङ्यौटि नीचो वा** ॥२२३॥ तिसृचतस्रोरुपसर्जनयोः ऋकारस्य ङौ औटि च सुपि परे रेफो वा भवति ॥ प्रियतिस्रौ । प्रियचतस्रौ । प्रियतिसरौ । प्रियचतसरौ । प्रियतिस्रः । प्रियचतस्रः । प्रियतिसरः । प्रियचतसरः । प्रियतिस्रं । प्रियचतस्रं । प्रियतिसरं । प्रियचतसरं । प्रियतिस्रौ । प्रियचतस्रौ । प्रियतिसरौ । प्रियचतसरौ । प्रियतिस्रि । प्रियचतस्रि । प्रियतिसरि । प्रियचतसरि । नीच इति किं ? तिस्रः । परमतिस्रः । चतस्रः । परमचतस्रः । अनप इति किं ? प्रियतिसृणी । प्रियचतसृणी । प्रियतिसृणि । प्रियचतसृणि । अचीति किं ? प्रियतिसृ कुलं पश्य ।

इति द्वितीयः पादः ।

१—रायो हलि । ७ । २ । ८७ । २—त्रिचतुरोः स्त्रियां तिसृचतसृ । ७ । २ । ९९ ।
३—अचि र ऋतः । ७ । २ । १०० ।

Ac. Gunratnasuri MS Jin Gun Aradhak Trust

# अथ तृतीयः पादः ।

**क्रोष्टोरृ**[1] ॥ १ ॥ स्त्रियामिति वर्तते । क्रोष्टुशब्दस्य स्त्रियां वर्तमानस्य ऋकारादेशो भवति ॥ क्रोष्ट्री । क्रोष्ट्र्या । क्रोष्ट्री भक्तिः ।

**गुरूपोत्तमस्यानार्षेऽपत्येऽणिञः ष्यङ्**[2] ॥२॥ अनार्षेऽपत्ये स्त्रियां यौ विहितावणिञौ प्रत्ययौ तदंतस्य शब्दस्य गुरूपोत्तमस्य ष्यङादेशो भवति । उत्तमशब्दोऽव्युत्पन्नस्त्रिप्रभृतीनामंत्यमाह । करीषगंधेरपत्यं स्त्री कारीषगंध्या । कौमुदगंध्या । दैवदत्त्या । औदमेध्या । वाराह्या । शातलोम्या । ङित्वादणिञोरेवादेशः । गुरूपोत्तमस्येति किं ? औपगवी । दाक्षी । षात्सी । अनार्ष इति किं ? वासिष्ठी । अपत्य इति किं ? अहिच्छत्रे जाता आहिच्छत्री । षकारो "न्यक्ष्यत्" इति विशेषणार्थः ।

**गोत्रावयवे वृद्धे**[3] ॥ ३ ॥ प्रकाशैकादिपुरुषाभिधानस्तदपत्यसंतानो गोत्रं।अप्रधानं गोत्रं गोत्रावयवः । स्त्रियामनार्षे वृद्धसंज्ञके गोत्रावयवेऽपत्ये विहितयोरणिञोः ष्यङ् भवति ॥ पुणिकस्यापत्यं वृद्धं स्त्री पौणिक्या । भौणिक्या। गौप्त्या। मौखर्या । वृद्ध इति किं ? अनंतरापत्ये न भवति । पौणिकी । भौणिकी । अनार्ष इति किं ? गौतमी । अगुरूपोत्तमार्थं वचनं ।

१स्त्रियां च । ७ । ७६ ।२-अणिञोरनार्षयोर्गुरूपोत्तमयोः ष्यङ् गोत्रे । ४ । १ । ७८ । ३-गौत्रावयवात् ॥ ४ । १ । ७९ ।

**रूढादिभ्यः**[1] ॥ ४ ॥ रूढ इत्येवमादिभ्योऽपत्यमात्रे विहितयोरणिञोः स्त्रियां ष्यङ् भवति॥ रूढस्यापत्यं स्त्री इञः—रौढ्या । क्रौड्या । आपिशल्या । चोपयतोऽपत्यमणः—चौपयत्या । चैटयत्या । शैकयत्या ।

**देवयज्ञशुचिवृक्षसत्यमुग्रकंठेविद्धाद्वा**[2] ॥५॥ देवयज्ञादिभ्यश्चतुर्भ्यः इञः स्त्रियामपत्ये ष्यङ् वा भवति ॥ दैवयज्ञ्या । दैवयज्ञी । शौचिवृक्ष्या । शौचिवृक्षी । सात्यमुग्र्या । सात्यमुग्री । कांठेविध्या । कांठेविद्धी ।

**सूत्याभोज्ये युवतिक्षत्रिये**[3] ॥ ६ ॥ सूत्याभोज्येति शब्दौ यथाक्रमं युवतौ क्षत्रियायां च स्त्रियां ष्यङंतौ निपात्येते ॥ सूत्या प्राप्तयौवना स्त्री । सूतान्या । भोज्या भोजवंशजा क्षत्रिय । भोजान्या ।

**नृदुगिदंचोऽस्वस्रादेर्ङी**[4] ॥ ७ ॥ नकारांतात् अस्वस्राद्यवयवऋकारांतात् उगिदंतात् अंचत्यंताच्च स्त्रियां वर्तमानात् ङीप्रत्ययो भवति ॥ न—राज्ञी । छत्रिणी । ऋत्—कर्त्री—हर्त्री । उगित्—भवती । पचती । आतिपुंसी । निर्गोमती । महती।

१—क्रौड्यादिभ्यश्च । ४ । १ । ८० ।
२-दैवयज्ञिशौचिवृक्षिसात्यमुग्रिकांठेविद्धिभ्योऽन्यतरस्यां । ८१। ३-सूतयुवत्यां भोजक्षत्रिये, इति वार्तिकं । ४-ऋन्नेभ्यो ङीप् । ४ । १ । ५ । उगितश्च । ४ । १ । ६ ।अंचतेश्चोपसंख्यानं इति वार्तिकं । न षट्स्वस्रादिभ्यः ।४।१।१०

Ac. Gunratnasuri MS Jin Gun Aradhak Trust

अंचेः—प्राची । प्रतीची । उदीची । अस्वस्त्रादेरिति किं ? स्वसा । अतिस्वसा । दुहिता।माता।

**न हषोऽनुर्वनः**[1] ॥ ८ ॥ हषः परो यो वन्प्रत्ययस्ततः स्त्रियां ङीप्रत्ययो न भवति न चेत्स हष् ऋवर्णादेशावयवः । यज्वा । अतियज्वा । राजयुद्ध्वा स्त्री । हष इति किं ? धीवरी । राजकृत्वरी । अनुरिति किं ? शर्वरी ।

**पादो वा**[2] ॥९॥ पाद इत्येतदंताच्छब्दरूपात् स्त्रियां ङीप्रत्ययो वा भवति ॥ द्विपदी । द्विपात् । त्रिपदी । त्रिपाद् (त्)

**कुंभपद्यादौ**[3] ॥ १० ॥ कुंभपदीत्येवमादौ पाच्छब्दांतात् स्त्रियां नित्यं ङीप्रत्ययो भवति ॥ कुंभपदी । कलशपदी । शतपदी ।

**ऋच्याड्**[4] ॥११॥ पादांताच्छब्दात् ऋचि स्त्रियामाड् प्रत्ययो भवति । त्रिपदा । चतुष्पदा ऋक् । परत्वादंत्याजादि लुचं बाधित्वा पद्भावः । डकार उत्तरार्थः। अन्यत्र द्विपदी देवदत्ता ।

**मन्नन्बहुव्रीहेर्न च**[5] ॥१२॥ मन्नंताच्छब्दरूपात् अन्नंताच्च बहुव्रीहेः स्त्रियामाड् भवति यश्च प्रत्ययः प्राप्नोति स न भवति । एवं द्वैरूप्यं ॥ दामे । दामाः । दामानौ । दामानः। अतिमहिमे । अतिमहिमाः । अतिमहिमानौ । अतिमहिमानः। अनिनस्मन्ग्रहणान्यर्थवतोऽनर्थकस्य चाअन्बहुव्रीहेः—प्रियश्वे । प्रियश्वाः। प्रियश्वानौ । प्रियश्वानः। प्रियचर्मे । प्रियचर्माः। प्रियचर्माणौ । प्रियचर्माणः। बहुराजे । बहुराजाः । बहुराजानौ । बहुराजानः ।

**अजाद्यतां**[6] ॥१३॥ अज इत्येवमादीनामकारांतानां च शब्दानां वाच्यायां स्त्रियां द्योत्यायां तत आड् प्रत्ययो भवति ॥ अजा । महाजा । अश्वा । कोकिला । बाला । कन्या । त्रिफला । क्रुंचा । उष्णिहा । अतः—कारीषगंध्या । खट्वा। देवदत्ता । तकारः किं ? क्षीरपाः कन्या । षष्ठ्यास्तत्संबंधिन्यामेव स्त्रियां भवति ॥ पंचानामजानां समाहारः पंचाजी । अतः परं तत्संबंधिन्यामेव प्रत्ययः ।

**टिड्ढणढेञणञ्गौरादिभ्यः**[1] ॥ १४ ॥ अत इति वर्तते । टितः ठण् ढ इत्येताभ्यामिकारो य इञः अणो योऽकारः ततः अञश्च प्रत्ययात् गौरादिभ्यश्च स्त्रियां वर्तमानेभ्यो ङी प्रत्ययो भवति॥ टित्-कुरुचरी । मद्रचरी । ठण्-आक्षिकी। शालाकिकी । ढण्-सुपर्णस्यापत्यं स्त्री सौपर्णेयी । एवं-वैनतेयी । इञ्-सौतंगमी । मौनवित्ती । इकारप्रश्लेषः किं ? वाराह्या । वालाक्या । अण्-औपगवी । कुंभकारी । कारीषगंध्या, गौतमस्याध्येत्री गौतमा कन्या इत्यत्राणोऽकारस्य ग्रहणान्न भवति । प्रोक्तोऽण् न स्त्रियां । गौतम्या नीतेरध्येत्री गौतमेत्यत्र प्रोक्तोऽणो ङी लुग्विषये न जायते । अञ्-औत्सी । औदपानी । गौरादिभ्यः-गौरी । मत्सी । मनुषी । देवी ।

**यञोऽषावटात्**[2] ॥ १५ ॥ यञ्प्रत्ययांतात् स्त्रियां वर्तमानात् ङीप्रत्ययो भवति न चेत्स यञ् षकारादवटशब्दाच्च परो भवति ॥ गार्गी । वात्सी । अषावटादिति किं ? गौतक्ष्या । पौतिमाष्या । आवट्या ।

**यञ्ण्यञ्लोहितादिशकलांतकौरव्यासुरिमांडूकाड्ड्फट्**[3] ॥ १६ ॥ यञो यञंतेभ्यः

---

१--वनो न हश इति वक्तव्यमिति वार्तिकं । बहुव्रीहौ वा'' इति वार्तिकं । वनो र च । ४ । १ । ७। २--पादोऽन्यतरस्यां ॥८॥ ३--कुंभपदीषु च । ७ । ४ । १३९ । ४--टाबृचि ॥१९॥ ५--अनो बहुव्रीहेः ॥ १२ ॥ डाबुभाभ्यामन्यतरस्यां ॥१३॥ ६--अजाद्यतष्टाप् ॥१४॥

१----टिड्ढाणञ्द्वयसज्दघ्नञ्मात्रच्तयप्ठक्ठञ्कञ्क्वरपः । ४ । १ । ११ । षिद्गौरादिभ्यश्च ॥४१॥

२--यञश्च ॥१६॥ षाद्यञश्चाप् वाच्य इति वार्तिकं । आवट्याच्च ॥ ७५ ॥ ३--प्राचां ष्फतद्धितः ॥ १७ ॥ सर्वत्र लोहितादिकतंतेभ्यः ॥ १८ ॥ कौरव्यमांडूकाभ्यां च ॥१९॥ आसुरेरुपसंख्यानमिति वार्तिकं ।

Ac. Gunratnasuri MS Jin Gun Aradhak Trust

लोहितादिभ्यः शकलपर्यंतेभ्यः कौरव्य आसुरि मांडूक इत्येतेभ्यश्च स्त्रियां ङ्फट्प्रत्ययो भवति ॥ यञ्-गार्ग्यायणी । वात्स्यायनी । गौतक्ष्यायणी । पौतिमाष्यायणी । आवश्च्यायनी । यञ्लोहितादिशकलांतः—लौहित्यायनी । बाभ्रव्यायणी । शाकल्यायनी । कौरव्यादि-कौरव्यायणी । आसुरायणी । मांडूकायनी । यञः-पूर्वोऽयं च विधिरिति द्वैरूप्यं । लोहितादेरयमेवेत्युपादानं । ङकार आसुरेरित्याकारस्य लुगर्थः।टकारो ङ्यर्थः।

पदांतरेण तेनान्यानन्यापेक्षेण विक्रिया।
सांतरेतरनान्यैकप्रत्ययैर्लिङ्गदर्शनं ॥

**वयस्यनंत्ये**[१] ॥१७॥ वयो वाल्यादि तस्मिन्ननंत्येऽचरमे वर्तमानादकारांतात् स्त्रियां ङीप्रत्ययो भवति ॥ कुमारी । किशोरी । वधूटी । चिरंटी । वृद्धकुमारीत्युपमानात् । अनंत्य इति किं ? वृद्धा । स्थविरा । अत इति किं ? शिशुः।

**बहुव्रीहेस्संख्यादेर्हायनात्** ॥ १८ ॥ संख्यादेर्हायनशब्दांतात् बहुव्रीहेः स्त्रियां वयसि गम्यमाने ङी भवति ॥ द्विहायनी । त्रिहायणी । वयसीति किं ? त्रिहायना । चतुर्हायना शाला ।

**दाम्नः**[२] ॥१९॥ दामन्नित्येतदंतात् संख्यादेः बहुव्रीहेः स्त्रियां ङी भवति ॥ द्विदाम्नी । त्रिदाम्नी । संख्यादेरिति किं ? उद्दामां, उद्दामानं । उद्दाम्नीं वा वडवां पश्य । अनडुहीं पश्य ।

**ऊध्नः**[३] ॥२०॥ ऊधन्नित्येवमंतात् बहुव्रीहेः स्त्रियां ङी भवति ॥ घटोध्नी । पीवरोध्नी । "श्वतो वा" इति विकल्पे—सूत्रद्वयं ।

**अशिशोः**[४] ॥२१॥ अशिशु इत्येतस्माद्बहुव्रीहेः स्त्रियां ङी भवति ॥ न विद्यते शिशुर्यस्याः सा अशिश्वी । बहुव्रीहेरिति किं ? न शिशुः अशिशुः ।

१—वयसि प्रथमे ॥ २० ॥ २—दामहायनान्ताच्च॥२७॥ ३—बहुव्रीहेरूधसो ङीष् ॥ २५ ॥ ४—सख्यशिश्वीति भाषायां । ४ । १ । ६२ ।

**श्वतो वा**[१] ॥२२॥ यस्य क्वचिन् श्वादेशो भवति तस्मादन्नंताद्बहुव्रीहेः स्त्रियां ङी वा भवति ॥ तेन मुक्ते निषेधाड्प्रत्ययौ भवतः। बहुराज्ञी । बहुराज्ञ्यौ । बहुराज्ञ्यः। बहुराजानौ । बहुराजानः । बहुराजे । बहुराजाः । श्वत इति किं ? प्रियश्वानः।

**नाम्नि**[२] ॥ २३ ॥ संज्ञायां विषये श्वतो बहुव्रीहेः स्त्रियां नित्यं ङी भवति ॥ अधिराज्ञी, सुराज्ञी नामग्रामौ ॥

**अनाच्छादनाज्जातेः पूर्वपदात् क्तादजातकृतमितप्रतिपन्नात्**[३] ॥ २४ ॥ अनाच्छादना या जातिस्तद्वाचिनः पूर्वपदात्परो यः क्तांतः जातकृतमितप्रतिपन्नवर्जितः तदंताद्बहुव्रीहेः स्त्रियां ङी भवति ॥ शंखौ भिन्नौ यस्याः असौ शंखभिन्नी । ऊरुच्छिन्नी । केशलूनी । अनाच्छादनादिति किं ? वस्त्रच्छन्ना । जातेरिति किं? मासो यातो यस्याः सा मासयाता।संवत्सरयाता। पूर्वपदादिति किं ? प्रियशंखभिन्ना । जातादिनिषेधः किं ? दंता जाता यस्याः सा दंतजाता । दंतमिता । दंतकृता । दंतप्रतिपन्ना ।

**पाणिगृहीतीति पत्नी**[४] ॥ २५ ॥ पाणिगृहीतीत्येवं प्रकारो ङ्यंतो बहुव्रीहौ साधुर्भवति । पत्नी-भार्या चेत् वाच्या भवति ॥ पाणी हस्तौ गृहीतौ यस्याः सा पाणिगृहीती । करगृहीती । पाण्यात्ती । करात्ती कन्या । अन्या पाणिगृहीता । पत्नीत्यस्मादेव निपातनाद् पतिशब्दस्य भार्यायां नकारादेशः।

**वाऽस्वांगात्**[५] ॥२६॥ अनाच्छादनमस्वांगं

१—अन उपधालोपिनोऽन्यतरस्यां । ४ । १ । २८ । २—नित्यं संज्ञाछंदसोः ॥२९॥ ३—बहुव्रीहेश्चांतोदात्तात् ॥५२॥ जातिपूर्वादिति वक्तव्यमिति वार्तिकं । जातिकालसुखादिभ्योऽनाच्छादनात् क्ताऽकृतमितप्रतिपन्नाः ॥ ६ । २ । १७० ॥४-पाणिगृहीतीति भार्यायामिति वार्तिकं । ५—अस्वांगपूर्वपदाद्वा ॥५३॥

Ac. Gunratnasuri MS Jin Gun Aradhak Trust

या जातिस्तद्वाचिनः पूर्वपदात्परो यः क्तांतः जातकृतामितप्रतिपन्नवर्जितः तदंताद्बहुव्रीहेः स्त्रियां ङी वा भवति॥पलांडुः भक्षितोऽनया सा पलांडुभक्षिती, पलांडुभक्षिता । सुरापीती । सुरापीता । अस्वांगादिति किं ? उरूच्छिन्नी ।जातादिनिषेधः किं ? कुंडजाता । कुंडकृता । कुंडमिता । कुंडप्रतिपन्ना । बहुव्रीहेरिति किं ? सुरामत्ता ।

**असहनञ्विद्यमानान्नासिकोदरोष्ठजंघादंतकर्णशृंगांगगात्रकंठाबह्वच्संयोगोपांत्यात्स्वांगात्समासात्**[1]॥२७॥ सह नञ् विद्यमान इत्येतद्वर्जितादस्वांगवाचिनः पूर्वपदात्परं यन्नासिकादि यच्च बह्वचः संयोगोपांत्याच्चान्यत् स्वांगवाचि शब्दरूपं तदंतादकारांतात्समासात् स्त्रियां वर्तमानात् वा ङी भवति ॥ दीर्घनासिकी । दीर्घनासिका । तलोदरी । तलोदरा । बिंबौष्ठी । बिंबौष्ठा । समजंघी । समजंघा । चारुदंती । चारुदंता । लंबकर्णी । लंबकर्णा । तीक्ष्णशृंगी । तीक्ष्णशृंगा । मृद्वंगी । मृद्वंगा । तनुगात्री । तनुगात्रा । कलकंठा । कलकंठी स्त्री । अबह्वच्संयोगोपांत्यात्-शोभनो अडो यस्याः सा स्वडी । स्वडा वृश्चिका वाच्या भवति । स्निग्धकेशी । स्निग्धकेशा कन्या । पृथुस्तनी । पृथुस्तना रामा । बहुकेशी, बहुकेशा रथ्या । दीर्घमुखी, दीर्घमुखा प्रतिमा । असहनञ्विद्यमानादिति किं ? सहनासिका । अनासिका । विद्यमाननासिका । सहकेशा । अकेशा । विद्यमानकेशा । नासिकेत्यादीति किं ? पृथुजघना । महाललाटा । सुगुल्फा । चारुपार्श्वा । स्वांगादिति किं ? शुकनासिका शाला । बहुशोफा, बहुकफा जरती । बहुज्ञाना कन्या । दीर्घमुखा शाला । समासादिति समासमात्रार्थं । निरोष्ठी । निरोष्ठा । अतिकेशी । अतिकेशा माला । अस्वांगादिति किं ? मुखमेवनासिका यस्याः सा मुखनासिका पाणिपादा । पूर्वपदादिति किं ? तुंगदीर्घनासिका । स्निग्धप्रियकेशा । अत इति किं ? कल्याणपाणिः । परमशिखः।

अविकारोऽद्रवं मूर्तं प्राणिस्थं स्वाङ्गमुच्यते ।
च्युतं च प्राणिनस्तत्तन्निभं च प्रतिमादिषु ॥१॥

**दीर्घजिह्वात्** ॥ २८ ॥ दीर्घजिह्वा इत्येतस्मात् स्वांगात्समासात् स्त्रियां वा ङी भवति ॥ दीर्घजिह्वी । दीर्घजिह्वा कन्या ।

**पुच्छात्**[2] ॥ २९ ॥ असहनञ्विद्यमानादस्वांगवाचिनः पूर्वपदात्परं यत्स्वांगवाचि पुच्छ इति तदंतात् समासात् स्त्रियां वा ङी भवति ॥ कल्याणपुच्छी।कल्याणपुच्छा।निष्पुच्छी, निष्पुच्छा। असहनञ्विद्यमानादिति किं ? सहपुच्छा । अपुच्छा । विद्यमानपुच्छा ।

**कवरमणिविषशरात्**[3] ॥३०॥ कवरादिभ्यः पूर्वपदेभ्यः परं यत्स्वांगवाचि पुच्छेति तदंतात्समासात् स्त्रियां नित्यं ङी भवति ॥ कवरपुच्छी । मणिपुच्छी । विषपुच्छी । शरपुच्छी ।

**पक्षाच्चोपमानात्**[4] ॥३१॥ उपमीयते येन तदुपमानं तद्वाचिनः पूर्वपदात्परं यत्पक्ष पुच्छ इति तदंतात् समासात् स्त्रियां ङी भवति ॥ उलूक (घूक) पक्षी शाला । उलूकपुच्छी सेना ।

**न नखमुखान्नाम्नि**[5] ॥३२॥ नखमुखांतात् समासात् संज्ञायां विषये ङी न भवति ॥ शूर्पणखा । चंद्रणखा । गौर (होतृ) मुखा । कालमुखा । नाम्नीति किं ? शूर्पणखी राक्षसी । चंद्रमुखी कन्या ।

१ सहनञ्विद्यमानपूर्वाच्च॥५७॥नासिकोदरोष्ठजंघादंतकर्णशृंगाच्च॥५५॥अंगगात्रकंठेभ्यो वक्तव्यमिति वृत्तिः।न क्रोडादिबह्वचः॥ ५६ ॥ स्वांगाच्चोपसर्जनादसंयोगोपधात् ॥५४॥

१—दीर्घजिह्वा च छंदसि ॥५९॥ २—पुच्छाच्चेति वार्तिकं । ३—कवरमणिविषशरेभ्यो नित्यमिति वार्तिकं । ४—उपमानात्पक्षाच्च पुच्छाच्च इति वार्तिकं । ५—नखमुखात्संज्ञायां ॥५८॥

Ac. Gunratnasuri MS Jin Gun Aradhak Trust

**क्रोडादिभ्यः**[1] ॥३३॥ क्रोडाद्यंतात् समासात् स्त्रियां ङी न भवति ॥ कल्याणक्रोडा । कल्याणखुरा । सुभगा । सुगला ।

**करणात् क्रीतात्**[2] ॥ ३४ ॥ करणवाचिनः पूर्वपदात्परं यत्क्रीतेति तदंतात् समासात् स्त्रियां वर्तमानात् ङी भवति ॥वसनक्रीती । वस्त्रक्रीती । करणादिति किं ? सुक्रीता । दुष्क्रीता ।

**क्तादल्पे**[3] ॥३५॥ करणपूर्वपदात् क्तप्रत्ययांतात् समासात् स्त्रियां वर्तमानात् पूर्वपदस्यार्थस्याल्पत्वे गम्यमाने स्त्रियां ङी भवति ॥ अभ्रविलिप्ती द्यौः। सूपविलिप्ती पात्री । अल्पसूपीत्यर्थः। अन्यत्र-चंदनानुलिप्ता कन्या ।

**द्विगोः**[4] ॥३६॥ अकारांतात् द्विगोः स्त्रियां वर्तमानात् ङी भवति ॥ पंचपूली । दशपूली । पंचखरी । पंचतक्षी ।

**परिमाणादेव लुचोऽविस्ताचितकंबल्यात्** ॥ ३७ ॥ परितः आरोहतः परिणाहतश्च मानं परिमाणं प्रस्थादि। विस्त, आचित, कंबल्यवर्जितं यत् परिमाणवाचि तदंतादेव द्विगोरकारांतात् लक्षणादिप्रत्ययानां लुचि सत्यां तदंतात् स्त्रियां ङी भवति ॥ द्वाभ्यां कुडुबाभ्यां क्रीता द्विकुडुबी । त्रिकुडुबी । द्व्याढकी । त्र्याढकी । बिस्ताचितकंबल्यादिति किं ? द्विबिस्ता । त्रिबिस्ता । द्व्याचिता । त्रिकंबल्या ।

**कांडादक्षेत्रे**[6] ॥३८॥ कांडांतात् द्विगोर्लुचि सत्यां तदंतात् स्त्रियां वर्तमानादक्षेत्रे विषये ङी भवति।द्वे कांडे प्रमाणमस्याःसा,द्वाभ्यां कांडाभ्यां क्रीता वा,द्विकांडी ।अन्यत्र द्विकांडा।त्रिकांडा क्षेत्रभक्तिः।

**पुरुषात्प्रमाणाद्वा**[7] ॥३९॥ आयामः प्रमाणं । प्रमाणवाची यः पुरुषशब्दस्तदंताद् द्विगोर्लुचि सत्यां स्त्रियां वा ङी भवति ॥ द्वौ पुरुषौ प्रमाणमस्याः सा द्विपुरुषी । द्विपुरुषा वा परिखा ।

**नः पत्यंतस्य**[1]॥ ४० ॥ पतिशब्दांतस्य स्त्रियां नकारादेशो वा भवति ॥ दृढपत्नी । दृढपतिः । वृद्धपत्नी । वृद्धपतिः । बहुपत्नी । बहुपतिः ।

**सपत्न्यादौ**[2]॥ ४१ ॥ सपत्न्यादिषु स्त्रियां पत्युर्नित्यं नादेशः समानस्य सभावःपुंभावाभावश्च निपात्यते । सपत्नी । एकपत्नी । वीरपत्नी भार्या ।

**पतिवत्न्यंतर्वत्न्यावविधवागर्भिण्योः**[3] ॥४२॥ पतिवत्न्यविधवायामन्तर्वत्नीति गर्भिण्यां मतुप्रत्ययांतौ निपात्येते । पतिवत्नी अविधवा । अंतर्वत्नी गर्भिणी । अन्यत्र-पतिमती पृथिवी । अंतः अस्यां शालायामस्तीति अंतर्वती शाला ।

**रोहिणरेवतान्नक्षत्रे**[4] ॥ ४३ ॥ रोहणरेवत इत्येताभ्यां स्त्रियां नक्षत्रे विषये ङी भवति ॥ रोहिणी, रेवती नक्षत्रे। अन्यत्र-रोहिणा । रेवता

**नीलात्प्राण्योषध्योः**[5] ॥ ४४ ॥ नलिशब्दात् प्राणिनि ओषधौ च वर्तमानात् स्त्रियां ङी भवति ॥ नीली गौः । नीली ओषधिः । अन्यत्र-नीला शाटी ।

**नाम्नि क्ताच्च वा** ॥ ४५ ॥ नीलशब्दाच्च क्तांतात् च शब्दात्स्त्रियां नाम्नि ङी वा भवति ॥ नीली, नीला । प्रवृद्धविलूनी । प्रवृद्धविलूना ।

**केवलमामकभागधेयपापावरसमानार्यकृतसुमंगलभेषजात्** ॥४६॥ केवलादिभ्यः शब्देभ्यः स्त्रियां वर्तमानेभ्यः नाम्नि ङी भवति ॥ केवली । मामकी । भागधेयी । पापी । अवरी ।

१--न क्रोडादिबह्वचः॥५६॥ २--क्रीतात् करणपूर्वात् ॥५०॥ ३--क्तांतादल्पाख्यायां ॥५१॥ ४--द्विगोः ॥२१॥ ५--अपरिमाणविस्ताचितकंबलेभ्यो न तद्धितलुकि ॥२२॥ ६--कांडांतात्क्षेत्रे॥२३॥ ७--पुरुषात्प्रमाणेऽन्यतरस्यां॥२४॥

१--विभाषा सपूर्वस्य ॥ ३४॥ पत्युर्नो यज्ञसंयोगे ॥३३॥ २--नित्यं सपत्न्यादिषु ॥ ६५॥ ३--अंतर्वत्पतिवतोर्नुक् ॥३२॥ ४--गौरादिषु पाठात् ङीष् । ५-नीलादौषधौ । प्राणिनि च । इति वार्तिकं ।

Ac. Gunratnasuri MS Jin Gun Aradhak Trust

समानी । आर्यकृती । सुमंगली । भेषजी । नाम्नीती किं ? केवला । मामिका ।

**कुंडभाजगोणस्थलनागकुशकामुककटककबरात् पात्रश्राणावपनाकृत्रिमस्थूलायसमैथुनेच्छुश्रोणिकेशवेशे ॥४७॥** कुंडादिभ्यः शब्देभ्यः पात्रादिषु स्त्रीत्वविशिष्टार्थेषु ङी भवति ॥ कुंडी पात्रं । कुंडान्या । भाजी श्राणा, भिक्षा । भाजान्या । गोणी आवपनं, गोणान्या । स्थली अकृत्रिमा, स्थलान्या । नागी स्थूला । नागान्या । कुशी आयसी । कुशान्या । कामुकी मैथुनेच्छुः । कामुकान्या । कटी श्रोणिः । कटान्या । कबरी केशवेशः । कबरान्या ।

**आर्यक्षत्रियाद्वान् ॥ ४८ ॥** आर्य क्षत्रिय इत्येताभ्यां स्त्रियां वा आन्प्रत्ययो भवति ॥ आर्या । आर्याणि । क्षत्रिया, क्षत्रियाणी । अधवयोगेऽयं विधिः । धवयोगे तु परत्वान्ङी-आर्यी । क्षत्रियी ।

**धवयोगादज्येष्ठादिभ्यः ॥ ४९ ॥** धवो भर्ता, तदभिधायिनोऽकारांताच्छब्दात् योगात् तत्संबंधात् स्त्रियां वर्तमानात् ङीप्रत्ययो भवति ज्येष्ठ इत्येवं प्रकारान् वर्जयित्वा ॥ पृष्ठस्य भार्या पृष्ठी । प्रचरी । गणकी । आर्यस्य भार्या आर्यी । महामात्री । क्षत्रियी । योगादिति किं ? देवदत्ता भार्या स्वयमेव न तद्योगात् । अज्येष्ठादिभ्य इति किं ? ज्येष्ठा । कनिष्ठा ।

**पूतक्रत्वग्निवृषाकपिकुसितकुसीदादैङ् च ५०** पूतक्रत्वादिभ्यो धवाख्येभ्यस्तद्योगात् स्त्रियां वर्तमानेभ्यो ङी भवति, ऐकारश्चैषामन्तादेशः ॥ पूतक्रतोर्भार्या पूतक्रतायी । अग्नायी । वृषाकपायी । कुसितायी । कुसीदायी ।

**मनोर्वा डैच् ॥ ५१ ॥** ऐजित्यनेन प्रत्याहारः गृह्यते ॥ मनुशब्दाद्धवाख्यात् तद्योगात् स्त्रियां वर्तमानात् वा ङी भवति, ङीसंनियोगे चास्य डैजंतादेशः । मनोर्भार्या मनायी । मनावी । मनुः । डैजिति ङकार आदेशसूचनार्थः ।

**मतुलाचार्योपाध्यायादान् च ॥ ५२ ॥** मातुलादिभ्यो धवाख्येभ्यः तद्योगात् स्त्रियां वा ङी आन् च प्रत्ययौ भवतः ॥ मातुली । मातुलानी । मातुला । आचार्या । आचार्यानी । आचार्यानीति क्षुम्नादिः । उपाध्यायी । उपाध्यायानी, उपाध्याया ।

**वरुणेन्द्रमृडभवशर्वरुद्रादान् ॥५३॥** वरुणादिभ्यो धवाख्येभ्यस्तद्योगात् स्त्रियामान्नित्यं भवति ॥ वरुणस्य भार्या वरुणानी । इंद्राणी । मृडानी । भवानी । शर्वाणी । रुद्राणी ।

**सूर्याद्देवतायां ॥ ५४ ॥** सूर्यशब्दात् धवाख्यात्तद्योगात् देवतायां स्त्रियामान् भवति ॥ सूर्यस्य भार्या देवता सूर्याणी । अन्या सूरी ।

**आड् ॥ ५६ ॥** सूर्यशब्दात् धवाख्यात्तद्योगाद्देवतायां स्त्रियामाड्प्रत्ययो भवति ॥ सूर्यस्य भार्या देवता सूर्या । एवं देवतायां द्वैरूप्यं । योगविभाग उत्तरत्र आडननुवृत्त्यर्थः ॥

**यवनयवाल्लिपि दुष्टे ॥ ५६ ॥** यवनयवाभ्यां यथाक्रमं लिपौ दुष्टे चार्थे स्त्रियामान् भवति ॥ यवनानां लिपिर्यवनानि । यवनान्या । दुष्टो यवो यवानि । यवान्या ।

**हिमारण्यादुरौ ॥ ५७ ॥** हिमारण्याभ्यामुरौ महत्यर्थे स्त्रियामान् भवति ॥ उरु हिमं हिमानी हिमान्या । उर्वरण्यं अरण्यानी । अन्या अरण्या ।

**वेदक्तिनो ङी ॥ ५८ ॥** क्तिन्वर्जितादिकारांतात् स्त्रियां ङी वा भवति ॥ शक्तिः शक्ती । यष्टिः, यष्टी । अंगुलिः, अंगुली । आत्मंभरिः । आत्मंभरी स्त्री । तकारः किं ? नीः । सेनानीः स्त्री आक्तिन्निति किं ? कृतिः । हृतिः । क्तिन्निति



Ac. Gunratnasuri MS Jin Gun Aradhak Trust

नकारः किं ? रंतिः । रंती ।

**गुणादुतोऽचोऽखरोः** ॥ ५९ ॥ अचः परो य उकारस्तदंतात् खरुशब्दवर्जितादूगुणवचनात् स्त्रियां ङी वा भवति ॥ पटुः । पट्वी। मृदुः । मृद्वी कन्या। गुणादिति किं ? आखुरियं, चिकीर्षुरियं, कन्या । तकारः किं ? पटूयतेः क्विप् पटूः स्त्री । अच इति किं ? पांडुरियं । बभ्रुरियं । येन नाव्यवधानं तेन व्यवहितेऽपि वचनप्रामाण्यादेकेन वर्णेन व्यवधानमाश्रीयते । इति न्यायादत्र न भवति ॥ अखरोरिति किं ? खरुरियं कन्या ।

द्रव्याश्रयो गुणो द्रव्यं क्रिया पूर्वापरात्मिका ।
आकृतिग्रहणा जातिर्लिङ्गानां च न सर्वभाक्॥१॥इति

**चंद्रभागान्नद्यां** ॥६०॥ चंद्रभागशब्दात् नद्यां स्त्रियां ङी वा भवति॥ चंद्रभागी । चंद्रभागा । एवंनामा नदी । चंद्रभागान्या । चांद्रभागादिति वा पाठः ।

**बह्वादेः** ॥ ६१ ॥ बह्वादिभ्यः स्त्रियां वा ङी भवति ॥ बहुः । बह्वीः । चंडी । चंडा ।

**शोणश्येतैतहरितभरतरोहिताद्वर्णात्तो नश्च** ॥ ६२ ॥ शोणादिभ्यो वर्णवाचिभ्यःस्त्रियां ङी वा भवति तत्संनियोगे तकारस्य च नकारः। शोणी, शोणा। श्येनी,श्येता।ऐनी, एता। हरिणी, हरिता। भरणी, भरता। रोहिणी,रोहिता।लोहिनी, लोहिता । इति ऋफिडादित्वाल्लत्वं। अन्यत्राडेव

**क्रोऽसितपलितात्** ॥६३ ॥ असितपलिताभ्यां वर्णवाचिभ्यां स्त्रियां ङी वा भवति तत्संनियोगे च तकारस्य क्रादेशः । असिक्नी । आसिता । पलिक्नी । पलिता ।

**कालशबलसारंगपिशंगपिंगलकल्मषात्** ६४ कालादिभ्यो वर्णवाचिभ्यः स्त्रियां नित्यं ङी भवति॥काली। शबली। सारंगी। पिशंगी। पिंगली। कल्माषी । अन्यत्र काला । शबलेत्यादि ।

**जातेरस्त्रीयशूद्रात्** ॥ ६५ ॥ अकारांताज्जातिवाचिनः स्त्रियां ङी भवति न चेत्स्त्र्यर्थं यांतं शूद्रशब्दो वा भवति ॥ कुक्कुटी। मयूरी । तटी । हरीतकी । ब्राह्मणी । वृषली। नाडायनी। करी । कुटी । पात्री । अस्त्रीयशूद्रादिति किं ? यूका । माक्षिका । इभ्या । क्षत्रिया । शूद्रा । धवयोगलक्षणो ङी भवत्येव। शूद्रस्य भार्या शूद्री

**पाककर्णपर्णवालांतात्** ॥ ६६ ॥ पाकाद्यंताज्जातिवाचिनः स्त्रियां ङी भवति ॥ क्षणपाकी । ओदनपाकी । आखुकर्णी । शंकुकर्णी । सालपर्णी । पृश्निपर्णी । गोवाली । अश्ववाली । स्त्र्यर्थत्वाद्वचनं ।

**पुष्पादसत्कांडप्रांतशतैकाचः** ॥ ६७ ॥ सदादिवर्जितात् परो यः पुष्पशब्दः तदंताज्जातिवाचिनः स्त्रियां ङी भवति ॥ शंखपुष्पी । सुवर्णपुष्पी । सदादिप्रतिषेधः किं ? सत्पुष्पा । कांडपुष्पा।प्रान्तपुष्पा । शतपुष्पा । एकपुष्पा । प्राक्पुष्पा । प्रत्यक्पुष्पा ।

**फलादसंभस्त्राजिनैकशणपिंडात्** ॥६८॥ समादिवर्जितात्परो यः फलशब्दस्तदंताज्जातिवाचिनः स्त्रियां ङी भवति ॥ वासीफली । सिम्रूफली । पूगफली । समादिप्रतिषेधः किं ? संफला । भस्त्रफला । आजिनफला । एकफला । शणफला । पिंडफला ।

**मूलादनञः** ॥ ६९॥ नञ्वर्जितात्परो य मूलशब्दस्तदंताज्जातिवाचिनःस्त्रियां ङी भवति। दर्भमूली । सर्यिमूली । अनञ् इति किं ? अमूला

**नुरितः** ॥ ७० ॥ इकारांतान्मनुष्यजातिवाचिनः स्त्रियां ङी भवति ॥ अवंती । कुंती । आंगायनी । दाक्षी । नुरिति किं? तित्तिरिः ।

**ऊरुतोऽप्राणिनश्चायुरज्ज्वादिभ्यः**॥७१॥

Ac. Gunratnasuri MS Jin Gun Aradhak Trust

उकारांतात् नृजातिवाचिनः अप्राणिजातिवाचिनश्च स्त्रियामूप्रत्ययो भवति युशब्दांतं रज्ज्वादींश्च वर्जयित्वा । कुरूः । इश्वाकूः । ब्रह्मबंधूः अप्राणिजातेः-अलाबूः। कर्कंधूः । अप्राणिनश्चेति किं ? आखुः । कृकवाकुः। अयुरज्ज्वादिभ्य इति किं ? अध्वर्युरियं कन्या । रज्जुः । हनुः। रज्ज्वादयः प्रयोगगम्याः ॥

**ऊरूत्तरपदादौपम्ये** ॥७२॥ ऊरूत्तरपदात् शब्दात् स्त्रियां वर्तमानात् औपम्ये गम्यमाने ऊप्रत्ययो भवति ॥ कदलीस्तंभोरूः । करिकरवृत्तोरूः। औपम्य इति किं ? वृत्तोरूः ।

**सहसफसहितसंहितलक्ष्मणवामादेः** ।७३। सहाद्यादेरूरूत्तरपदात् स्त्रियामूप्रत्ययो भवति ॥ सहोरूः । सफोरूः । सफशब्दः सश्लिष्टार्थः । सहितोरूः। संहितोरूः। लक्ष्मणोरूः। वामोरूः।

**बाह्वंतकद्रुकमंडलोर्नाम्नि**॥ ७४ ॥ बाह्वंतात् कद्रुकमंडलुशब्दाभ्यां च स्त्रियां संज्ञायामूप्रत्ययो भवति ॥ मद्रबाहूः। भद्रबाहूः। कद्रूः। कंमडलूः। नाम्नीति किं ? वृत्तबाहुः । कद्रुः । कमंडलुः ।

**नारीसखीपंगूश्वश्रूः** ॥ ७५ ॥ नार्यादयः स्त्रियां ङ्यूप्रत्यायांताः कृतकार्या निपात्यंते ॥ नारी-नृनरयोः नारी । सखीसख्योः सखी । पंगुशब्दस्य पंगूः । श्वशुरस्य श्वश्रूः ।

**यूनस्तित्** ॥७६॥ युवन्नित्येतस्मात् स्त्रियां तित्प्रत्ययो भवति ॥ युवतिः । तकारः ष्यदर्थः । (ष्यत्प्रत्याहारार्थः) इत्यपि कश्चित् ।

**ङ्यां वनो रः** ॥ ७७ ॥ ङीप्रत्यये परे वनो रेफादेशो भवति । धीवरी । पीवरी । बहुधीवरी ।

**लुगतः** ॥७८॥ ङ्यां पूर्वस्याकारस्य लुग्भवति ॥ कुरुचरी । मद्रचरी ।

**मत्स्यताद्धितस्य हलो यः**॥७९॥ मत्स्यशब्दस्य तद्धितप्रत्ययस्य च यो यकारो हलः परस्तस्य ङ्यां लोपो भवति ॥ मत्सी । मनुषी । गार्गी ।

**सूर्यागस्त्ययोः छे च** ॥८०॥ सूर्य अगस्त्य इत्येतयोर्यकारस्य छे च ङ्यां च प्रत्यये लुग्भवति ॥ सूर्यस्य स्त्री सूरी।अगस्ती । सूर्यस्येयं सौरी । आगस्ती प्रभा । सौरीयः । आगस्तीयः ।

**लुच्यगोणीसूच्योः ष्यतः** ॥८१॥ तद्धितस्य लुचि परतः ष्यतो लुग्भवति गोणीसूचीशब्दौ वर्जयित्वा ॥ पंचेंद्राण्यो देवता अस्य पंचेन्द्रः । दशेंद्रः। पंचभिः शष्कुलीभिः क्रीतः पंचशष्कुलः। कुवल्या विकारः फलं कुवलं । आमलकं । अगोणीसूच्योरिति किं ! पंचगोणिः । दशसूचिः।

**गोण्या ह्रस्वो मेये** ॥८२॥ गोणीशब्दस्योपचारात् गोणीप्रमेयेऽर्थे वर्तमानस्य ह्रस्वो भवति ॥ गोणी मात्रो गोणिः। मेय इति किं ? गोणी ।

**केऽणङ्यः** ॥८३॥ अणो ङीप्रत्ययस्य च कप्रत्यये परे ह्रस्वो भवति ॥ सोमपकः। सोमपिका । लक्ष्मिका । वधुका । ङ्यः-पट्विका । मृद्विका । दारदिका । ङीग्रहणं प्राक्कात् कपिपुंभावबाधनार्थं ।

**न कचि** ॥८४॥ कचि प्रत्यये परे अण्ङ्योर्ह्स्वो न भवति ॥ बहुलक्ष्मीकः। बहुब्रह्मबंधूकः। खारीकः । काकणीकः ।

**वाडः** ॥ ८५ ॥ आडः कचि परे ह्स्वो वा भवति ॥ प्रियखट्वकः। प्रियखट्वाकः । बहुमालकः । बहुमालाकः ।

**इच्चापुंसोऽनित्क्याड्यसुपः**॥ ८६ ॥ अपुंलिंगार्थाच्छब्दात् विहितस्याडः स्थाने अनितः अनकारानुबंधकस्य प्रत्ययस्यावयवे कि-ककारे आडि आड्परे परतः इकारो ह्स्वश्च आदेशौ वा भवतः । असुपः-स न चेत्ककारातपर आड् सुपः परो भवति॥खट्विका।खट्वका । खट्वाका । अपुंस

इति किं ? न विद्यते खट्वा यस्या इत्यखट्वा। अल्पाऽखट्वा अखट्विका । अनित इति किं ? अनुकंपिता आर्द्रादत्ता आर्द्रका । असुप इति किं ? प्रियखट्वाकमतिक्रांता अतिप्रिय-खट्वाका ।

**स्वज्ञाजभस्त्राऽधातुक्यः** ॥८७॥ स्वादिभ्य अधात्ववयवो यः ककारो यकारश्च तस्माच्च परस्याडः स्थाने अनित्प्रत्ययावयवके ककारे आड्परे परतः इकारादेशो भवति वा, न चेत्स ककारात्पर आड् सुपः परो भवति ॥ कुत्सिता स्वा ज्ञातिः स्विका । स्वका । निःस्विका । निःस्वका । बहुस्विका । बहुस्वका । ज्ञिका । ज्ञका। अजिका । अजका । निर्भस्त्रिका निर्भस्त्रका । चटकिका । चटकका । एलकिका । एलकका । इभ्यिका । इभ्यका । आचार्यिका। आचार्यका । अधातुग्रहणं किं ? सुशोकिका । सुनयिका ।

**द्व्येषसूतपुत्रवृंदारकस्य** ॥८८॥ द्व्यादीनामंत्यस्य अनित्क्याड्परे असुप इकारादेशो भवति वा ॥ द्विके । द्विका । एषिका । एषका । सूतिका । सूतका । पुत्रिका । पुत्रका । वृंदारिका । वृंदारका ।

**वौ वर्तिका** ॥ ८९ ॥ वौ शकुनावभिधेये वर्तिकेति इत्वं वा निपात्यते। वर्तिका । वर्तका शकुनिः। वर्तिकान्या ।

**त्यायदाद्यतः** ॥ ९० ॥ त्यप्रत्ययांतस्य यदादिवर्जितस्य च योऽकारस्तस्यानित्प्रत्ययावयवे ककारे आड्परे परतः नित्यमिकारो भवति, न चेत्स आड् सुपः परो भवति ॥ इहत्यिका । अमात्यिका । दाक्षिणात्यिका । पाश्चात्यिका । जटिलिका । अष्टिका । कारिका। हारिका । यदादिनिषेधः किं ? यका । सका । क्षिपका । ध्रुवका । अनित् इति किं ? अनुकंपिता देवदत्ता । देवका । जिनका । अनिदिति पर्युदासेन प्रत्ययग्रहणादिह न भवति-शक्नोतीति शका । एडका । असुप इति किं ? बहुपरिव्राजका नगरी । असुप इति प्रसज्यप्रतिषेधादिहापि भवति-बहुचार्मिका रथ्या ।

**नरिका मामिका** ॥९१॥ नरकमामकशब्दयोरकारस्य प्रत्ययावयवे ककारे आड्परे परतः इत्वं निपात्यते ॥ नरान्काययतीति नरिका । ममेयं मामिका ।

**तारकावर्णकाज्योतिस्तांतवे**॥९२॥ तारका वर्णका इति निपात्येते यथासंख्यं ज्योतिषि तांतवे चाभिधेये ॥ तारका ज्योतिः । वर्णका तांतवं प्रावरणविशेषः। अन्यत्र—तारिका नद्या । वर्णिका कथया ।

**योगे** ॥ ९३ ॥ अधिकारोऽयमाशास्त्रपरिसमाप्तेः । यदित ऊर्ध्वमुपक्रामयिष्यामस्तत्संनियोगे सति भवति, नासतीति वेदितव्यं । योगः संबंध एकार्थता व्यपेक्षा वा । एकपद्ये एकार्थता । अन्यत्र व्यपेक्षा । तत्र “ हाधिकसमया० ।१।३।१००।” इत्यमौट्शस् । देवदत्तं जिनदत्तं चांतरा कमंडलुः । इह न भवति, देवदत्ताजिनदत्तयोरंतरा कमंडलुः । अत्र हि देवदत्तजिनदत्तयोः कमंडलुना संबंधो नांतरेत्यनेनेति । “ द्वितीया श्रितादिभिः ।२।१।३३॥” धर्मं श्रितो धर्मश्रितः । इह न भवति । पश्य धर्मं श्रितो देवदत्तो गुरुकुलं । ङसोऽपत्ये ॥२।४। १८॥ उपगोरपत्यमौपगवः । इह न भवति-गृहमुपगोरपत्यं देवदत्तस्य । कर्मणोऽण् ॥४।३। १०९॥ कुभं करोतीति कुंभकारः। इह न भवति पश्य कुभं करोति कटं वरुटः ।

**जातिर्बहुवद्बकाख्यायां** ॥ ९४ ॥ जात्यर्थे एक आख्यायां नामधेयेऽभिधेयत्वेन वर्तमानो

Ac. Gunratnasuri MS Jin Gun Aradhak Trust

बहुवद्वा भवति ॥ सपन्ना यवाः । संपन्नो यवः । संपन्नो व्रीहिः । संपन्ना व्रीहयः । एकेति किं? शोभने अक्षिणी कलिंगेषु । अत्र सव्येतरनेत्रसमुदायद्वंयाविवक्षा ।

**द्वौ चास्मदोऽविशेषणे** ॥ ९५ ॥ अस्मदो द्वावेकश्चार्थौ बहुवद्वा भवति। अविशेषणे न चेत्तस्य विशेषणं प्रयुज्यते ॥ अहं ब्रवीमि । आवां ब्रूवः । वयं ब्रूमः । आविशेषण इति किं ? अहं देवदत्तो ब्रवीमि । अहं गार्ग्यो ब्रवीमि ।

**फल्गुनी प्रोष्ठपदस्य नक्षत्रं** ॥९६॥ फल्गुनीशब्दस्य प्रोष्ठपदशब्दस्य च द्वौ नक्षत्रशब्दवाच्यावर्थौ बहुवद् वा भवतः। कदा पूर्वे फल्गुन्यौ । कदा पूर्वाः फल्गुन्यः । कदा पूर्वे प्रोष्ठपदे, कदा पूर्वाः प्रोष्ठपदाः । नक्षत्रमिति किं ? फल्गुनीषु जाते फल्गुन्यौ माणविके । द्वाविति किं ? एकस्मिन् ज्योतिषि मा भूत् ॥

**अव्ययात्स्वौजस्** ॥ ९७ ॥ अव्ययात् सु औ जस् इत्येते प्रत्यया भवंति ॥ अथो स्वस्ते गृहं । अथो स्वस्तव गृहं । अथो उच्चैर्मे गृहं । अथो उच्चैर्मम गृहं । उजावितौ । औ जस् ग्रहणमुत्तरार्थं ।

**एकद्विबहौ** ॥ ९८ ॥ एकत्वादिसंख्येऽर्थे वर्तमानाच्छब्दाद्यथासंख्यमेकद्विबहुषु सु औ जस् प्रत्यया भवंति॥ पुरुषः । पुरुषौ । पुरुषाः । अधिकारोऽयमातङ्विधानात् ।

**आमंत्र्ये** ॥ ९९ ॥ आमंत्र्यमाणेऽर्थे वर्तमानात् शब्दादेकत्वद्विबहुषु स्वौजस्प्रत्यया भवंति। हे देवदत्त । हे देवदत्तौ । हे देवदत्ताः । षष्ठिप्राप्तौ वचनं ।

**हाधिक्समयानिकषोपर्युपर्यध्यध्यधोऽधोऽत्यंतरांतरेणतस्पर्याभिसर्वोभयैश्चाप्रधानेऽमौट्शस्** ॥ १०० ॥ परार्थमप्रधानं। हाधिगादिभिस्तसंतैश्च पर्यादिभिरव्ययैर्योगे अप्रधानेऽर्थे वर्तमानादेकद्विबहुषु अमौट्शसः प्रत्यया भवंति ॥ हा देवदत्तं वर्धते व्याधिः । धिक् देवदत्तमयशः प्रवृद्धं । समया पर्वतं नदी । निकषा पर्वतं वनं। उपर्युपरि ग्रामं ग्रामाः । अध्यधि ग्रामं ग्रामाः । अधोऽधोनरकं नरकाः । अतिवृद्धं तु कुरून्महद्बलं । अंतरा निषधं नीलं च विदेहाः । अन्तरेण नीलं निषधं च विदेहाः । अंतरेण पुरुषकारं न किंचित् । परितो ग्रामं । अभितो ग्रामं । सर्वतो ग्रामं । उभयतो ग्रामं वनानि। अप्रधान इति किं ? प्रधाने न भवति। चकारोऽनुक्तसमुच्चयार्थः । तेन बुभुक्षितं न प्रतिभाति किंचित्। टशावितौ । अप्रधान इत्याधिकारः आपादपरिसमाप्तेः ।

**वीप्स्यलक्षणेत्थंभवनेष्वभिना** ॥ १०१ ॥ अवयवशः समुदायस्य क्रियादिना साकल्येन व्याप्तीच्छा वीप्सा, तत्कर्म वीप्स्यं, लक्ष्यते दृश्यते येन तल्लक्षणं चिह्नं । केनचिद्विवक्षितेन भावः इत्थंभावः । तद्विषयं इत्थंभवनं । एतस्मिन्नभीत्यनेन युक्तेऽप्रधानेऽर्थे वर्तमानादेकद्विबहुषु अमौट्शसो भवंति ॥ वृक्षंवृक्षमभिसिच्यते । वृक्षमभि विद्योतते विद्युत् । साधुर्देवदत्तो मातरमभि ।

**भागिनि च प्रतिपर्यनुभिः**॥१०२॥ स्वीक्रियमाणोंशो भागः, तदीश्वरो भागी। वीप्स्यलक्षणेत्थंभवनेषु भागिनि च प्रतिपर्यनु इत्येतैर्युक्तेऽप्रधानेऽर्थे वर्तमानात् एकद्विबहुषु अमौट्शसो भवंति। वीप्स्ये—वृक्षं वृक्षं प्रति,परि। वृक्षं वृक्षमनु। लक्षणे-वृक्षं परि। वृक्षं प्रति । वृक्षमनु विद्योतते विद्युत् । इत्थंभवने—साधर्देवदत्तो मातरं परि । मातरमनु। भागिनि-यदत्र मां प्रति स्यात्, मां परि, ममनु तद्दीयतां। एतेष्विति किं ? अनुवनस्याशानिर्जाता । समीप इत्यर्थः ।

Ac. Gunratnasuri MS Jin Gun Aradhak Trust

**टार्थेऽनुना** ॥१०३॥ हेत्वादिष्टार्थः, तस्मिन्ननु इत्यनेन योगेऽप्रधाने एकद्विबहुषु अमौट्शसो भवंति ॥ शांतिपट्टकप्रसारणमनु प्रावर्षत् पर्यजन्यः । तेन हेतुनेत्यर्थः । नदीमनुवसिता सेना । पर्वतमनुवसिता सेना । तेन सहावबद्धा कृतान्ता वेत्यर्थः।

**उत्कृष्टेऽनूपेन** ॥ १०४ ॥ अनु उप इत्येताभ्यां युक्तेऽप्रधाने उत्कृष्टे अधिकेऽर्थे वर्तमानात् एकद्विबहुषु अमौट्शसो भवंति ॥ अनुशाकटायनं वैयाकरणाः । उपविशेषवादिनं कवयः। तस्माद्धीन इत्यर्थः ।

**कर्मणि** ॥ १०५ ॥ क्रियत इति कर्म । तन्निर्वर्त्यं विकार्यं प्राप्यं च । तस्मिन्नप्रधानेऽर्थे वर्तमानादमौट्शसो भवंति ॥ कुंभं करोति । शरं लुनाति । आदित्यं पश्यति । अहिं लंघयति । ग्रामं गच्छन् वृक्षमूलान्युपसर्पति । अजां नयति ग्रामं । गां दोग्धि पयः। गोः पयो दोग्धि । अपाययतीत्यपायादिविवक्षायां तु यथायोगं पंचम्यादयो भवंति ॥ क्रियते घटः । कृतः कटः । शतेन क्रीतः शत्यः। प्राप्तोदको ग्रामः—इत्यत्राभिहिते अभिधेयाभावान्न भवति ॥

**दिवः करणे वा** ॥ १०६ ॥ येन कर्ता करोति तत्करणं । दीव्यतेरर्थस्य यत्करणमप्रधानं तस्मिन्नमौट्शसो भवंति वा ॥ अक्षान्दीव्यति । अक्षैर्दीव्यति । शलाकाः दीव्यंति । शलाकाभिर्दीव्यति । करण इति किं ? गृहे दीव्यति ॥

**कर्म च** ॥१०८॥ दीव्यतेर्यत्करणं तत्कर्म च करणं भवति ॥ अक्षाणां देवनं । अत्र कर्मत्वे परत्वात् करणतृतीयां वाधित्वा कर्मषष्ठी । देवनाः अक्षाः । अत्र करणेऽनट् । अक्षैर्देवयते देवदत्तो गुरुदत्तेन । अत्र करणत्वात्तृतीया । कर्मत्वाच्च प्रयोज्यस्य कर्मत्वं तत्प्रतिषेधश्च न भवतः ।

**न विनिमेयद्यूतपणं** ॥ १०८ ॥ विनिमेयं क्रेयविक्रेयं द्यूतपणो द्यूतजेयं । तदुभयं दिवेः प्राप्यं कर्म न भवति ॥ कर्मकार्यं न करोतीत्यर्थः । शतस्य दीव्यति । सहस्रस्य दीव्यति । क्रयविक्रये द्यूतपणत्वे वा तद्विनियुक्ते इत्यर्थः । कर्मत्वाभावे षष्ठी । शतस्य दीव्यते । शतस्य द्यूतं । शतस्य देवितव्यं । शतस्य सुदेवं । भावे लक्तध्यप् स्वार्थाः। शतस्य द्यूतो देवदत्तः,कर्तरि क्तः। विनिमेयद्यूतपणमिति किं ? देवान् दीव्यति । स्तौतीत्यर्थः ।

**वोपसर्गात्** ॥१०९॥ उपसर्गात्परस्य दिवेः प्राप्यं यद्विनिमेयं द्यूतं पणश्च तद्विकल्पेन कर्म न भवति ॥ शतं प्रदीव्यति।शतस्य प्रदीव्यतीत्यादि

**पणव्यवह्रोः** ॥ ११० ॥ पणतेर्व्यवपूर्वस्य च हरतेः प्राप्यं यत् विनिमेयं द्यूतपणश्च वा कर्म न भवति ॥ शतस्य पणते । शतं पणते । शतस्य व्यवहरति । शतं व्यवहरति ॥ इत्यादि ।

**स्मृत्यर्थदयीशां कर्म** ॥१११॥ स्मरणार्थानां धातूनां दयितेरीष्टेश्च यत्कर्म तत्कर्म वा भवति ॥ मातुः स्मरति । मातरं स्मरति । मातुः स्मर्यते । माता स्मर्यते । इत्यादि । मातुरध्येति । मातरमध्येति । सर्पिर्दयते । सर्पिषो दयते । लोकानामीष्टे । लोकानीष्टे ।

**कृञः प्रतियत्ने** ॥ ११२ ॥ पुनर्यत्नः प्रतियत्नः । तत्र वर्तमानस्य करोतेः कर्म वा कर्म भवति ॥ एधोदकस्योपस्कुरुते । एधोदकमुपस्कुरुते । इत्यादि ।

**रुजोऽज्वरिसंताप्योः कर्तरि भावे**॥११३॥ रुक् रुजा पीडा । तस्याः ज्वरिसंतापिभ्यामन्येनाभिधीयमानायाः यत्कर्म तत्कर्म वा भवति कर्तरि भावे—भावश्चेदस्या रुजः कर्ता भवति। चोरं रुजति रोगः । चोरस्य रुजति । चोरमाम-

Ac. Gunratnasuri MS Jin Gun Aradhak Trust

यति । चोरस्यामयतीत्यादि । अज्वरिसंताप्योरिति किं ? औदरिकं ज्वरयति । अत्याशिनं संतापयति ।

**हिंसायां जासनाटक्राथपिषानिप्रघ्नां॥११४॥** जासेति–जस हिंसायां । जस तोड़ने । नाटेति–नट अवस्पंदने चुरादिर्गृह्यते । न जसू मोक्षणे । नट नृत्ताविति अहिंसार्थत्वात् । क्राथेति–श्नथ क्नथ क्रथ क्लथ च हिंसार्थाः । घटादिः–पिष संचूरणे । एषां नि प्र इत्येवं पूर्वस्य च हंतेर्हिंसायां वर्तमानानां कर्म वा कर्म भवति ॥ चोरस्योज्जासयति । चोरमुज्जासयति । चोरस्योन्नाटयति । चोरमुन्नाटयति । चोरस्योत्क्राथयति । चोरमुत्क्राथयति । चोरस्य पिनष्टि । चौरं पिनष्टि । चोरस्य निहंति । चोरं निहंति । चोरस्य प्रहंति । चोरं प्रहंति । चोरस्य प्रणिहंति । चोरं प्रणिहंति । चोरस्य निप्रहंति । चोरं निप्रहंति । बहुवचनं सर्वभेदभंगार्थं । हिंसायामिति किं ? देवदत्तं बंधनाज्जासयति । मोक्षयतीत्यर्थः। नटं नाटयति । नर्तयतीत्यर्थः । अन्यत्र रीगादीन् निहंति । निवर्तयतीत्यर्थः ।

**आशिषि नाथः ॥ ११५ ॥** नाथतेराशीर्र्थे वर्तमानस्य कर्म वा कर्म भवति ॥ सर्पिर्नाथते । सर्पिषो नाथते । सर्पिर्मे भूयादित्याशास्त इत्यर्थः। अन्यत्र माणवकमुपनाथति।अंग पुत्रकाधीष्वेति याचतीत्यर्थः ।

**दृश्यभिवाद्येर्णेस्ताङि ॥ ११६ ॥** पश्यतेरभिवादयतेश्च यो णिस्तङ्विषये यत्र तङ् भवति तस्य कर्म प्रयोज्यः प्रकृतिकर्ता कर्म वा भवति ॥ पश्यंति भृत्याः राजानं । दर्शयते भृत्यान् राजा। भृत्यैरिति वा । अभिधायति गुरूर्देवदत्तं । तस्मिन्नाशिषं प्रयुंक्त इत्यर्थः । अभिवादयते गुरुं देवदत्तः, गुरुणेति वा । आत्मन्याशिषं प्रयोजयतीत्यर्थः । अथवाभिवदते गुरून् देवदत्तः, तमन्यः प्रयुंक्ते अभिवादयते गुरून् देवदत्तं जिनदत्तः । देवदत्तनेति वा ॥ तङीति विषयोपलक्षणात् तङभावेपि भवति । दर्शयमानो भृत्यान् राजा । भृत्यैरिति वा । अभिवादयमानो गुरुं देवदत्तः गुरूणेति वा ।

**अकर्मकात् ॥११७॥** अविवक्षितकर्मकोऽकर्मकः। उत्तरत्र नित्यग्रहणात्तस्मात्परो यो णिस्तस्य कर्म वा कर्म भवति ॥ पचति देवदत्तः । पाचयति देवदत्तं देवदत्तेनेति वा । लिखति देवदत्तः । लेखयति देवदत्तं देवदत्तेनेति वा ।

**नित्याकर्मगमिज्ञाद्यर्थशब्दकर्मदृशोऽखादिक्रंदशब्दायह्वः॥ ११८ ॥** नित्यमकर्मकेभ्यः गमेर्जानातेरदेश्चार्थो येषां तेभ्यः शब्दकर्मभ्यः शब्दनक्रियेभ्यः शब्दार्थेभ्यश्च दृशित्येतस्माच्च धातोर्यो णिस्तस्य कर्म नित्यं कर्म भवति । खाद् अदि क्रंद शब्दाय ह्व इत्येतान् वर्जयित्वा ॥ आसयति देवदत्तं । शाययति देवदत्तं । गमयति माणवकं ग्रामं । यापयति माणवकं ग्रामं । ज्ञापयति माणवकं धर्मं । बोधयति माणवकं धर्मं । भोजयति माणवकमोदनं । आशयति माणवकमोदनं । शब्दनक्रियेभ्यः–विलापयति देवदत्तं पुत्रं । भाषयति देवदत्तं गुरुं । शब्दार्थेभ्यः-श्रावयति देवदत्तं शास्त्रं । उपलंभयति देवदत्तं विद्यां । दृश्–दर्शयति रूपतर्कं तक्षं वा कार्षापणं । एतेभ्य इति किं ? पाचयत्योदनं देवदत्तेन । अखादादिक्रंदशब्दायह्व इति किं ? खादयति पिंडीं देवदत्तेन । आदयति पिंडीं देवदत्तेन । क्रंदयति देवदत्तेन । शब्दाययति देवदत्तेन । ह्वाययति देवदत्तेन ।

**भक्षेर्हिंसायां ॥ ११९ ॥** भक्षयतेर्हिंसायां वृत्तेः परस्य णेः कर्म वा कर्म भवति ॥ भक्षयंति

Ac. Gunratnasuri MS Jin Gun Aradhak Trust

बलीवर्दाः सस्यं । भक्षयंति बलीवर्दान् सस्यं । सस्यवदेतद्वान् हिंसितो भवति ॥ हिंसायामिति किं ? भक्षयति पिंडीं देवदत्तेन ।

**वहेः प्रवेयं** ॥ १२० ॥ वहतेः परस्य णेर्य-त्कर्म प्रवेयं यत्प्राजंति, तत्कर्म भवति ॥ वाहयति बलीवदान् भारं । प्रवेयमिति किं ? वाहयति भारं देवदत्तेन ।

**हृक्रोर्वा** ॥ १२१ ॥ हरतेः करोतेश्च यो णिस्तस्य कर्म वा कर्म भवति ॥ हरति भारं देवदत्तः । हारयति भारं देवदत्तं, देवदत्तेन वा । आहारयत्योदनं देवदत्तं देवदत्तेन वा । करोति कटं देवदत्तः । कारयति कटं देवदत्तं, देवदत्तेन वा ॥ विकुरुते स्वरान् क्रोष्टा । विकारयति स्वरं क्रोष्टारं क्रोष्टुना वा ।

**शीङ्स्थासोऽधेराधारः** ॥ १२२ ॥ अधिपूर्वाणां शीङ् स्था आस् इत्येतेषां य आधारः क्रियाश्रयस्य कर्तुः कर्मणो वा धारणात् अधिकरणं तत्कर्म भवति ॥ ग्राममधिशेते । ग्रामोऽधिशयितः देवदत्तेन । ग्राममधितिष्ठति । ग्रामोऽधिष्ठितः । ग्राममध्यास्ते । ग्रामोऽध्यासितः । अधेरिति किं ? ग्रामे शेते । पर्वते तिष्ठति । नद्यामास्ते ।

**वसोऽनूपाध्याङः** ॥१२३॥ अनु उप अधि आङ् इत्येतत्पूर्वस्य वसतेर्य आधारः तत्कर्म भवति ॥ ग्राममनुवसति । ग्रामोऽनूषितः । ग्राममुपवसति । ग्राममधिवसति । ग्राममावसति । अन्वादिसाहचर्यादुपेत्यस्य स्थानार्थस्यैव ग्रहाणात् ग्रामे उपवसति । भोजननिवृत्तिं करोतीत्यत्र न भवति ॥

**अभिनिविशश्च** ॥१२४॥ अभि नि इत्येतत्समुदायपूर्वस्य विशेर्यः आधारः तत्कर्म भवति । ग्राममभिनिविशते । ग्रामो अभिनिविश्यते । ग्रामोऽभिविनिष्टः । चकारात् क्वचिन्न भवति । अर्थे अभिनिविष्ट इत्यादि ।

**कालाध्वभावदेशं वा कर्म चाकर्मणां** १२५ कालो मुहूर्तादिः । अध्वा गंतव्यक्षेत्रं क्रोशादिः। भावः क्रिया गोदोहादिः । देशो जनपदः ग्रामनदीपर्वतादिः । सोऽयमाधारोऽकर्मकाणां वा कर्म भवति अकर्म च ॥ कालः—मासमास्ते । मास आस्यते । अध्वा—क्रोशं स्वपिति । क्रोशः सुप्यते भावः—ओदनपाकं शेते । ओदनपाकः शय्यते । देशः—ग्रामं वसति । ग्राम उष्यते । पक्षे--रात्रौ सुप्यते । क्रोशे सुप्यते । गोदोहे शेते । ग्रामे वसति । अकर्म चेति किं ? मासमास्यते । क्रोशं सुप्यते । गोदोहमासितं । गोदोहमासितः । इति भावादौ ल्रादिः । अकर्मकाणामिति किं ? अहन्यध्ययनमधीते ।

**कालाध्वनोर्व्याप्तौ** ॥१२६॥ काले अध्वनि चाप्रधाने वर्तमानात् शब्दात् व्याप्तौ अमौट्शसो भवंति॥मासं गुडापूपाः। मासमधीते। क्रोशं पर्वतः। क्रोशं कुटिला नदी । व्याप्ताविति किं?मासेऽधीते। मासस्याधीते । क्रोशेऽधीते । क्रोशस्याधीते ।

**टाभ्यांभिस्सिद्धौ** ॥ १२७ ॥ सिद्धौ क्रियानिष्पत्तौ द्योत्यायां कालवाचिनो अध्ववाचिनश्च शब्दात् व्याप्तौ एकद्विबहुषु टा भ्यां भ्यस् इत्येते यथाक्रमं प्रत्यया भवंति ॥ मासेन, मासाभ्यां, मासैः ज्योतिषमधीतम् । योजनेन, योजनाभ्यां, योजनैः वैद्यमधीतं । सिद्धाविति किं ? मासमधीते । अत्र व्याप्तिमात्रं गम्यते न सिद्धिः ।

**हेतुकर्तृकरणेत्थंभूतलक्षणे** ॥१२८॥ फलसाधनयोग्यः पदार्थो हेतुः। यः करोति स कर्ता। येन क्रियते तत्करणं । इमं किंचित्प्रकारमापन्नः इत्थंभूतः स लक्ष्यते येन तदित्थंभूतलक्षणं । एतस्मिन्विषये वर्तमानात् टा भ्यां भ्यसो भवंति ॥

Ac. Gunratnasuri MS Jin Gun Aradhak Trust

हेतौ-धनेन कुलं । विद्यया यशः । कर्तरि--देवदत्तेन कृतं । जितदत्तेन भुक्तं । करणे-दात्रेण लुनाति । परशुना छिनत्ति । इत्थंभूतलक्षणे-अपि भवान् कमंडलुना छात्रमद्राक्षीत् । अपि भवानवदातेन वर्णेन कुमारीमैक्षिष्ट ।

**सहार्थेन** ॥१२९॥ सहार्थस्तुल्ययोगो विद्यमानता च । तेन युक्तेऽर्थे वर्तमानादेकद्विबहुषु टा भ्यां भ्यसो प्रत्यया भवंति॥पुत्रेण सह स्थूलः । तिलैः सह मासान् वपति । सहैव दशभिः पुत्रैर्भारं वहति गर्द्धभी । पुत्रेण साकं, पुत्रेण सत्रा, पुत्रेण युगपत् गतः । पुत्रेणागतः । अत्रार्थग्रहणात् पर्यायस्य प्रयोगेऽप्रयोगेऽप्यर्थसत्तायां भवति ॥

**यद्भेदैस्तद्वदाख्या** ॥१३०॥ यस्य भेदिनः प्रकारवतोऽर्थस्य भेदैः प्रकारैः विशिष्टैः तद्वतः तत्प्रकारवदर्थकस्य आख्या भवति ततः टा भ्यां भिसो भवंति ॥ अक्ष्णा काणः। पादेन खंजः । प्रकृत्या दर्शनीयः । जात्या ब्राह्मणः ।

**काले भाद्वाधारे** ॥१३१॥ काले वर्तमानान्नक्षत्रवाचिनः शब्दादाधारे एकद्विबहुषु टा भ्यां भ्यसो भवंति वा ॥ पुष्येण पायसमश्नीयात् । पुष्ये पायसमश्नीयात् । मघाभिः पललौदनं । मघासु पललौदनं । काल इति किं ? पुष्ये चंद्रमाः । मघासु ग्रहः ।

**प्रसितावबद्धोत्सुकैः** ॥१३२॥ प्रसितादिभिर्युक्ते आधारे टा भ्यां भ्यसो भवंति वा । कैशेः प्रसितः। केशेषु प्रसितः। प्रकर्षेण सितो बद्धः प्रसित नित्यप्रसक्त उच्यते । केशैरवबद्धः।केशेष्ववबद्धः। केशैरुत्सुकः । केशेषूत्सुकः ।

**समो ज्ञोऽस्मृतौ चाप्ये** ॥ १३३ ॥ संपूर्वस्य जानातेरस्मृतौ वर्तमानस्य यदाप्यं प्राप्यं कर्म तत्र टा भ्यां भ्यसो भवंति वा ॥ मात्रा संजानीते । मातरं संजानीते । अस्मृताविति किं ? मातरं संजानाति । मातुःसंजानाति,स्मरतीत्यर्थः। मातुः संज्ञातेति कृति परत्वात् षष्ठी । चेन वानुकृष्यते ॥

**दाणाधर्मे तङ् च देयैः** ॥१३४॥ अधर्मेरूपेऽर्थे वर्तमानेन समोदाणदान इत्यनेन योगे देयैर्दातव्यैराप्ये देयं यदा भवति । तत्राप्रधानेऽर्थे वर्तमानात् टा भ्यां भिसो भवंति वा, तस्माच्च दाणः तङ् भवति ॥ दास्या संप्रयच्छते । वृषल्या संप्रयच्छते कामुकः । संददातीत्यर्थः । अधर्म इति किं ? पत्न्यै संप्रयच्छति । समोदाणः प्रेण व्यवधानमेव ।

**ङे भ्यां भ्यस्** ॥१३५॥ देयैराप्येऽप्रधानेऽर्थे वर्तमानादेकद्विबहुषु यथासंख्यं ङे भ्यां भ्यस् इत्येते प्रत्यया भवंति ॥ उपाध्यायाय गां ददाति। देवदत्ताय कन्यां प्रयच्छति । राज्ञे दंडं वितरति। छात्राय चपेटां ददाति । देयैराप्य इति किं ? रजकस्य वस्त्रं ददाति । घ्नतः पृष्ठं ददाति । इत्यत्र देयैरनाप्यतया रजकादिरुच्यते ॥

**स्थानिवुणः** ॥ १३६ ॥ यस्यार्थः प्रतीयते न च प्रयोगः स स्थानी । क्रियायां तदर्थायां वुण् लृट् च इति वुण्विहितस्तदंतस्य स्थानिनो धातोराप्ये कर्मणि ङे भ्यां भ्यसो भवंति॥ उदकाय व्रजति । एधेभ्यो व्रजति । पाकाय व्रजति । भूतये व्रजति । स्थानीति किं ? एधानाहारको व्रजति । पाकं कारको व्रजति ॥

**क्रुद्द्रुहेर्ष्यासूयार्थैर्यं प्रति कोपो न च कर्म** ॥ १३७ ॥ अमर्षः क्रोधः । अपचिकीर्षा द्रोहः । अक्षमा ईर्ष्या । गुणेषु दोषाविष्करणमसूया । एतदर्थैर्धातुभिर्योगे यं प्रति कोपो भवति तस्मिन् वर्तमानात् ङे भ्यां भ्यसो भवंति। तत्कर्म न च भवति ॥ देवदत्ताय क्रुध्यति । जनदत्ताय कुप्यति । देवदत्ताय द्रुह्यति । देवदत्ताय



Ac. Gunratnasuri MS Jin Gun Aradhak Trust

ईर्ष्यति । देवदत्ताय असूयति । कर्मप्रतिषेधो भावादौ लाद्यर्थः । देवदत्तायेर्ष्यते । जिनदत्ताय असूयितव्यं । गुरुदत्तायासूयितं ।

**कुद्द्रुहान्नोपसर्गात्** ॥ १३८ ॥ उपसर्गात्परेण क्रुधिना द्रुहिणा च योगे यं प्रति कोपस्तस्मिन् ङे भ्यां भ्यसो न भवंति ॥ देवदत्तमभिक्रुध्यति । देवदत्तमभिद्रुह्यति ।

**स्पृहेर्वा** ॥ १३९ ॥ स्पृहयतेर्धातोर्यदाप्यं कर्म तस्मिन्वा ङे भ्यां भ्यसो भवंति । तच्चाप्यं न कर्म भवति ॥ पुष्पाणि स्पृहयति । पुष्पेभ्यः स्पृहयति ।

**मन्यस्याकाकादिषु यतोऽवज्ञा** ॥१४०॥ यस्मादवज्ञा अन्यस्य विज्ञायते तस्मिन् काकादिवर्जिते मन्यतेराप्ये कर्माणि ङे भ्यां भ्यसो वा भवंति । न त्वा तृणाय मन्ये । न त्वा तृणं मन्ये । न त्वां शुने मन्ये । न त्वा श्वानं मन्ये । तृणादेरपि निकृष्टं मन्ये इत्यवजानाति । अकाकादिष्विति किं ? न त्वा काकं घूकं शृगालं मन्ये । अवज्ञेति किं ? न त्वा कनकं मन्ये । ततोऽप्याधिकं मन्ये इति प्रशंसा ।

**भद्रायुष्यक्षेमसुखार्थहितैराशिषि** ॥१४०॥ भद्राद्यर्थैर्हितशब्देन च योगे अप्रधानेऽर्थे वर्त्तमानात् आशीर्विषये ङे भ्यां भ्यसो भवंति वा । भद्रमस्तु जिनशासनाय । भद्रमस्तु जिनशासनस्य । एवं भद्रं, कल्याणं, आयुष्यं दीर्घमायुः। चिरंजीवितमस्तु देवदत्ताय, देवदत्तस्य वा । क्षेमं कुशलं निरामयं भूयात् संघाय, संघस्य वा । सुखं शर्म शं भवतात् प्रजाभ्यः, प्रजानां वा । अर्थः प्रयोजनं कार्यं जायतां दूताय । दूतस्य वा । हितं पथ्यं भूयाज्जिनदत्ताय, जिनदत्तस्य वा । हितग्रहणमाशिषि पक्षे षष्ठ्यर्थं । अस्त्येवोतरेण चतुर्थी ।

**शक्तार्थवषड्नमःस्वस्तिस्वाहास्वधाहितैः** ॥१४२॥ शक्तार्थैर्वषडादीभिश्च योगेऽप्रधानेऽर्थे वर्तमानात् नित्यं ङे भ्यां भ्यसो भवंति ॥ शक्तः शक्नोति प्रभुः प्रभवति जिनदत्तो देवदत्ताय । अलं मल्लो मल्लाय । वषडग्नये । नमोऽर्हद्भ्यः। स्वास्ति प्रजाभ्यः । इंद्राय स्वाहा । स्वधा पितृभ्यः । आतुराय हितं ।

**रुचिक्लृप्यर्थधारिभिः प्रेयविकारोत्तमर्णेषु** ॥ १४३ ॥ रुच्यर्थैः क्लृप्यर्थैः धारिणा च धातुना युक्ते यथाक्रमं प्रेये विकारे उत्तमर्णे च वर्तमानात् ङे भ्यां भ्यसो भवंति ॥ रुच्यर्थैः प्रीयमाणे-देवदत्ताय रोचते, स्वदते, मोदकः । क्लृप्यर्थैः विकारे-श्लेष्मणे कल्पते संपद्यते जायते दधि । धारिणोत्तमर्णे-देवदत्ताय शतं धारयति । उत्तमर्ण इति किं ? ऋणेन उत्तमः । उत्तमर्णः धनिकः । अत एव निपातनात् पूर्वत्वं ।

**प्रत्याङः श्रुवाभ्यर्थके** ॥ १४४ ॥ प्रत्याङ् इत्येताभ्यां परेण श्रृणोतिना युक्त अभ्यर्थके वर्तमानात् ङे भ्यां भ्यसो भवंति ॥ देवदत्ताय प्रतिश्रृणोति।जिनदतायाश्रृणोति । अभ्युपगच्छतीत्यर्थः

**प्रत्यनोर्गृणाख्यातारि** ॥१४५॥ प्रत्यनु इत्येताभ्यां परेण गृशब्द इत्यनेन युक्ते आख्यातरि वर्तमानात् ङे भ्यां भ्यसो भवंति ॥ उपाध्यायाय प्रतिगृणाति । अनुगृणाति । उपाध्यायेनोक्तमनुब्रवीति । शंसंतं वा तं प्रोत्साहयतीत्यर्थः ।

**राधीक्षौ यद्दैवे** ॥१४६॥ दैवं शुभाशुभमदृष्टं । यत्संबंधिदैवविषयायां क्रियायां राध्यतिरीक्षतिश्च वर्तते तास्मिन् राधीक्षिभ्यां युक्तेऽप्रधानेऽर्थे ङे भ्यां भ्यसो भवंति ॥ देवदत्ताय राध्यति । देवदत्तायेक्षते । तस्य दैवं निरूपयतीत्यर्थः । केषांचित् राधीक्षावित्यर्थनिर्देशः । ते राधयति, साधयति, पश्यति, जानीते । इत्यप्युदाहरंति ।

Ac. Gunratnasuri MS Jin Gun Aradhak Trust

**उत्पातेन ज्ञाप्ये** ॥१४७॥ उत्पातेन ज्ञाप्ये वर्तमानात् ङे भ्यां भ्यसो भवंति ॥

वाताय कपिला विद्युदातपायातिलोहिनी ।
पीता वर्षाय विज्ञेया दुर्भिक्षाय सिता भवेत् ॥

सा तत् ज्ञापयतीत्यर्थः ।

**श्लाघह्नुङ्स्थाशपा प्रयोज्ये** ॥ १४८ ॥ श्लाघादिभिर्युक्ते प्रयोज्यो ज्ञाप्योऽर्थः तस्मिन् वर्तमानात् ङे भ्यां भ्यसो भवंति ॥ देवदत्ताय श्लाघते । ह्नुते । तिष्ठते । शपते ।

**गल्हादिभिर्बहुलं** ॥ १४९ ॥ गल्हादिभिर्धातुभिर्योगेऽप्रधानेऽर्थे वर्तमानात् बहुलं ङे भ्यां भ्यसो भवंति ॥ क्वचित्प्रवृत्तिः—श्राद्धाय निगल्हते । युद्धाय सन्नह्यति।पत्ये शेते । देवदत्ताय कथयति । देवदत्तायोपदिशति । क्वचिन्न प्रवृत्तिःअन्यदेव भवति ॥ मनसा निगल्हते । मनसा सन्नह्यते । कचिद्विभाषा-देवदत्ताय देवदत्तं वा धर्मं ब्रूते । धर्मं शास्ति । प्रणम्य शास्त्रे शास्तारं वा ।

क्वचित्प्रवृत्तिः क्वचिदप्रवृत्तिः
क्वचिद्विभाषा क्वचिदन्यदेव ।
विधेर्विधानं बहुधा समीक्ष्य
चतुर्विधं बाहुलकं वदंति ॥१॥

देयैराप्य इत्यादिरस्यैव प्रपंच ।

**यदर्थं** ॥१५०॥ यत्प्रयोजनकं किंचिद्विवक्ष्यते तस्मिन्नर्थे वर्तमानात् ङे भ्यां भ्यसो भवंति ॥ रथाय दारु । कुंडलाय हिरण्यं ।

**परिक्रये करणे वा** ॥ १५१ ॥ वेतनादिभ्यः कियंतं कालं स्वीकारः परिक्रयः । तत्करणे ङे भ्यां भ्यसो भवंति वा ॥ शताय परिक्रीणीते । शतेन परिक्रीणीते । परिक्रय इति किं ? शतेन क्रीणाति ।

**ङसिभ्यांभ्यस्स्तोकाल्पकतिपयकृच्छ्राद-सत्त्वे** ॥ १५२ ॥ यतो द्रव्ये शब्दप्रवृत्तिः स पर्यायो गुणोऽसत्त्वं तेनैव रूपेणोच्यमानमसत्त्वं तस्मिन्करणे स्तोकादिभ्यः एकद्विबहुषु ङसि भ्यां भ्यसो भवंति वा ॥ स्तोकात् स्तोकेन, अल्पात् अल्पेन, कतिपयात्, कतिपयेन, कृच्छ्रात्, कृच्छ्रेण मुक्तः । असत्त्व इति किं ? स्तोकेन हतः । अल्पेन सीधुना मत्तः ।

**आराद्दर्थैः** ॥ १५३ ॥ आराद् दूरांतिकयोस्तंत्रेणोभयग्रहणं । दूरार्थैरंतिकार्थैश्च शब्दैर्युक्तादप्रधानात् ङसि भ्यां भ्यसो वा भवंति ॥ दूरं ग्रामात् । दूरं ग्रामस्य । दूरं ग्रामाभ्यां । दूरं ग्रामयोः । दूरं ग्रामेभ्यः । दूरं ग्रामाणां । एवं विप्रकृष्टांतिकाभ्यासेषु योज्यं । आराद्योगे दिग्शब्दान्यार्थारादिति नित्यं ॥

**हेतौ गुणेऽस्त्रियां** ॥ १५४ ॥ अस्त्रीलिंगे गुणे द्रव्याश्रिते पर्याये हेतौ वर्तमानात् ङसि भ्यां भ्यसो भवंति वा ॥ जाड्यात्, जाड्येन वा बद्धः। ज्ञानात्, ज्ञानेन वा मुक्तः।अस्त्रियामिति किं ? जडतया बद्धः । बुद्ध्या मुक्तः ।

**ऋणे** ॥ १५५ ॥ हेतौ ऋणे वर्तमानात् नित्यं ङसि भ्यां भ्यसो भवंति वा ॥ शताद्बद्धः । सहस्राद्बद्धः ।

**अपायेऽवधौ** ॥ १५६ ॥ अपायो विभागः विश्लेषः । तस्मिन् विषये निर्दिष्टे प्रतीयमाने वा योऽवधिरप्रधानं तस्मिन् ङसि भ्यां भ्यसो भवंति॥ ग्रामादपैति । ग्रामादागच्छति । पर्वतादवरोहति । यवेभ्यो गां निवारयति, निवर्तयतीत्यर्थः। प्रतीयमानेऽर्थे-कुसूलात्पचति । ततो गृहीत्वेत्यर्थः । वृकेभ्यो बिभेति । ततो भीत्या निवर्तत इत्यर्थः। चौरेभ्यो रक्षति । तदुपघातप्रतिकारेण ततो निर्वर्तयति इत्यर्थः । बलाहकात् विद्योतते विद्युत् । ततो निसृत्येत्यर्थः । कुतो भवान् आगच्छति ? पाटलिपुत्रादागच्छामि । बीजादंकुरो

Ac. Gunratnasuri MS Jin Gun Aradhak Trust

जायते । तस्मादात्मानं प्रतिलभ्यमानो निस्सरतीत्यर्थः । अपायेऽवधिविवक्षायामेव । विवक्षांतरे तु यथायोगं विभक्तयो भवंति ॥ यवेषु गां वारयति । चौरैर्भयं । चौरेषु भयं । चौराणां बिभेति ।

**आख्यातर्युपयोगे** ॥ १५७ ॥ आख्याता प्रतिपादयिता । उपयोगो नियमपूर्वकं विद्यास्वीकरणं । आख्यातरि वर्तमानात् उपयोगे विषये ङसि भ्यां भ्यसो भवंति ॥ उपाध्यायादधीते,आगमयति । आचार्याच्छृणोति अधिगच्छति ॥ उपयोग इति किं ? नटस्य शृणोति ॥

**आङा** ॥१५८॥ अवधाविति वर्तते । आङा योगेऽवधौ ङसि भ्यां भ्यसो भवंति ॥ आपाटलिपुत्रात् अपत्रिगर्तेभ्यो वृष्टो देवः । आकुमारेभ्यो यशः शाकटायनस्य गतं ।

**वर्ज्येऽपपरिणा** ॥१५९॥ अप परि इत्येताभ्यां युक्ते वर्ज्ये ङसि भ्यां भ्यसो भवंति ॥ अपपाटलिपुत्रात् अपत्रिगर्तेभ्यो वा वृष्टो देवः । त्रिगर्तान्वर्जयित्वेत्यर्थः । एवं परियोगेऽपि ।

**प्रतिनिधिप्रतिदाने प्रतिना** ॥ १६० ॥ प्रतिनिधौ प्रतिदाने च वर्तमानेन प्रतिना युक्तात् ङसि भ्यां भ्यसो भवंति ॥ प्रद्युम्नो वासुदेवात्प्रति । सदृश इत्यर्थः । तिलेभ्यः प्रतिमाषान् प्रयच्छति । तिलान् गृहीत्वा मासान् ददातीत्यर्थः।

**स्थानिप्यकर्माधारे** ॥ १६१ ॥ स्थानिप्यादेशांतेन युक्ते कर्मण्याधारे च ङसि भ्यां भ्यसो भवंति ॥ प्रासादात्प्रेक्षते । आसनात्प्रेक्षते । स्थानिग्रहणं किं ? प्रासादमारुह्य प्रेक्षते । आसने उपविश्य प्रेक्षते ॥

**दिकूच्छब्दान्यार्थाराद्बहिरितरैः** ॥१६२॥ दिक्च्छब्दैरन्यार्थैराराद्बहिस् इतर इत्येतैश्च शब्दैर्युक्तेऽप्रधानेऽर्थे वर्तमानात् ङसि भ्यां भ्यसो भवंति ॥ प्राग् ग्रामात् । प्रत्यग् ग्रामात् । पूर्वो ग्रामात् । अपरो ग्रामात् । पूर्वो वसंतात् । अपरो वसंतात् । दिशि दृष्टः शब्दः दिक्च्छब्दः देशकालादिवृत्तावपि भवति ॥ अन्यार्थः— अन्यो भिन्नोऽर्थांतरं देवदत्तात् । हिरुग्देवदत्तात् । आरात् ग्रामात् । बहिर्नगरात् । इतरो देवदत्तात् । तस्य द्वितीय इत्यर्थः।

**ङसोसां** ॥१६३॥ अप्रधानेऽर्थे वर्तमानात् एकद्विबहुषु यथासंख्यं ङस् ओस् आम् इत्येते प्रत्यया भवंति योगे संबंधे ॥ अपवादविनिर्मुक्तोऽस्य विषयः । राज्ञः पुरुषः । पशोः पादः । देवदत्तयोःपुत्रः। माषाणां राशिः।ग्रंथिकस्य शृणोति।

**स्तात्ता** ॥ १६४ ॥ स्तात् इति "परावरात् स्तात्" इत्यारभ्य आ "उपर्युपरिष्टात्" इत्यतस्तकारेण प्रत्याहारः । स्तात्प्रत्याहारग्रहीतप्रत्ययांतेन युक्तेऽर्थे वर्तमानात् ङसोसामो भवंति ॥ पंचम्यपवादः । पुरस्तात् दक्षिणतः । अधस्तात्, पुरस्तात्, उपरि, उपरिष्टात्, ग्रामस्य ।

**करणे ज्ञोऽज्ञाने** ॥१६५॥ जनातेरज्ञानेऽर्थे वर्तमानस्य यत्करणं तस्मिन् ङसोसामो भवंति ॥ ज्ञानमवबोधः। सर्पिषो जानीते । मधुनो जानीते। सर्पिषा करणभूतेन प्रवर्तत इत्यर्थः। अज्ञान इति किं ? स्वरेण पुत्रं जानाति ।

**कृत्कामुकस्याऽवुणलक्तणूखार्थाव्ययैष्यदृणेनः कर्मकर्त्रोः** ॥ १६६ ॥ वुणिति प्रत्ययः। लेति दश लकाराः । क्तण् इति "क्तक्तवतू" इत्यारभ्य आ "उकण्" णकारेण प्रत्याहारः । खार्थः-ख अनश्च । अव्ययाः क्त्वादयः । एष्यतीन् ऋणे इन् एतद्वर्जितो यः कृत् तदंतस्य कामुकशब्दस्य च कर्मणि कर्तरि च ङसोसामो भवंति ॥ अपां स्रष्टा । पुरां भेत्ता । वर्षशतस्य पूरकः । भवतः शायिका । दास्याः कामुकः ।

Ac. Gunratnasuri MS Jin Gun Aradhak Trust

वुणादिप्रतिषेधः किं?वुणं—एधानाहारको व्रजति । ल-कटं करिष्यन् । क्तण्—कटं कृतवान् । कटः कृतो देवदत्तेन । लोकं पवमानः । चोरं द्विषन् । चोरस्य द्विषन्निति संबंधविवक्षायां । वदिता जनापवादान् । ग्राममागामुकः ॥ खार्थः—सुकरः कटो भवता । सुज्ञानं तत्त्वं भवता । अव्ययं—ओदनं भुक्त्वा कटं कर्तुं गतः । एष्यतीन्—ग्रामं गमी । ऋणेन—शतं दायी ।

**क्तस्य सदाधारे** ॥ १६७ ॥ सति वर्तमाने यः क्तः आधारे च तदंतस्य धातोः कर्मणि कर्तरि च ङसोसामो भवंति ॥ सति क्तः—राज्ञां मतः । राज्ञां पूजितः । प्रजानां कांतः । आधारे क्तः—इदमोदनस्य भुक्तं । इदं सक्तूनां पीतं । इदमेषामासितं । वानाकस्य क्तः ॥ १ ॥ ३।१६८। इति विकल्पे, "क्तण्" इति प्रतिषेधे च प्राप्ते वचनं ।

**वानाकस्य क्तध्यब्द्विप्राप्तेः कर्तरि** ॥१६८॥ ध्यबिति "ध्यण्" इत्यतः आरभ्य आ "वदः सुपः क्यप्च" इति क्यपः पकारेण प्रत्याहारः । द्वयोः कर्मकर्त्रोः षष्ठी प्राप्तिर्यस्य कृतः स द्विप्राप्तिः । क्तः ध्यप् द्विप्राप्तिश्च यः कृत् निरनुबंधाकाराऽकप्रत्ययवर्जितः तदंतस्य कर्तरि ङसोसामो वा भवंति॥क्त—छात्रस्य हसितं । छात्रेण हसितं मयूरस्य नृत्तं । नृत्तं मयूरेण । ध्यप्कार्यं—कर्तव्यं । करणीयं । ज्ञेयं । कृत्यं भवतः भवता वा । द्विप्राप्तेः-साधु खल्विदं शब्दानामनुशासनमाचार्यस्य आचार्येण वा । अनाकस्येति किं ? चिकीर्षा कटस्य देवदत्तस्य । भेदिका काष्ठानां देवदत्तस्य । अवुणलक्तण् इत्येव । कृतः कटो देवदत्तेन ।

**कर्मणि गुणे** ॥ १६९ ॥ वुणादिवर्जितस्य कृतः कर्मणि गुणे ङसोसामो वा भवंति ॥ नेता अश्वस्य स्रुघ्नस्य । नेता अश्वस्य स्रुघ्नं । कर्मणीति किं ? भेदिका काष्ठानां जिनदत्तस्य देवदत्तस्य । गुण इति किं ? नेताऽश्वस्य । कर्ता कटस्य । कर्मांतरापेक्षत्वं गुणत्वं । अप्रधानाधिकारादतो द्विकर्मकाणामिहोदाहरणं ।

दुहियाचिरुधिप्रच्छिभिक्षिजिब्रूहृशासिचिञ् ।
णीञ्कृष्नहिवहीचोदि दंडणीति द्विकर्मकं ॥

**न ध्यपः** ॥ १७० ॥ ध्यबंतस्य गुणे कर्मणि ङसोसामो न भवंति ॥ नेतव्या ग्राममजा । क्रष्टव्या ग्रामं शाखा ।

**क्तेनो ङ्योस्सुप्** ॥ १७१ ॥ क्तांताद्यः इन्प्रत्ययः तदंतस्य कर्मण्यप्रधानेऽर्थे एकद्विबहुषु ङि ओस् सुप् इत्येते प्रत्यया भवंति । द्वितीयापवादः । अधीती व्याकरणे । आम्नाती द्वादशांगे । परिगणती वियद्गणिते ।

**हेतौ कर्मणा** ॥१७२॥ कर्मणा युक्ते हेतौ वर्तमानात् ङ्योस्सुपो भवंति । तृतीयापवादः ॥

चर्मणि द्वीपिनं हंति दंतयोर्हंति कुंजरं ।
वालेषु चमरीं हंति सीम्नि पुष्कलको हतः ॥

**साधुनिपुणेनार्चायां** ॥१७३॥ साधु,निपुण इत्येताभ्यां युक्ते अप्रधानेऽर्थे अर्चायां गम्यमानायां ङ्योस्सुपो भवंति ॥ साधुर्देवदत्तो मातरि । निपुणो जिनदत्तः पितरि । अन्यत्र—साधुर्भृत्यः राज्ञः । तत्त्वाख्याने न भवति ।

**स्वेशेऽधिना** ॥१७४॥ अधीत्यनेन योगे स्वे ईशितव्ये ईशे ईशितरि स्वामिनि चार्थे वर्तमानात् ङ्योस्सुपो भवंति ॥ स्वे—अधिमगधेषु श्रेणिकः । अध्यवतिषु प्रद्योतः । ईशे—अधिश्रेणिके मगधाः अधिप्रद्योतेऽवन्तयः ।

**उपेनाधिकिनि** ॥१७५॥ उप इत्यधिकाधिकि संबंधं द्योतयति । तेन युक्ते अधिकिनि ङ्योस्सुपो भवंति ॥ उपखार्यां द्रोणः । उपनिष्के कार्षापणं । द्रोणकार्षापणाभ्यामधिकौ खारीनि-

Ac. Gunratnasuri MS Jin Gun Aradhak Trust

ष्काविंत्यर्थः ।

**आधारे**॥१७६॥ क्रियाश्रयस्य कर्तुः कर्मणो वा य आधार अधिकरणं तस्मिन् ङ्योस्सुपो भवंति ॥ आसने आस्ते । स्थाल्यां पचति । गंगायां घोषः । तिलेषु तैलं । आकाशे शकुनयः । कृष्णा गोषु संपन्नक्षीरतमा । कृष्णा गवां संपन्नक्षीरतमा । इति समुदायस्यैकदेशं प्रत्याधारभावविषयविवक्षायां सप्तमी । संबंधविवक्षायां तु षष्ठी । यथा-वृक्षे शाखा, वृक्षस्य शाखा इति । निर्धारणं तु कृष्णेत्यादेः पदांतरात् ।

**सुजर्थैःकाले वा** ॥ १७७ ॥ सुजर्थो येषां प्रत्ययानां तदंतैर्युक्ते काले आधारे ङ्योस्सुपो वा भवंति॥द्विरह्नि भुंक्ते,द्विरह्नो भुंक्ते । मासे पंचकृत्वो भुंक्ते, मासस्य पंचकृत्वो भुंक्ते । बहुधाह्नि भुंक्ते । बहुधाह्नो भुंक्ते।आधार इति किं ? द्विरह्नो भुंक्ते। काल इति किं ? द्विरध्वनि भुंक्ते ।

**कुशलायुक्तेनासेवायां** ॥ १७८ ॥ कुशल आयुक्त इत्येताभ्यां युक्ते अप्रधाने आधारे आसेवायां तात्पर्ये गम्यमाने ङ्योस्सुपो वा भवंति॥कुशलो विद्याग्रहणे । कुशलो विद्याग्रहणस्य । आयुक्तस्तपश्चरणे । आयुक्तस्तपश्चरणस्य । अन्यत्र कुशलश्चित्रकर्माणि न च करोति । आयुक्तो गौः शकटे । आकृष्य युक्त इत्यर्थः ।

**स्वामीश्वराधिपतिदायादसाक्षिप्रतिभूप्रसूतैश्च** ॥१७९॥ स्वाम्यादिभिर्युक्ते अप्रधाने वा ङ्योस्सुपो भवंति ॥ गोषु स्वामी । गवां स्वामी। गोष्वीश्वरः।गवामीश्वरः।गोष्वधिपतिः।गवामधिपतिः। गोषु दायादः। गवां दायादः।गोषु साक्षी । गवां साक्षी । गोषु प्रतिभूः । गवां प्रतिभूः । गोषु प्रसूतः । गवां प्रसूतः । चेन वानुकृष्यते ।

**यद्भावो भावलक्षणं** ॥१८०॥ भावःक्रिया प्रसिद्धं लक्षणमप्रसिद्धं लक्ष्यं । यस्य संबंधिना भावेन क्रियया भावांतरं लक्ष्यते तस्मिन्नप्रधानेऽर्थे वर्तमानात् ङ्योस्सुपो भवंति ॥ गोषु दुह्यमानासु गतः । दुग्धास्वागतः । आम्रेषु कालायमानेषु गतः । पक्वेष्वागतः । जातेष्विति गम्यते । गम्यमानमपि विभक्तेः निमित्तं भवत्येव । यथा वृक्षे शाखा । तृतीयापवादो योगः ।

**त्रयीत्रयी विभक्तिः** ॥१८१॥ या इमाः स्वौजसित्यादयः सप्त त्रयो विभक्तयो विभागा अनुक्रांतास्ताः प्रत्येकमिह विभक्तिशब्दवाच्या वेदितव्याः ।

**प्रथमादिः** ॥ १८२ ॥ ताः सप्त विभक्तयः इह प्रथमादिशब्दवाच्या वेदितव्याः । "स्वौजस्" इति प्रथमा विभक्तिः।"अमौट्शस्"इति द्वितीया । "टाभ्यां भिस्" इति तृतीया ।

**षष्ठी चानादरे** ॥१८३॥ यद्भावो भावलक्षणं तस्मादनादरे अवज्ञाने गम्यमाने षष्ठीसप्तम्यौ विभक्ती भवतः । रुदति लोके प्राव्राजीत्, रुदतो लोकस्य प्राव्राजीत् । क्रोशति बंधुवर्गे, क्रोशति बंधुवर्गस्य प्राव्राजीत् । तस्मिन् क्रोशति सत्यानादृत्य प्राव्राजीदित्यर्थः ।

**गते स्थानिन्यध्वांतेनैकः** ॥१८४॥ कुतश्चित्परिग्रहीतस्य अध्वनो अवसानमंतः । यद्भावो भावलक्षणं तस्यांतेन युक्तस्याध्वनः स्थनिना गतशब्देन वाच्ये भावे भावलक्षणे सति तेनांतेनैकत्वमध्ववाचिना अन्यवाचिनैकार्थे सामानाधिकरण्यं तद्विभक्तिः तत्र भवतीत्यर्थः । गवीधुमतः सांकाश्यं चत्वारि योजनानि । चतुर्षु योजनेषु भवतीत्यर्थः । लोकमध्याल्लोकांतमुपर्यधश्च सप्त रज्जूरामनंति । गत इति किं ? दग्धेषु लुप्तेष्विति वा प्रतीतौ मा भुत् । स्थानिनीति किं ? गवीधुमतः सांकाश्यं चतुर्षु योजनेषु गतेषु भवति ॥

**सप्तमी** ॥१८५॥ यद्भावो भावलक्षणं तस्मादंतेन युक्तादध्वनः स्थानिना गतशब्देन वाच्ये

भावे भावलक्षणे सति सप्तमी विभक्तिर्भवति ॥ गवीधुमतस्साकाश्यं चतुर्षु योजनेषु । लोकमध्याल्लोकांतमुपर्यधश्च सप्तसु रज्जुष्वामनंति ।

**कारकमध्येऽध्वकाले पंचमी च** ॥१८६॥ क्रियाया निर्वर्तकं कारकं द्वयोः कारकयोः मध्ये यो अध्वा कालश्च तस्मिन् वर्तमानात् सप्तमी विभक्तिर्भवति पंचमी च । इहस्थोऽध्वना क्रोशे लक्ष्यं विध्यति । क्रोशाल्लक्ष्यं विध्यति । इह कर्तृकर्मणोः कारकयोर्मध्ये क्रोशोऽध्वा । अद्य भुक्त्वाऽयं मुनिः द्व्यहे भोक्ता ।द्व्यहाद्भोक्ता। इह शक्तिः कारकमिति द्वयोः भुजिक्रियाकर्तृशक्त्योर्मध्ये द्व्यहः, कालः ।

**चेष्टागत्याऽप्येनाक्रांते द्वितीयाचतुर्थ्यौ**१८७ चेष्टारूपायाः गमनक्रियाया आप्ये कर्मणि अनाक्रांते कर्ताऽनास्थिते असंप्राप्ते द्वितीयाचतुर्थ्यौ विभक्ती भवतः । ग्रामं गच्छति । ग्रामाय गच्छति । नगरं व्रजति । नगराय व्रजति विप्रनष्टः । पंथानं गच्छति । पथे गच्छति । चेष्टागत्याप्य इति किं ? ग्रामादागच्छति । चेष्टाग्रहणं किं ? मनसा पाटलीपुत्रं गच्छति । गतिग्रहणं किं ? ओदनं पचति । अनाक्रांत इति किं ? पंथानं गच्छति । चतुर्थीविकल्पे कृति षष्ठीबाधनार्थं । ग्रामं गंता । ग्रामाय गंता ।

**तुल्यार्थैस्तृतीया** ॥ १८८ ॥ तुल्यार्थैर्युक्तेऽप्रधाने तृतीयाविभक्तिर्भवति । मात्रा तुल्यः । पित्रा समानः । गुरुणा समः, सदृक्, सदृशः, सदृक्षः । उपमा नास्ति कृष्णस्येत्यादौ उपमा । तुला, इव, वत, यथा, तथादयो न तुल्यार्थः ।

**षष्ठी** ॥ १८९ ॥ तुल्यार्थैर्युक्तेऽप्रधाने षष्ठी भवति । मातुस्तुल्यः । पितुः समान इत्यादि ॥

**द्वितीया चैनेनानंचेः** ॥ १९० ॥ अनंचेर्य एनप्रत्ययः तदंतेन युक्ते द्वितीया षष्ठी च भवतः॥ पूर्वेण ग्रामं । उत्तरेण ग्रामं । पूर्वेण ग्रामस्य । उत्तरेण ग्रामस्य । अनंचेति किं ? प्राग्ग्रामात् । प्रत्यग्ग्रामात् ।

**पंचमी चर्तेः** ॥ १९१ ॥ ऋतेशब्देन युक्ते द्वितीयापंचम्यौ भवतः ॥ ऋते धर्मात्कुतः सुखं । चित्तं यथाश्रियं ऋते । नद्यंगं विक्रियते रोममृते ।

**पृथक्नाना तृतीया च** ॥१९२॥ पृथक् नाना इत्येताभ्यां युक्ते तृतीयापंचम्यौ भवतः ॥ पृथक् देवदत्तेन । पृथक् देवदत्तात् । नाना देवदत्तेन । नाना देवदत्तात् .

**विनेमास्तिस्रः** ॥१९३॥ विना शब्देन युक्ते इमा अनंतरास्तिस्रः तृतीयापंचमीद्वितीयाविभक्तयो भवंति । विना धर्मेण । विना धर्मात् । विना धर्मं सुखं न च .

**सप्तमी चासत्त्वारादर्थात्** ॥१९४॥ द्रव्यं सत्त्वं ततोऽन्यदसत्त्वं । आराद्दूरांतिकार्थयोः तंत्रेणोभयग्रहणं । असत्त्ववाचिनो दूरार्थात् अंतिकार्थाच्च शब्दात् सप्तमी इमांस्तिस्रा विभक्तयश्च भवंति । दूरे दूरेण दूरात् दूरं वा ग्रामस्य गच्छति । एवं विप्रकृष्टांतिकाभ्यासेषु योज्यं । असत्त्वग्रहणं किं ? दूरः पंथा । दूराय पथे देहि ।

**हेतौ हेत्वर्थैः सर्वाः प्रायः** ॥१९५॥ हेतुर्निमित्तं कारणमिति पर्यायाः तदर्थैर्योगे हेतौ अप्रधाने प्रायेण सर्वा विभक्तयो भवंति ॥ धनेन हेतुना । धनाय हेतवे । धनस्य हेतोः । धने हेतौ वसति । कं हेतुं । केन हेतुना । कस्मै हेतवे । कस्माद्धेतोः । कस्य हेतोः, कस्मिन् हेतौ तिष्ठति । एवं निमित्तकारणप्रयोजनैरपि नेयं । हेताविति किं ? कस्य हेतुः । हेत्वर्थैरिति किं ? केन वसति । प्राय इति प्रयोगानुसरणार्थं ॥

इति श्रीशाकटायनलघुवृत्तौ शब्दानुशासने चिंतामणौ वृत्तौ प्रथमस्याध्यायस्य तृतीयः पादः ।

Ac. Gunratnasuri MS Jin Gun Aradhak Trust

# अथ चतुर्थः पादः ।

**लोऽन्ययुष्मदस्मासु तिप्तस्झिसिप्थस्थमिप्वस्मस् ॥ १ ॥** एकद्विबहाविति वर्तते । ल इति सामान्येन दशानां ग्रहणं। अन्ययुष्मदस्मदर्थेषु प्रत्येकमेकाद्विबहुषु वर्तमानस्य धातोर्विहितस्य लकारस्य यथाक्रमं तिबादयो नवादेशा भवंति । अन्यस्मिन्नेकस्मिन्नर्थे तिप्, अन्योर्द्वयोस्तस्, अन्येषु बहुषु झि । अन्यत्वं युष्मदस्मदपेक्षं सन्निधानाद् । एवं युष्मदर्थेषु एकाद्विबहुषु यथाक्रमं सिप् थस् थ । अस्मदर्थेषु मिप् वस् मस्।स पचति।भवान् पचति।तौ पचतः । भवंतौ पचतः।ते पचंति।भवंतः पचंति । त्वं पचसि।युवां पचथाः । यूयं पचत । अहं पचामि । आवां पचावः । वयं पचामः । पचति । पचतः । पचंतीत्यादावन्ययुष्मदस्मदामप्रयोगेऽपि तदर्थ एव लार्थ इत्यादेशः। स च त्वं च पचतः।स चाहं च पचावः । स च त्वं च अहं च पचामः । इति पराश्रय एव लादेशो भवति शब्दपराविप्रतिषेधात्। पकारः श्ल्यब्लौ इति पर्युदासार्थः ।

**तातांझथासाथांध्वमिल्वहिमाहिङ्ङिंदिच्छीयसंक्ष्णवपस्कृनिविशः ॥ २ ॥** ङकारेत इकारेतश्च धातोः शीयादेश्च शदादेशात् संक्ष्णुअपस्कृनिविश इत्येतेभ्यश्च सोपसर्गेभ्यः परस्य लकारस्य एकद्विबहुषु अन्ययुष्मदस्मासु यथाक्रमं त, आतां झ, थास्, आथां, ध्वं, इल्, वहि महिङ् इत्येते आदेशा भवंति ॥ ङित्—ह्नुङ्—ह्नुते । भवान् ह्नुते । ह्नुवाते । ह्नुवते । ह्नुसे । ह्नुवात । ह्नुध्वे । ह्नुवे । ह्नुवहे । ह्नुमहे।इदित्-एधि—एधते एधेते।एधंते । एधसे, एधेथे,एधध्वे । एधे, एधावहे, एधामहे । एवं चिति-चेतयते । चेतयेते । चेतयंते । इत्यादि। शीय-शीयते । शीयेते, शीयंते । संक्ष्णु—संक्ष्णुते । संक्ष्णुवाते । संक्ष्णुवते । उपस्किरते वृषभो हृष्टः सन् । निविशते, निविशेते, निविशंते।ल्ङावितौ।

**उह्यसोर्वोपसर्गात् ॥ ३ ॥** उपसर्गात् पराभ्यां ऊहि असू इत्येताभ्यां परस्य अस्य पूर्ववत् तङ् वा भवति ॥ समूहते । समूहति । निरस्यति । निरस्यते । उपसर्गादिति किं? ऊहते । अस्यति ।

**युजोऽजुदः ॥ ४ ॥** अजंतादुदित्येतस्माच्चोपसर्गात् परात् युजृञित्यतो लस्य तङो भवंति। प्रयुङ्क्ते । नियुङ्क्ते । उद्युङ्क्ते । अजुद इति किं ? संयुनक्ति । दुर्युनक्ति ।

**न यज्ञे तपात्रे ॥ ५ ॥** यज्ञे यज्ञपात्रविषयाद्युजेस्तङो न भवंति ॥ द्वंद्वं यज्ञपात्राणि प्रयुनक्ति । यज्ञ इति किं ? यज्ञपात्राणि रंधने प्रयुंक्ते । तत्पात्र इति किं ? यज्ञे मंत्रं प्रयुङ्क्ते । तद्ग्रहणं किं ? रंधनपात्राणि यज्ञे प्रयुङ्क्ते । अनंतरस्य निषेधात् युजि समाधावित्यस्योदिल्लक्षणस्तङ् भवत्येव । नान्यस्यैतद्विषये प्रयोगोऽस्तीत्येके ।

**परिव्यवात् क्रियः ॥ ६ ॥** परि वि अव इत्येतेभ्यः परात् क्रीणातेर्लस्य तङो भवंति ॥ परिक्रीणीते । अवक्रीणीते । विक्रीणीते । बहुविक्रीणीते वनमित्यत्र अनर्थकत्वादयोगादनुपसर्गाच्च न भवत्येवमुत्तरत्रापि । क्रिय इत्यत एव निर्देशात्प्रकृतिवदनुकरणमिति सिद्धं । मुनीत्याह द्विष्पचतीत्याहेति "-परावेर्जेः १ । ४ । ७ । इत्यादौ वर्णमात्रस्यानुकरणं न त्वभिधेयस्य।पराजयति सेना ।

Ac. Gunratnasuri MS Jin Gun Aradhak Trust

**परावेर्जेः** ॥ ७ ॥ परा वि इत्येताभ्यामुपसर्गाभ्यां पराज्जयतेर्लस्तङो भवंति । पराजयते। विजयते ।

**कर्मणोदश्वरः** ॥ ८ ॥ उत्पूर्वाच्चरतेः कर्मणा योगे सति लस्य तङो भवंति । ग्राममुच्चरते । सक्तूनुच्चरते ।

**समस्तृतीयया** ॥ ९ ॥संपूर्वाच्चरतेः तृतीयांतेन युक्ते योगे सति लस्य तङो भवंति ॥ अश्वेन संचरते । रथेन संचरते ।

**क्रीडोऽकूजे** ॥ १० ॥ कूजः शब्दनविशेषः । ततोऽन्यस्मिन्वर्तमानात् क्रीडतेः संपूर्वाल्लस्य तङो भवंति । संक्रीडते । अकूज इति किं? संक्रीडंति शकटानि ।

**पर्यन्वाङः** ॥ ११ ॥ परि अनु आङ् इत्येतेभ्यः उपसर्गेभ्यः परात्क्रीडतेर्लस्य तङो भवंति॥ परिक्रीडते । अनुक्रीडते । आक्रीडते ।

**शपनाथशिक्षभुजादुपलंभनाशीर्जिज्ञासात्राणे** ॥ १२ ॥ शपादिभ्यो यथासंख्यमुपलंभनादिष्वर्थेषु लस्य तङो भवति॥ उपलंभने—उपलंभनं प्रकाशनं शपनं आसेवनं च । देवदत्ताय शपते । अन्यत्र—देवदत्तं शपति आक्रोशति । आशिषि नाथः--सर्पिषो नाथते । सर्पिषो नाथेते । सर्पिर्मे भूयादित्याशास्ते । अन्यत्र मधु नाथति याचत इत्यर्थः । ङित्वमनर्थं । शिक्षो जिज्ञासायां —विद्यासु शिक्षते । अन्यत्र—भोक्तुं शिक्षति । शकेः सन्नंतस्येदं ग्रहणं । भुजादत्राणेऽपालने । त्राणं-पालनं-ओदनं भुङ्क्ते, उपभुङ्क्ते । अन्यत्र पृथिवीं भुनक्ति ।

**हृञो गतिताच्छील्ये** ॥ १३ ॥ ताच्छील्यं तद्स्वभावता । हरतेर्लस्य तङो भवंति गतेस्ताच्छील्ये गम्यमाने । पैतृकमश्वा अनुहरंते । पितुरागतं गमनं स्वभावतो गच्छतीत्यर्थः ।

**न्यस्संमाननाचार्यकभृत्युत्संजनज्ञानव्ययविगणने** ॥ १४ ॥ संमाननाचार्यकभृतिष्वर्थविशेषणेषु उत्संजनज्ञानव्ययविगणनेषु चार्थेषु नी इत्येतस्माद्धातोर्लस्य तङो भवंति ॥ संमाननं पूजनं । तत्र नयते विद्वान् वैद्ये । आचार्यस्य भावः कर्म वा आचार्यकं । तत्र-माणवकमुपनयते । भृतिर्वेतनं । तत्र-कर्मकरानुपनयते । ऊर्ध्वं संजनमुत्संजनमुत्क्षेपणं । माणवकमुदानयते । ज्ञानं प्रमेयानिश्चयः, तत्र नयते विद्वान् स्याद्वादे । धर्मादिषु विनियोगो व्ययः । तत्र—शतं विनयते । ऋणादेर्निर्यातनं विगणनं । तत्र—मद्राः करं विनयंते । एतेष्विति किं ? अजां नयति ग्रामं ।

**कर्तृस्थेऽतनावाप्ये** ॥१५॥ कर्तृस्थे अतनौ अशरीरे आप्ते कर्मणि सति नियतेर्लस्य तङो भवंति ॥ क्रोधं विनयते । हर्षं विनयते । शमयतीत्यर्थः । अतनाविति किं ? गडुं विनयति ।

**म्रियतेर्लुङ्लिङ्लले:** ॥१६॥ म्रियतेर्धातोर्लुङ्लिङ्लट्लङ्लेट्लेङ् इत्येतेषां लकाराणां तङो भवंति ॥ अमृत । मृषीष्ट । म्रियते । अम्रीयत । म्रीयतां । म्रीयेत । अन्यत्र—ममार । मर्तासि । मरिष्यति। अमरिष्यत् । तिङ्निर्देशात् ममर्ति ।

**क्यषो वा** ॥ १७ ॥ क्यषंताल्लस्तङो वा भवंति । निद्रायति । निद्रायते । पटपटायंति । पटपटायते ।

**लोः कृपः** ॥ १८ ॥ कृपेर्धातोर्लोरुकारानुबंधस्य लस्य तङो भवंति वा ॥ कल्सा । कल्पिता कल्प्तासि । काल्पितासि। लुङ्युत्तरेणापि सिद्धयति । लोरिति किं ? कल्पते ।

**द्युद्भ्यो लुङः** ॥१९॥ द्युतादिभ्यो धातुभ्यो लुङस्तङो वा भवंति ॥ व्यद्युतत् । व्यद्योतिष्ठ । अलुटत् । अलोटिष्ट । अशुभत् । अशोभिष्ट ।

Ac. Gunratnasuri MS Jin Gun Aradhak Trust

अरुचत् । अरोचिष्ट । अस्यदत् । अस्यदिष्ट । अक्लपत् । अकल्पिष्ट । लुङ् इति किं ? विद्योतितासे ।

**वृद्भ्यस्स्यसनोः** ॥ २० ॥ वृतादिभ्यः पंचभ्यः परौ यौ सस्यौ प्रत्ययौ ताभ्यां परस्य लस्य तङो भवंति वा ॥ विवृत्सति । विवर्तिषते । वर्त्स्यति । वर्तिष्यते । अवर्त्स्यत् । अवर्तिष्यत । चिकल्प्सति। चिकल्पिषते । कल्प्स्यति । कल्पिष्यते । अकल्प्स्यत् । अकल्पिष्यत । सस्यादिति किं ? वर्तते ।

**क्रमोऽनुपसर्गात्** ॥२१॥ अनुपसर्गात् क्रमेर्धातोर्लस्य तङो वा भवंति ॥ क्रमते । अनुपसर्गादिति किं ? संक्रमति ।

**वृत्तिसर्गतायने** ॥ २२ ॥ वृत्तिरात्मयापनमप्रतिबंधो वा । सर्गस्तात्पर्यमुत्साहो वा । तायनं संतानः पालनं वा । एतेष्वर्थेषु वर्तमानात् क्रमेर्धातोर्लस्य नित्यं तङो भवंति ॥ वृत्तौ—शास्त्रेषु क्रमते बुद्धिः । सर्गे—सूत्राय क्रमते । तायने क्रमतेऽस्मिन् योगाः । क्रमते राजा भुवं ।

**परोपात्** ॥२३॥ परा उप इत्येताभ्यां परस्य क्रमतेर्धातोर्लस्य तङो भवंति ॥ पराक्रमते । उपक्रमते ।

**वेः पादविक्षेपे** ॥२४॥ विपूर्वात् पादविक्षेपे वर्तमानात् क्रमेर्धातोर्लस्य तङो भवंति ॥ सुष्ठु विक्रमतेऽश्वः । अन्यत्र—विक्रामति राजा, उत्सहते इत्यर्थः । विक्रामत्याजिनसंधिः स्फुटतीत्यर्थः ।

**प्रोपाभ्यां समर्थाभ्यां** ॥ २५ ॥ प्र उप इत्येताभ्यां समर्थाभ्यां समानार्थाभ्यां परात् क्रमेर्लस्य तङो भवंति ॥ समानश्चार्थोऽनयोरादिकर्मांगीकरणं वा तत्र भवतीत्यर्थः । प्रक्रमते भोक्तुं। उपक्रमते भोक्तुं । प्रारभत इत्यर्थः । प्रक्रमते । उपक्रमते, शुश्रूषां । अंगीकरोतीत्यर्थः । समर्थाभ्यामिति किं ? पूर्वेद्युः प्रक्रामति, गच्छतीत्यर्थः । अपरेद्युरुपक्रामति आगच्छतीत्यर्थः ।

**ज्योतिरुद्गतावाङः** ॥ २६ ॥ ज्योतिषां चंद्रादीनामुद्गतौ वर्तमानात् आङ्पूर्वात् क्रमेर्लस्य तङो भवंति । आक्रमते चंद्रमाः । आक्रमंते ज्योतींषि । उद्गच्छंतीत्यर्थः । अन्यत्र—आक्रामति माणवकः कुतुपं । अवष्टभ्नातीत्यर्थः । उद्गति ग्रहणं किं ? नभः समाक्रामति भास्करः । करैः व्याप्नोतीत्यर्थः ।

**नुदाङ्प्रच्छः** ॥ २७ ॥ आङ्पूर्वेभ्यो नुदाऽप्रच्छिभ्यो लस्य तङो भवंति। आनुते श्रृगालः। धनमादत्ते । आपृच्छते गुरुं ।

**गमेः प्रतीच्छायां** ॥२८॥ गमेर्ण्यंतात् आङ्पूर्वात् प्रतीच्छायां प्रतिपालने वर्तमानात् लस्य तङो भवंति ॥ आगमयते गुरून् । आगमयस्व तावत् कंचित् कालं । प्रतीक्षस्वेत्यर्थः । अन्यत्र आगमयति विद्यां ।

**ह्वस्स्पर्धे** ॥२९॥ ह्वः ह्वेञोः धातोराङ्पूर्वात् स्पर्धेः लस्य तङो भवंति ॥ मल्लो मल्लमाह्वयते । स्पर्धमानः तस्याह्वानं करोतीत्यर्थः । अन्यत्र—गामाह्वयति ।

**संनिवेः** ॥ ३० ॥ सं नि वि इत्येवं पूर्वात् ह्वयतेर्लस्य तङो भवंति ॥ संह्वयते । निह्वयते । विह्वयते ।

**उपात्** ॥३१॥ उपपूर्वात् ह्वयतेर्लस्य तङो भवंति । उपह्वयते । योगविभाग उत्तरार्थः ।

**यमो विवाहे** ॥ ३२ ॥ उपपूर्वाद्यमेर्लस्य तङो भवंति विवाहे । कन्यामुपयच्छते । भार्यामुपयच्छते । अन्यत्र—शकटमुपयच्छति, स्वीकरोतीत्यर्थः ।

**स्थः पथिमैत्रीदेवार्चासंगममंत्रकरणे**॥३३॥ पथ्यादिविषयादुपपूर्वात्तिष्ठतेर्लस्य तङो भवंति ।

Ac. Gunratnasuri MS Jin Gun Aradhak Trust

पथिस्थोऽर्थ इति धातुरपि पथीत्युच्यते । अयं पंथाः स्रुघ्नमुपतिष्ठते । मैत्र्युपस्थानस्य हेतुः । रथिकान् उपतिष्ठते । महामात्रानुपतिष्ठते । देवार्चासंगममंत्रकरणानि धात्वर्थाः । देवार्चायां- जिनेन्द्रमुपतिष्ठते।संगमे-यमुना गंगामुपतिष्ठते । मंत्रकरणे–जगत्या उपतिष्ठते । आग्नेय्या अग्नींद्रमुपतिष्ठते । अन्यत्र–एतदेवास्य कार्पेयं यदर्कमुपतिष्ठति ।

**लिप्सौ वा** ॥ ३४ ॥ उपपूर्वात्तिष्ठतेर्लिप्सौ वर्तमानस्य लस्य तङो भवंति वा ॥ भिक्षुः ग्रहपतिकुलान्युपतिष्ठते उपतिष्ठति वा । लिप्समानमुपगच्छतीत्यर्थः ।

**उदोऽनूर्ध्वेहे** ॥ ३५ ॥ अनूर्ध्वे य ईहः चेष्टा व्यापारः तत्र वर्तमानात् उत्पूर्वात्तिष्ठतेः लस्य तङो भवंति ॥ शास्त्रे उत्तिष्ठते । चरणे उत्तिष्ठते । तत्रोद्योगं करोतीत्यर्थः।अनूर्ध्वेहे इति किं ? अस्माद् ग्रामाच्छतमुत्तिष्ठति । उत्पद्यत् इत्यर्थः। अनूर्ध्व ग्रहणं किं ? आसनादुत्तिष्ठति ।

**संविप्रावात्** ॥ ३६ ॥ सं वि प्र अव इत्येतत् पूर्वात् तिष्ठतेर्लस्य तङो भवंति ॥ संतिष्ठिते वितिष्ठते । प्रतिष्ठते । अवतिष्ठते ।

**स्थेयप्रकाशने** ॥ ३७ ॥ स्थेयः रूढिशब्दोऽयं । विवादपदे निर्णेता प्रमाणभूतः पुरुष उच्यते । स्थेयाविषयायां क्रियायां प्रकाशने च वर्तमानात् तिष्ठतेर्लस्य तङो भवंति।।त्वयि तिष्ठते। संशय्य कर्णादिषु तिष्ठते यः।प्रमाणभूते निर्णयाय तिष्ठतीत्यर्थः । तिष्ठते कन्या छात्रेभ्यः । स्वाभिप्रायं प्रकाशयतीत्यर्थः।

**प्रतिज्ञाने** ॥ ३८ ॥ प्रतिज्ञाने अभ्युपगमे वर्तमानात्तिष्ठतेर्लस्य तङो भवंति ॥ सदसदात्मकं तत्त्वमातिष्ठते ।

**समो गिरात्** ॥ ३९ ॥ संपूर्वात् गिरतेर्धातोः प्रतिज्ञाने लस्य तङो भवंति ॥ शतं संगिरते । अन्यत्र—संगिरति ग्रासं ।

**अवात्** ॥ ४० ॥ अवपूर्वात् गिरतेर्लस्य तङो भवंति ॥ अवगिरते ।

**संप्रतेर्ज्ञोऽस्मृतौ** ॥ ४१ ॥ सं प्रति इत्येवं पूर्वात् अस्मृतौ वर्तमानात् जानातेर्लस्य तङो भवंति ॥ शतं संजानीते । शतेन संजानीते । सहस्रं प्रतिजानीते । सहस्रेण वा।अन्यत्र-मातरं संजानाति। स्मरतीत्यर्थः ।

**निह्नवे** ॥ ४२ ॥ निह्नवोऽपह्नुतिः अपलापः । तत्र वर्तमानाज्जानातेर्लस्य तङो भवंति ॥ शतमपजानीते । सहस्रमपजानीते । अपह्नुत इत्यर्थः ।

**सनोऽननोः** ॥ ४३ ॥ संनताज्जानातेर्लस्य तङो भवंति । न चेत्सोऽनूपसर्गात् परो भवंति । धर्मं जिज्ञासते । अननोरिति किं ? धर्ममनुजिज्ञासति । औषधस्यानुजिज्ञासते इत्यकर्मके प्राग्वदिति भवति ॥

**श्रुवोऽप्रत्याङः** ॥ ४४ ॥ शृणातेस्सन्नन्ताल्लस्य तङो भवंति न चेत्स प्रत्याङ्भ्यां उपसर्गाभ्यां परो भवति ॥ धर्मं शुश्रूषते । अप्रत्याङ इति किं ? प्रतिशुश्रूषति । आशुश्रूषति ।

**स्मृदृशः** ॥ ४५ ॥ स्मरतेः दृशश्च संनताल्लस्तङो भवंति ॥ सुस्मूर्षते । दिदृक्षते ।

**प्राग्वत्** ॥ ४६ ॥ सनः प्राचः प्रकृतेर्लकारस्य यथा तङो भवंति तद्वत् संनतादपि लस्तङो भवंति ॥ एदिधिषते । निरासिसिषते । प्रयुयुक्षते । प्रकृतेस्तङभावे सनोऽपि न तङ् । द्वंद्वं यज्ञपात्राणि प्रयुयुक्षति । असामान्यादेशात् श्वा मुमूर्षति ।

**आमः कृञः** ॥ ४७ ॥ आमः परात्कृञः परस्य लस्यामः प्रकृतेर्लस्येव तङो भवंति ॥

Ac. Gunratnasuri MS Jin Gun Aradhak Trust

इहांचक्रे । समूहांचक्रे । समूहांचकार । कृञ इति किं ? ईक्षांबभूव ।

**न** ॥ ४८ ॥ आमः कृञो लस्तङो न भवंति॥ ञीदिति प्राप्तिः। उदुब्जांचकार। उदुंभांचकार ॥

**गधनावक्षेपसेवासाहसप्रतियत्नप्रकथाव्यये** ॥ ४९ ॥ गंधनादिष्वर्थेषु वर्तमानात् कृञो लस्तङो भवंति ॥ गंधनमपकारात्मकं सूचनं प्रोत्साहनादिकं वा । तत्र-उत्कुरुते । उदाकुरुते । अवक्षेपणमवक्षेपः कुत्सनं भर्त्सनं वा। दुर्वृत्तानवकुरुते । श्येनो वर्तिकामवकुरुते भर्त्सयतीत्यर्थः । सेवा अनुवृत्तिः गणकान् प्रकुरुते । महामात्रान् प्रकुरुते । सहसा प्रवृतिः साहसं । परदारान् प्रकुरुते। सतो गुणाधानं प्रतियत्नः । एधो दकस्योपस्कुरुते । कांडगुणस्योपस्कुरुते । प्रकर्षेण कथनं कथनप्रारंभो वा प्रकथा । जनवादान् प्रकुरुते । धर्माद्यर्थविनियोगो व्ययः। शतं प्रकुरुते।

**प्रहसनेऽधेः** ॥५०॥ अधिपूर्वात् प्रसहनेऽर्थे कृञो लस्तङो भवंति॥ प्रहसनमभिभवः अपराजयो वा । शत्रूनधिकुरुते । तं ह्य अधिचक्रे। अन्यत्राधिकरोति ।

**दीप्तिज्ञानेहाविमत्युपसंभाषोपमंत्रणे वदः** ॥ ५१ ॥ दीप्त्यादिषु विशेषणेषु उपसंभाषायामुपमंत्रणे चार्थे वदतेर्लस्तङो भवंति ॥ दीप्तौ-वदते विद्वान् स्याद्वादे । दीप्यमानो वदतीत्यर्थः । ज्ञाने-वदते विद्वान् वैद्ये । ज्ञात्वा वदतीत्यर्थः । ईहा उत्साहः । श्रुते वदते । तद्विषयमुत्साहं वदतीत्यर्थः । नाना मतिर्विमतिः । क्षेत्रे विवदंते, विमत्या किंचित् भाषंते। उपसंभाषा उपसांत्वनं उपालंभो वा।कर्मकरानुपवदते। उपसांत्वयति उपालभते वेत्यर्थः । उपमंत्रणं रहस्युपच्छंदनं । कुलभार्यामुपवदते । उपछंदयतीत्यर्थः । दीप्त्यादयः सर्वे धातोरर्था एवेत्यके अन्यत्र-देवदत्तो वदति ।

**व्यक्तवाचां सहोक्तौ** ॥ ५२ ॥ व्यक्तवर्णा वाग् येषां ते व्यक्तवाचः तेषां सहोक्तौ संभूयोच्चारणे वदतेर्लस्तङो भवंति ॥ संप्रवदंते जैनाः। व्यक्तवाचामिति किं ? संप्रवदंति कुक्कुटाः ।

**विप्रलापे वा** ॥ ५३ ॥ विरुद्धः प्रलापो विप्रलापः तदात्मिकानां व्यक्तवाचां सहोक्तौ वदतेः लस्तङो वा भवंति ॥ विप्रवदंते, विप्रवदंति भिषजः । अन्यत्र—संप्रवदंते वैयाकरणाः ।

**कर्मण्यसत्यनोः** ॥ ५४ ॥ अनोरुपसर्गाद्वदेर्व्यक्तवाचां संबंधिनो लस्य तङो भवंति कर्मण्यसति । अनुवदते देवदत्तो जिनदत्तस्य । यथा जिनदत्तो वदति तथा देवदत्तो वदति, पश्चाद्वदतीत्यर्थः । अनुसादृश्ये पश्चादर्थे वा । कर्मण्यसतीति किं ? जिनदत्तेनोक्तमनुवदति । पुनर्वदतीत्यर्थः।व्यक्तवाचामिति किं ? अनुवदति वीणा ।

**ज्ञोपस्थः** ॥ ५५ ॥ ज्ञा इत्येतस्मादुपपूर्वाच्च तिष्ठतेः कर्मण्यसति लस्तङो भवंति ॥ सर्पिषो जानीते । औषधस्य जानीते । तेनोपायेन प्रवर्तत इत्यर्थः । यावदोदनमुपतिष्ठते । योगे उपतिष्ठते । कर्मण्यसतीति किं ? स्वरेण पुत्रं जानाति। राजानमुपतिष्ठति ।

**समोऽर्तिस्वरतिश्रुदृश्विद्गम्प्रच्छृच्छः**॥५६॥ संपूर्वेभ्यः अर्त्यादिभ्यो धातुभ्यः लस्तङो भवंति कर्मण्यसति ॥ समीयृते । समरिष्यते। संस्वरते। संशृणुते । संपश्यते । संवित्ते । संगच्छते । संपृच्छते । संमृच्छते । संमृच्छिष्यते कर्मण्यसतीति किं ? रूपं संपश्यतीत्यादि ।

**वेः कृञः शब्दे चानाशे** ॥ ५७ ॥ विपूर्वात् करोतेरनाशेऽर्थे वर्तमानाल्लस्य तङो भवंति कर्मण्यसति शब्दे च कर्मणि ॥ विकुर्वते सैंधवाः साधुदांताः । वल्गतीत्यर्थः । शब्दे—विकुर्वते ।

Ac. Gunratnasuri MS Jin Gun Aradhak Trust

क्रोष्टा स्वरान् नानोपादयतीत्यर्थः। अनाश इति किं ? विकरोत्यद्यायं, विनाशयतीत्यर्थः ।

**यंग्रः स्वेंऽगे चाङः ॥ ५८ ॥** आङ्पूर्वात् यमेर्हंतेश्च लस्तङो भवंति कर्मण्यसति स्वे आत्मीये चांगे कर्तुः कर्मणि॥आयच्छते।आहते । स्वेंऽगे आयच्छते पाणिं । आहते शिरः । स्वेंऽगे चेति किं ? आयच्छति रज्जुं । आहंति वृषलं ।

**व्युदस्तपः ॥ ५९ ॥** वि उत् इत्येवं पूर्वात्तपेर्लस्तङो भवंति कर्मण्यसति स्वेंऽगे च कर्मणि । वितपते उत्तपते राजा।दीप्यते इत्यर्थः । स्वेंऽगे-वितपते । पाणिं । उत्तपते पृष्ठं । तापयतीत्यर्थः। स्वेंऽगे चेति किं ? वितपति पृथिवीं सविता । संतापयतीत्यर्थः ।

**न प्राणिन्यणिञो णिञंतस्य ॥ ६० ॥** प्राणिकर्तृविषयेऽर्थे वर्तमानादणिञंताद्धातोर्यो णिञ् तदंतात् परस्य लस्य तस्याणिञो णिञ्प्रकृतेः धातोः कर्मण्यसति तङो न भवंति ॥ ञीदिति प्राप्तिः। आस्ते देवदत्तः। आसयति देवदत्तं। शेते देवदत्तः शाययति देवदत्तं । प्राणिनीति किं ? शुष्यंति व्रीहयः,शोषयते व्रीहीन् । अणिञ इति किं ? आरोहयमाणं प्रयोजयति आरोहयते । णिञ इति किं ? आस्ते। शेते । कर्मण्यसतीति किं ? कटं कारयते ।

**अनात्मन्यनाध्याने ॥६१॥** अणिञंताद्धातोर्यो णिञ् तदंतात् परस्य लस्य तस्य णिञ्प्रकृतेरणिञः तद्वृत्तिसमुदायिनो धातोः कर्माणि कर्तरि वर्तमानस्य तङो भवंति । न चेत्तत्कर्मात्मा भवति स च णिञ्प्रकृतिर्धातुराध्याने स्मृतौ न वर्तते ॥ आरोहयंति हस्तिनं हस्तिपकाः । आरोहयते हस्ती स्वयमेव । पश्यंति भृत्याः राजानं । दर्शयते भृत्यान् राजा स्वयमेव। अनात्मनीति किं ? हन्त्यात्मानं। घातयत्यात्मा। आरोहयत्यात्मानं हस्ती । अनाध्यान इति किं ? स्मरति वनगुल्मं कोकिलः। स्मरयत्येनं वनगुल्मः।

**भीष्मिल्यां षाकारे ॥६२॥** भी स्मि ली इत्येतेषां धातूनां षाकारे यस्मिन्नर्थे णौ परे षकार आकारश्च क्रियते तस्मिन् वर्तमानानां णिञो लस्तङो भवंति । मुण्डो भीषयते। मुंडो भापयते। जटिलो विस्मापयते। जटाभिरालापयते। कस्त्वामुल्लापयते। श्येनो वर्तिकामुपलापयते । षाकार इति किं ? कुंचिकया भाययति । रूपेण विस्माययति। घृतं विलीनयति । विलाययति ।

**गृधिवञ्चोर्विप्रलंभे ॥६३॥** गृधिवंचोर्णिञंतयोर्विप्रलंभार्थे वर्तमानयोर्लस्तङो भवंति ॥ माणवकं गर्धयते । माणवकं वंचयते । प्रतारयतीत्यर्थः। अन्यत्र-श्वानं गर्धयति । कांक्षामस्योत्पादयतीत्यर्थः । अहिं वंचयति गमयतीत्यर्थः ।

**मिथ्याकृञोऽभ्यासे ॥६४॥** मिथ्याशब्देन योगे करोतेर्ण्यंतस्य लस्तङो भवंत्यभ्यासे । अभ्यासः पुनः पुनः क्रिया । सूत्रं मिथ्या कारयते। सोपचारं पुनः पुनः घोषयतीत्यर्थः। अन्यत्र-पदं मिथ्या कारयति सकृत् ।

**धेट्पादद्दमायमायस्परिमुहरुचिनृतिवद्वस्यचल्यद्यर्थेङ्मुद्रुसुबुधयुधनशजनः फलेशे पदाद्वते तु वा ॥६५॥** धेडादिभ्यः चल्यद्यर्थादिवर्जितेभ्यश्च धातुभ्यः परस्य णिञो लकारस्य फलेशे तत्क्रियाफलस्वामिनि कर्तरि वर्तमानस्य तङो भवंति, पदांतरात्तु प्रतीते फलेशत्वे वा भवंति ॥ धेट्-धापयते शिशुं । पा-पाययते देवदत्तं । अद्-आदयते देवदत्तेन । दम्-दमयते हस्तिनं । आयाम्-आयामयते सर्पं । आयस्-आयासयते । परिमुह-परिमोहयते । रुचि-रोचयते । नृति-नर्तयते । वद्-वादयते । वसि-वासयते देवदत्तं। चल्यद्यर्थादिवर्जितेभ्यः-

Ac. Gunratnasuri MS Jin Gun Aradhak Trust

कटं कारयते । ओदनं पाचयते । पदाद्वते तु वा । स्वपुत्रं धापयते धापयति वा । स्वं पुत्रं पाययति पाययते वा । धेटादिग्रहणं चल्यद्यर्थार्थं प्रणिकर्तृकार्थं च । चल्यद्यर्थादिप्रतिषेधः । किं ? अप्राणिकर्तृकार्थं सकर्मकार्थं च चल्यर्थाः । चालयति शाखां । कंपयति शाखां । गमयति ग्रामं देवदत्तं । अद्यर्थे-निगारयति ग्रासं । अभ्यवहारयत्योदनं । ग्रासयति रसं । आशयति भोजयति देवदत्तं । इङ्—सूत्रमध्यापयति । प्रु—प्रावयति राज्यं । द्रु-द्रावयत्ययः। स्रु—स्रावयति कुंडिकां । बुध-बोधयति शास्त्रं देवदत्तं । युध्—योधयति काष्ठं । नश-नाशयति दुःखं । जन-जनयति सुखं । फलेश इति किं ? पाचयति नियोगी । वस्तुतः फलेशेऽपि तदविवक्षायामपि न भवंति ॥

**ञीदिदपवदानुपसर्गज्ञः** ॥ ६६ ॥ ञितः ईदितः अपपूर्वस्य च वदेरनुपसर्गस्य जानातेर्धातोर्लस्य फलेशे कर्तरि तङो भवंति ॥ पदाद्वते तु वा ॥ ञित्-डुकृञ् कुरुते । डुधाञ्-धत्ते । ईदित् यजी-यजते । डुपचीष् पचते । अपवद धनकामो न्यायमपवदते । अनुपसर्गज्ञः-तंत्रं जानीते । पदाद्वते-स्वं दानं धत्ते दधाति।स्वमोदनं पचते, पचति । अपपूर्वग्रहणं किं ? वदति । अनुपसर्गग्रहणं किं ? पंथानं प्रजानाति । फलेशे इति किं ? पचंति भक्तकराः। 'कुर्वंति कर्मकराः'।

**यमस्समुदाङोऽग्रंथे** ॥ ६७ ॥ समादिभ्यः परस्य यमेर्लस्य फशेले कर्तरि तङो भवंति अग्रंथे—ग्रंथविषयश्चेत्प्रयोगो न भवति पदाद्वते तु वा ॥ संयच्छते व्रीहीन्। उद्यच्छते भारं । आयच्छते रज्जुं । पदाद्वते स्वान् व्रीहीन् संयच्छतेः । संयच्छति । अग्रंथग्रहणं किं ? उद्यच्छति चिकित्सितं । चिकित्सितग्रंथे उद्योगं करोतीत्यर्थः।

**न पर्याङ्वे रमः** ॥ ६८ ॥ परि आङ् वि इत्युपसर्गेभ्यः परस्य रमेर्लस्तङो न भवंति ॥ परिरमति । आरमति । विरमति ।

**उपात्** ॥ ६९ ॥ उपपूर्वाद्रमेर्लस्तङो न भवंति । उपरमति देवदत्तं रमयतीत्यर्थः ।

**वाऽकर्मकात्** ॥ ७० ॥ अकर्मकात् उपपूर्वात् रमेर्लस्तङो न भवंति वा । उपरमति, उपरमते संतापः । उपरमति, उपरमते अवद्यात् ।

**व्यादाञोऽपरांगे** ॥ ७१ ॥ व्याङ्पूर्वस्य दाञो लस्य तङो न भवंति । अपरांगे—परांगकर्मकश्चेत् स व्यादाञ् न भवति ॥ व्याददाति मुखं व्याघ्रः। व्याददाति पाटिका । अन्यत्र—व्याददते पिपीलिकाः पतंगमुखं ।

**परानोः कृः** ॥ ७२ ॥ परा अनु इत्येवं पूर्वस्य कृञो लस्तङो न भवंति । पराकरोति । अनुकरोति ।

**प्रत्यत्यभेः क्षिपः** ॥ ७३ ॥ प्रत्यादिपूर्वस्य क्षिपेर्लस्तङो न भवंति ॥ प्रतिक्षिपति । अति—क्षिपति । अभिक्षिपति ॥

**प्राद्वहः** ॥ ७४ ॥ प्रपूर्वस्य वहेर्लस्तङो न भवंति ॥ प्रवहति ।

**परेर्मृषेश्च** ॥ ७५ ॥ परिपूर्वस्य मृषेर्वहेश्च लस्तङो न भवंति । परिमृष्यति । परिवहति । कैश्चिच्चेन नेत्यनुकृष्यंते ।

**व्यतिहृतेऽगतिहिंसाशब्देहृवहश्चापरस्परान्योन्येतरेतरे** ॥ ७६ ॥ परस्परं संबंधिहरणं व्यतिहारः तस्य कर्म व्यतिहृतं तस्मिन् गतिहिंसाशब्दवर्जितेऽर्थे वर्तमानस्य हरतेर्वहतेरन्यस्य च धातोः लः कर्तरि वर्तमानस्य तङो भवंति परस्परादिष्वसत्सु । व्यतिलुनते शूद्राः । व्यतिभवते सेना । व्यतिसंहरंते राजानः। व्यतिभवंते नद्यः। अगतिहिंसाशब्द इति किं ? व्यतिगच्छंति व्यतिघ्नंति । व्यतिहसंति । व्यतिजल्पंति ।

Ac. Gunratnasuri MS Jin Gun Aradhak Trust

अपरस्परादेरिति किं ? परस्परस्य व्यतिलुनंति अन्योन्यस्य व्यतिलुनंति । इतरेतरस्य व्यतिलुनंति

**कर्मभावे ॥ ७७ ॥** कर्मणि भावे च यो लकारस्तस्य तङो भवंति । कर्मणि—क्रियते कटो देवदत्तेन । ह्रियते भारो देवदत्तेन । भावे भूयते देवदत्तेन । सुप्यते देवदत्तेन । कर्मभावयोरनेन विधिना कर्तरि गतः सर्वो विधिः ।

**माङ्लटश्शापेऽतङ्तङ्वच्छत्रानशौ ॥७८॥** धातोर्माङ्योगे शापे आक्रोशे यो लट् तस्य स्थानेऽतङ्तङ्वत् शत्रानशावादेशौ भवतः ॥ "मा जीवन् यः परावज्ञादुःखदग्धोऽपि जीवति" मा पचन् मा पचमानः । अत एव अस्मिन् विषये लट् ।

**सल्लड्वत्स्यल्लटो वानितौ ॥७९॥** सति वर्तमानेऽर्थे यो लट् वत्स्र्यति भाविष्यति यो लृट् तयोः स्थानेऽतङ्तङ्वच्छत्रानशावादेशौ भवतो वा । अनितौ-न चेत् इतिशब्दः प्रयोगे प्रयुज्यते यान् यांतौ । यांतः । शायानः, शयानौ, शयानाः । निरस्यन् । निरस्यमानः । पचन्, पचमानः । लृट्-यास्यन् । शयिष्यमाणः । वक्ष्यन् वक्ष्यमाणः । वावचनात्तिङोपि । याति । शेते । निरम्यति । निरस्यते । यास्यति । शयिष्यते । पचंतं । पचमानं । हे पचन् । हे पचमान । गच्छन् भक्षयति । शयाना भुंजते । अर्जयन् वसति । अधीयमानो वसति । पाचतः । वैक्षमाणः । पचद्भक्तिः । पचमानभक्तिरित्यत्राप्रथमासमानाधिकरणादौ तिङः संबधायोगात् नित्यावेवादेशौ भवतः । अनिताविति किं ? हंतीति पलायते । हरिष्यामीति व्रजति ।

**लिटः क्सुकानौ ॥८०॥** लिटः स्थानेऽतङ्तङ्वत् क्सुकानावादेशौ वा भवतः ॥ जग्मिवान् संयुगे । तस्थिवान् सः । पेचिवान् पेचानः । वाग्रहणात् जगाम । तस्थौ ।

**श्रिवण्वस्सदोऽनुवचश्च कर्तरि भूते ॥८१॥** श्र्वादिभ्यः अनुपूर्वाच्च वचेः परस्य भूतसामान्ये द्योत्ये कर्तरि लिटः अतङ्तङ्वत् क्सुकानावादेशौ वा भवतः ॥ श्र्वादिभ्यः क्सुः अनुवचः कानः एवार्थ एव पृथग्निर्देशः । शुश्रुवान् । उपशुश्रुवान् । ईयिवान् । समीयिवान् । ऊषिवान् । आसेदिवान् । अनूचानः । अनूचानौ । भूतग्रहणात् भूतसामान्ये द्योत्ये कर्तरि लिडनुमीयते तदभावे लुङ् । अश्रौषीत् । अगात् । अवात्सीत् । उपासदत् । अन्ववोचत् ।

**अनाश्वान् ॥८२॥** अश भोजन इत्येतस्मात् नञ्पूर्वात् कर्तरि भूते लिटः क्सुरिडभावश्च निपात्यते । अनाश्वान्, अनाश्वांसौ । अनाश्वांसः

**दयायास्कस्गुर्विजाद्यनेकाचोऽनृच्छूर्णोरां कृभ्वास्लिट्चानु ॥ ८३ ॥** दयादिभ्यः गुरुरिजादिर्येषां तेभ्यः अनेकाज्भ्यश्च धातुभ्यः ऋच्छत्यूर्णोतिवर्जितेभ्यः परस्य लिट आमादेशो भवति तस्य चामो लिडंताः कृभ्वस्तयः अनुपश्चादनंतरं प्रयुज्यंते । दयांचक्रे । दयांबभूव । दयामास । पलायांचक्रे।कासांबभूव । कासामास । गुर्विजादेः,—ईक्षांचक्रे ।उज्झांचकार । बुभूषांचकार लोलूयामास । अनृच्छूर्णोरिति किं ? आनर्च्छ । प्रोर्णुनाव ।

**जागृुषसमिंधो वा ॥८४॥** जागृ उष समिंध इत्येतेभ्य परस्य लिटः आं वा भवति कृभ्वास्लिट् चानुप्रयुज्यते । जागरांचकार । जागरांबभूव । जागरामास । जजागार । ओषांचकार । ओषांबभूव । ओषामास । उवोष । समिधांचक्रे । समिधांबभूव । सामिधामास । समींधे ।

**भीह्रीभृहोः श्लुवत् ॥८५॥** भी ह्री भृ हु इत्येतेभ्यः परस्य लिटः आं वा भवति स च

Ac. Gunratnasuri MS　　Jin Gun Aradhak Trust

श्लुब्वत् कृभ्वस्लिट् चानुप्रयुज्यते। विभयांचकार विभयांबभूव। विभयामास विभाय। जिह्वयांचकार। जिह्वयांबभूव। जिह्वयामास। जिह्वाय. बिभरांचकार। बभार। जुहवांचकार जुहाव। जुहवांचक्रे. जुहुवे।

**विदात्कित्** ॥ ८६ ॥ विद ज्ञान इत्येतस्माद्धातोर्लिट आमादेशो वा भवति सच कित् कृभ्वस्लिट् चानुप्रयुज्यते। विदांचकार। विदांबभूव। विदामास। विवेद। विदात्किद्वचनादामि स्थानित्वेन लिट्कार्यं द्विवचनादि न भवति ॥

**लेटः कृलेट्** ॥८७॥ विदाल्लेट आं वा भवति स च कित् लेडंतश्चास्य कृअनुप्रयुज्यते ॥ विदांकरोतु। वेत्तु। विदांकुरुतां। वेत्तां विदांकुर्वंतु। विदंतु।

**झोंऽतः** ॥८८॥ धातोर्लादेशस्यावयवझकारस्य अंत इत्यादेशो भवति। अदंति। एधंते। वर्द्धंते।

**द्व्युक्तिजक्षपंचतोऽत्** ॥८९॥ द्वे उक्ती यस्य स द्व्युक्तिः।द्विरुक्तः इत्यर्थः। पंचवर्गः पंचत् जक्षाणां पंचत् जक्षपंचत् जक्षादिपंचकमित्यर्थः। द्विरुक्तात् जक्षादिभ्यश्च पंचभ्यः परस्य लादेशावयवझकारस्य आदित्ययमादेशो भवति। दधति। दधतु। ददति, ददतु। जक्षति, जक्षतु। जाग्रति। दरिद्रति। चकासति। शासति।

**तङोऽनतः** ॥९०॥ तङो झकारस्यानकारादुत्तरस्य अदित्यादेशो भवति। चिन्वते। चिन्वतां अचिन्वत। लुनते। लुनतां। अलुनत। तङ इति किं? चिन्वंति। अनत इति किं? च्यवंते।

**शीङो रत्** ॥९१॥ शीङः परस्य तङो झकारस्य रदित्यादेशो भवति॥ शेरते। शेरतां। अशेरत।

**वेत्तेर्वा** ॥ ९२ ॥ वेत्तेरादादिकात्परस्य तङो झकारस्य रदादेशो भवति वा। संविद्रते। संविद्रतां। समविद्रत। संविदते संविदतां। समविदत। रौधादिकस्य न भवति। विंदते।

**एटितः** ॥ ९३ ॥ धातोर्विहितस्य टितो लकारस्य यस्तङ् तस्य एकारादेशो भवति। पचते। पचध्वे। पचंते। पचे। पचामहे। टित इति किं? अपचत। तङः इति किं? पचति।

**वह्यामो गेश** ॥ ९४ ॥ टितो लकारस्य तङो वहेरिकारस्यामश्च गेश् इत्यादेशो भवति॥ पचावहे इति। पचेते इति। पचेथे इति।

**थासस्से** ॥९५॥ टितो लकारस्य थासः से इत्यादेशो भवति। पचसे। पेचिषे। पक्तासे।पक्ष्यसे।

**लोराझाड्डारौरस्** ॥९६॥ लोष्टितो लकारस्य लुट आदेशस्य तङ आझात् त आतां झ इत्येतेषां यथाक्रमं डा रौ रस् इत्येते आदेशा भवंति। एधिता। एधितारौ। एधितारः।

**झेः** ॥ ९७॥ आ इति वर्तते। लोष्टितो लकारस्य लुटः आझेरादेशस्य तिप् तस् झि इत्येतेषां यथाक्रमं डा रौ रस् इत्येते आदेशाः भवंति॥ भविता। भवितारौ। भवितारः।

**लिटस्तझस्यैशिरे** ॥ ९८ ॥ लिडादेशयोस्त झ इत्येतयोः एश् इरे इत्येतौ यथाक्रमं आदेशौ भवतः।पेचे। पेचिरे। जग्मे ग्रामः। जग्मिरे ग्रामाः

**णमेरौशातः** ॥९९॥ आकारांताद्धातोर्लिटो णशामिपोरौशादेशो भवति। ददौ। तस्थौ। सः सुप्तोऽहं किल ययौ। पपौ।

**मिपोऽश्** ॥१००॥ धातोर्लिटो मिपः अश् इत्यादेशो भवतिऽणशोऽपवादः। वचनात्सोपि भवति। सुप्तोऽहं किल विललाप। विललाप। चकर, चकार।

**अतङाणणशतुसुस्थाथुसश्णश्वमाः**॥१०१॥ लिटोऽतङां नवानां यथासंख्यं णश्, अतुस्, उस्, थ, अथुस्, अश्, णश्, व, म इत्येते नवादेशा भवति पपाच। पेचतुः। पेचुः। पेचिथ। पपक्थ।

Ac. Gunratnasuri MS Jin Gun Aradhak Trust

पेचथुः।पेच । पपाच, पपच । पेचिव । पेचिम ।

**विदो लटो वा** ॥१०२॥ विदो धातोः परस्य लटः अतङां नवानां णशादयो वा भवंति । वेद । विदतुः । विदुः । वेत्थ । विदथुः । विद । वेद । विद्व । विद्म । पक्षे वेत्ति । वित्तः। विदंति वेत्सि । वित्थः । वित्थ । वेद्मि । विद्वः। विद्मः । लट इति किं ? विवेद । विविदतुः । विविदुः । अतङामिति किं ? विंते । विंदाते । विंदते ।

**शतुः क्वसुः** ॥१०३॥ विदेर्ल्लटः शतुः क्वसुरादेशो वा भवति । तत्त्वं विद्वान् । तत्त्वं विदन् साधुः ।

**ब्रुवस्तिप्पंचतो णशंपंचदब्रुश्चाहः** ॥१०४॥ ब्रूञो लटस्तिबादीनां पंचानां यथाक्रमं णशादयः पंचादेशा वा भवंति तत्संनियोगे च ब्रुव आह इत्यादेशो भवति । आह । आहतुः । आहुः ।आत्थ। आहथुः। पक्षे ब्रवीति।ब्रूतः।ब्रुवंति। ब्रवीषि।ब्रूथः ।

**एर्ङितो लुक्** ॥१०५॥ ङितो लकारस्यांतङ-एरिकारस्य लुग्भवति । अपचत् । अपचतां । अपचन् । अपचः ।

**आद्द्विषो झेर्जुस्वा** ॥१०६॥ आकारांतात् द्विषश्च धातोः परस्य ङिल्लादेशस्य झेर्जुस्वा भवति॥अपुः ।अपान् । अयुः।अयान् ।अद्विषुः । अद्विषन् । जेत् ।

**सिविदज्झेरभ्वः** ॥१०७॥ सिप्रत्ययांतात् विद अज्झेश्च धातोः परस्य ङिल्लादेशस्य झेर्जुस् नित्यं भवति ।अभ्वः—न चेत् स सि भुवः परो भवति । अकार्षुः। अहार्षुः । अदुः ।अधुः विदः—अविदुः । अज्झेः—अदधुः । अविभयुः । अजक्षुः।अशासुः । अभ्व इति किं ? अभूवन् ।

**लेलेः** ॥१०८॥ ङितो लकारस्य लेलेः लेङो लिङश्च झेर्जुस् भवति । पचेयुः । पच्यासुः ।

**ङ्याट्क्यासट्** ॥१०९॥ लेङादेशस्य लिङादेशस्य चातङो यथासंख्यं ङ्याट् क्यासट् इत्येतावागमौ भवतः । टीयोपवादः । लेङः यजेत् । यजेतां । यजेयुः । उच्यात् । जागृयात् लिङः—इज्यात् । इज्यास्तां । इज्यासुः । उच्यात् । जागर्यात् । ङित्कितोर्यञीति किजां कर्तरि च विशेषः ।

**रन्नौ झेलोः** ॥११०॥ ङितो लकारस्य लेलेः झ इत्येतयोर्यथासंख्यं रन् अत् इत्येतावादेशौ भवतः । पचेरन् । पक्षीरन् । पचेय । पक्षीय

**टीय्** ॥१११॥ लेङ लिङादेशस्य तङः टीयागमो भवति । पचेत । पचेयातां । पचेरन् । ह्नुवीत । ह्नुवीयातां । ह्नुवीरन् । ह्नुवीथाः । ह्नुवीयाथां।ह्नुवीध्वं । लिङः-सटा सह ब्रूमः ।

**सट् स्थीयां लिङः** ॥११२॥ लिङादेशस्य तकारथकारयोरीयश्च सडागमो भवति । पक्षीष्ट। पक्षीयास्तां । पक्षीष्ठाः । पक्षीयास्थां । कृषीष्ट । कृषीयास्तां । कृषीष्ठाः । कृषीयास्थां ।

**तस्थस्थवस्मस्मेस्तांतंतवमां लेटश्च** ११३ ङितो लेटश्च लस्य तस् थस् थ वस् मस् मि इत्येतेषां यथा संख्यं तां, तं, त, व, म अं इत्येते आदेशा भवंति ॥ ङितः—अपचतां । अपचतं । अपचत । अपचाव । अपचाम । अपचं । अपाक्तां । अपाक्तं । अपाक्त । अपाक्ष्व अपाक्ष्म । अपाक्षं । लेटः—पचतां । पचतं।पचत । पचाव । पचाम । लेटो मेः पचानि ।

**सीम्येर्हियुन्यां** ॥ ११४ ॥ लेटः सि इ मी ए इत्येतेषां यथाक्रमं हि उ नि आमित्येते आदेशा भवन्ति । लुनीहि । पुनीहि । पचतु । पचन्तु । पचानि । पठानि।पचतां ।पचेताम् । पचन्ताम् ।

**म्वेनादेष्टाप्** ॥ ११५ ॥ मकारवकारैकारन-कारादेर्लेडोदशस्य टाबागमो भवति । करवाव । करवाम । करवावहै । करवामहै । करवै । तनवै । करवाणि । तनवानि । टपावितौ ।

Ac. Gunratnasuri MS Jin Gun Aradhak Trust

**एतोऽगैप्** ॥११६॥ लेडादेशस्य म्वेनादेरेकारस्य ऐबादेशो भवति । आमोऽपवादः । अग्–अगकारानुबधंकः । करवै । करवावहै । करवामहै । चिनवै । चिनवावहै । चिनवामहै । अगिति किं ? पचावहायावां । पकार इत्यर्थः । तत्र हि परत्वादैत्वे टाबंस्य न स्यात् । नादेरेकाराभावादनुदाहरणं ।

**स्वो वां** ॥११७॥ लेडादेशस्य सकारवकाराभ्यां परस्य एकारस्य यथाक्रमं व अमित्यादेशौ भवतः ॥ पचस्व । पचध्वं । कुरुष्व । कुरुध्वं ।

**भृशादौ हिः** ॥ ११८ ॥ भृशेऽऽभीक्ष्ण्ये प्रचये च यो लेट् तदादेशस्य हिरादेशो भवति । लुनीहि लुनीहीति लुनाति । लुनीहि, लुनहीति लुनीतः । लुनीहि लुनीहीति लुनंति । व्रीहीन् वप ।लुनीहि पुनीहीति यतेते । यतेते । यतंते । एवं सर्ववचनानां । लेट इति किं ? व्रीहीन्वपति लुनाति पुनातीति यतते ।

**थस्य वा** ॥११९॥ भृशादौ लेटः थस्य हिरादेशो वा भवति ॥ लुनीहि लुनीहीत्येवं यं यं लुनीथ । लुनीत लुनीत इत्येवं यं यं लुनीथ । व्रीहीन्वप लुनीहि लुनीहीति यं यं यतध्वे । व्रीहीन्वपत लुनीत पुनीतेति यं यं यतध्वे ।

**ध्वेस्स्वः** ॥१२०॥ भृशादौ लेटः ध्वेः स्वादेशो भवति वा । अधीष्व अधीष्वेत्येवं यं यमधीध्वे । अधीध्वं अधीध्वमित्येवं यं यं अधीध्वे

**तङः** ॥ १२१ ॥ वेति निवृत्तं । भृशादौ लेटस्तङः नित्यं स्वादेशो भवति । हेरपवादः । अधीष्व अधीष्वेत्यधीते।अधीयाते । सूत्राण्यधीष्व वृत्तिमधीष्व । भाष्याणि अधीष्व ।

**तुह्योस्ताद्वाशिषि** ॥१२२॥ आशिषि लेटः तुह्योस्तादादेशो भवति वा । जीवतु जीवतात्भवान् । चिरंजीवतात्त्वं । अन्यत्र–जीवतु जीव ।

**हि चाप्**॥१२३॥हि च ताचादेश अप् पिन्न भवति। स्थानिवद्भावेन प्राप्तं पित्त्वं प्रतिषिध्यते । कुरु । लुनीहि लुनीहीति लुनाति। कुरुतात् । अत्रापित्व उत्वे त्वैङभावाः ।

इति शब्दानुशासने चिंतामणौ शाकटायनलघुवृत्तौ प्रथमस्याध्यायस्य चतुर्थः पादः । समाप्तश्चायमध्यायः ।

# ॥ द्वितीयाध्यायस्य प्रथमः पादः ॥

**सुप्सुपा समासो बहुलं** ॥ १ ॥ सुबंतं सुबंतेन सह समाससंज्ञं भवति बहुलं । विस्पष्टं पटुः विस्पष्टपटुः । विस्पष्टलवणं । व्यक्तपटुः । व्यक्तलवणं । सुबिति किं ? चरंति गावो अस्य। सुपेति किं ? देवदत्तः पठति । बहुलमिति प्रयोगानुसरणार्थं तेन क्वचिदसुबंतस्य सुपापि समस्यते । भात्यर्कं नभः। अनुव्यचलत् । अधिकारश्चायं द्वंद्वः समासोक्तौ इति यावत् ।

**सुज्वार्थे संख्या संख्यया संख्येये बहुव्रीहिः** ॥२॥ वारः सुजर्थः, विकल्पः संशयो वार्थः । अत्र संख्यावाचि सुबंतं संख्यावाचिना संख्येये वर्तमानेन सुबंतेन सह समाससंज्ञं भवति बहुव्रीहिसंज्ञं च । द्विर्दश द्विदशाः । द्विविंशाः । त्रिविंशाः । द्वौ वा त्रयो वा द्वित्राः । त्रिचतुराः । पंचषाः । अष्टादशाः । संख्येय इति किं ? द्विर्विंशतिर्गवां ।

Ac. Gunratnasuri MS Jin Gun Aradhak Trust

**आसन्नादूराधिकाध्यर्धार्धादिडद्वितीयाद्यन्यार्थे** ॥ ३ ॥ आसन्नादीन्यर्द्धपूर्वपदानि च डदंतानि संख्यावाचिना सुबंतेन सह समस्यंते संख्येये द्वितीयाद्यंतस्यान्यस्य पदस्यार्थेऽभिधेये स च समासो बहुव्रीहिर्भवति । आसन्नाः दश येषां ते आसन्नदशाः । नवैकादश वा । एवं आसन्नविंशाः। आसन्नत्रिंशाः । अदूरदशाः । अधिका दश येषु ते अधिकदशाः,एकादशादयः अवयवेन विग्रहः समुदायस्समासार्थः । एवमधिकविंशाः । अधिकत्रिंशाः । अध्यर्धविंशतिर्येषां ते अध्यर्धविंशाः त्रिंशदित्यर्थः । एवमध्यर्धविंशाः अध्यर्धचत्वारिंशाः । अध्यर्धपंचमाः विंशतयो येषां ते अर्धपंचमविंशाः । नवतिरित्यर्थः । एवमर्धचतुर्थविंशः सप्ततिः ।

**अव्ययं** ॥४॥ अव्ययं सुबंतं संख्यावाचिना सुबंतेन सह समस्यते संख्येये द्वितीयाद्यन्यार्थे स च समासो बहुव्रीहिः। उपगताः समीपं गताः दश येषां ते उपदशाः, नवैकादेश वा । एवमुपविंशाः। उपत्रिंशाः। एकार्थं चेत्येव सिद्धे प्रतिपदोक्त्या ''प्रमाणीसंख्याड्डः'' इत्यत्रैतत्संप्रत्ययार्थौ योगौ ।

**एकार्थं च** ॥५॥ एकस्समानोऽर्थो द्रव्यमधिकरणं यस्य तदेकार्थं समानाधिकरणमव्ययं च सुबंतं सुबंतेन सह द्वितीयाद्यन्यार्थे बहुलं समस्यते स च समासो बहुव्रीहिः । प्राप्तमुदकं यं स प्राप्तोदको ग्रामः । ऊढो रथो येन स ऊढरथो अनड्वान् । उपहृतो वलिर्यस्यै सा उपहृतवलिर्यक्षी । उद्धृत ओदनो यस्याः सा उद्धृतौदना स्थाली । चित्राः गावो यस्य स चित्रगुर्देवदत्तः । एवमविद्यमानपुत्रः। प्रपतितपर्णः। असिद्वितीयः। वीराः पुरुषा यस्मिन् स वीरपुरुषको ग्रामः । अव्ययं-उच्चैर्मुखं यस्य स उच्चैर्मुखः। नास्ति पुत्रो यस्य स अपुत्रः। अस्ति क्षीरं यस्याः सा अस्तिक्षारा गौः । सह पुत्रो यस्य येन वा सपुत्रः आगतः । एवं सभार्यः । सलोमकः। सपक्षकः। तद्वानित्यर्थः । ''धर्मादन् द्विपदात्'' इति लिंगाद्बहूनामप्ययं समासः । लोहितस्तक्षकः प्रियो यस्य स लोहिततक्षकप्रियः । एकार्थग्रहणं किं ? पंचभिर्भुक्तमस्य । द्वितीयाद्यन्यार्थ इति किं ? वृष्टे देवे गतः। बहुलाधिकारात् पंच भुक्तवंतो यस्य। अमा सार्धं सत्रा साकं पुत्राऽस्येत्यत्र न भवति । क्वचिदन्यत्रापि भवति । करे कृतं येन स कृतकरः । कंठेकालः । उरसिलोमाः । क्वचिन्नित्यः। प्रपर्णः। सुमुखी कन्या। कुशीलः पुरुषः। उष्ट्रस्य मुखमिव मुखं यस्य स उष्ट्रमुखः । पितृस्थान इत्यादौ वृत्तावुष्ट्रादिपदमुष्ट्रमुखादितुल्ये वर्तते इत्येकार्थत्वं ।

**मिथोग्रहणे प्रहरणे च सरूपं युद्धेऽव्ययीभावः** ॥ ६ ॥ मिथोऽन्योऽन्यं गृह्णंति यस्मिन् येन वा प्रहरंति वा तत्र वर्तमानं समानश्रुतिकं सुबंतं तत्रैव वर्तमानेन सुबंतेन सह समस्यते द्वितीयाद्यन्यार्थे युद्धेऽभिधेये स च समासोऽव्ययीभावसंज्ञो भवति । केशाश्च केशाश्च अन्योन्यस्य ग्रहणं यस्मिन्युद्धे तत् केशाकेशि । कचाकचि युद्धं । दंडाश्च दंडाश्च अन्योन्यप्रहरणं यस्मिन्युद्धे तत् दंडादंडि । मुष्टामुष्टि । अस्यासि वर्तते । स्वरूपमिति किं ? केशाश्च कचाश्च मिथो ग्रहणं यस्मिन्युद्धे ।

**नदीभिर्नाम्नि** ॥ ७ ॥ नदीवाचिभिस्सुबंतैस्सुबंतं द्वितीयाद्यन्यार्थे संज्ञाविषये समस्यते स च समासोऽव्ययीभावः । उन्मत्ता गंगा यस्मिन् तदुन्मत्तगंगं । लोहितगंगं । तूष्णींगंगं शनैर्गंगं।इमानि देशनामानि।अन्यत्र शीघ्रगंगो देशः

**संख्यावंश्यैश्च पूर्वपदार्थे** ॥८॥ वंशे भवो

Ac. Gunratnasuri MS Jin Gun Aradhak Trust

वंश्यः आद्यः पुरुषः । संख्यावाचि सुबंतं वंश्यवाचिभिर्नदीवाचिभिश्च सुबंतैःसह समस्यते पूर्वपदार्थेऽभिधेये अव्ययीभावश्च समासः । सप्त गंगाः सप्तगंगं । पंचनदं । सप्तगोदावरं । वंश्ये द्वौ मुनी वंश्यौ व्याकारणस्य । त्रिमुनि व्याकरणस्य । सप्तकाशि । त्रिकोशलमस्य राज्यस्य । त्रिमुनि व्याकरणमिति विद्यया तद्वतामभेदविवक्षा ।

**पारेमध्येंऽतषष्ठ्या** ॥ ९ ॥ पारे मध्ये अंतः इत्येतानि सुबंतानि षष्ठ्यंतेन सह समस्यंते पूर्वपदार्थेऽभिधेये स च समासोऽव्ययीभावः । तत्संनियोगे च एकारांतत्वं निपात्यते । गंगायाः पारं पारेगंगं । समुद्रस्य मध्यं मध्येसमुद्रं गंगायाः मध्यं मध्येगंगं । गिरेरंतः अंतर्गिरं । अंतर्गिरि । पूर्वपदार्थ इति किं ? गंगापारं । गंगामध्यं ।

**यावदवधारणे** ॥ १० ॥ अवधारणमियत्तापरिच्छेदः । तस्मिन् गम्यमाने यावदित्येतत्सुबंतं सुबंतेन सह समस्यते पूर्वपदार्थे स च समासोऽव्ययीभावः । यावंति अमत्राणि यावदमत्रं । यावानोदनः, यावदोदनं । यावानवकाशः, यावदवकाशं अतिथीन् भोजय । निर्ज्ञातपरिमाणेनामत्रादिनातिथिपरिमाणमिहावधार्यते ।

**बहिः पर्यपाङ् च** ॥ ११ ॥ बहिरादि सुबंतं सुबंतेन सह पूर्वपदार्थे समस्यते स च समासोऽव्ययीभावः । बहिर्ग्रामात् । बहिर्ग्रामं । परित्रिगर्तेभ्यः-परित्रिगर्तं । अपरित्रिगर्तं । आपाटलिपुत्रं वृष्टो देवः । प्राग्ग्रामात्—प्राग्ग्रामं । उदग्ग्रामं । अपगतः शाखाया अपशाखः । इत्यत्र सुपः प्रतिपदविहितस्य ग्रहणान्न भवति ।

**लक्षणेनाभिप्रत्याभिमुख्ये** ॥ १५ ॥ अभि प्रति इत्येतौ सुबंतौ आभिमुख्ये वर्तमानौ लक्षणवाचिना सुबंतेन पूर्वपदार्थेऽभिधेये समस्यते स चाव्ययीभावः । अग्निमभि, अभ्यग्नि । अभ्यरण्यं । अग्निं प्रति प्रत्यग्नि । प्रत्यरण्यं शलभाः पतंति । लक्षणेनेति किं ? साधुर्देवदत्तो मातरमभि । आभिमुख्य इति, किं ? वृक्षं प्रति विद्योतते विद्युत् ।

**दैर्घ्येऽनुः** ॥ १३ ॥ अन्वित्येतत्सुबंतं दैर्घ्ये आयामविषये यल्लक्षणं तद्वाचिना सुबंतेन सह समस्यते पूर्वपदार्थे स चाव्ययभिावः । गंगामनु अनुगंगं वाराणसी । अनुयमुनं मथुरा । दैर्घ्य इति किं ? वृक्षमनु विद्योतते विद्युत् ।

**समीपे** ॥ १४ ॥ अनु इत्येतत् सुबंतं समीपेऽर्थे वर्तमानं अर्थात् समीपवाचिना सुबंतेन सह समस्यते पूर्वपदार्थे स च समासोऽव्ययीभावः । वनस्यानु अनुवनं । ग्रामस्यानु अनुग्रामं ।

**तिष्ठद्ग्वादयः** ॥ १५ ॥ तिष्ठद्गु इत्येवमादयः समासा अव्ययीभावसंज्ञा निपात्यंते यथा योगं पूर्वपदार्थाभिधेये । तिष्ठद्गु । वहद्गु । अधोनाभं ! एकांतं । इत्यादयः ।

**नित्यं प्रतिनाल्पे** ॥ १६ ॥ अल्पेऽर्थे वर्तमानेन प्रतिशब्देन सुपा सुबंतं नित्यं समस्यते स चाव्ययीभावः ॥ अल्पः सूपः सूपप्रति । शाकप्रति । नित्यग्रहणं वाक्यनिवृत्त्यर्थं । तेनाऽन्यत्र वृत्तिर्वाक्यं च भवति ।

**परिणाक्षशलाकासंख्यं द्यूतेऽजये** ॥ १७ ॥ अक्ष शलाका संख्यावाचि च इत्येतत्सुबंतं परिणा सुपा नित्यं समस्यते स चाव्ययीभावः । द्यूतविषयेऽजये द्योत्ये । अक्षेणैकेन न तथा वृत्तं यथा जये अक्षपरि । शलाकापरि । एकेन अक्षेण न तथा वृत्तं यथा जये । एकपरि । द्विपरि । अजय इति किं ? पंचपरीति मा भूत् । पंचका नाम द्यूतं पंचभिरक्षैः शलाकाभिर्वा दीव्यते तत्र पंचाप्येकरूपा भवंति उत्ताना अवताना व तदा पातयितुर्जयः ।

Ac. Gunratnasuri MS Jin Gun Aradhak Trust

**शब्दप्रथासंपत्समृद्धिव्यृद्ध्यर्थाभावात्ययासंप्रतिसुप्पश्चाद्युगपद्यथासदृक्साकल्यांतेऽव्ययं** शब्दप्रथादावर्थे वर्तमानमव्ययं सुबंतं सुपा नित्यं समस्यते पूर्वपदार्थे स च समासोऽव्ययीभावः ॥ शब्दप्रथा प्रकर्षेण ख्यातिः । इतिशिवार्यं । अहोशिवार्यं वर्तते । शिवार्यशब्दो लोके सुष्ठु प्रथित इत्यर्थः । संपदन्यूनत्वं । क्षत्रस्य संपत् सक्षत्रं । समृद्धिर्ऋद्धेराधिक्यं । मद्राणां समृद्धिः सुमद्रं । व्यृद्धिः ऋद्धेरभावः । यवनानां व्यृद्धिः दुर्यवनं । अर्थाभावः धर्मिणोऽसत्त्वं । मक्षिकाणामभावो निर्मक्षिकं । निर्वातं । अत्ययो अतीतत्वमतिक्रमः । शीतस्यात्ययो निश्शीतं । निस्तृणं निशीते याहि । असंप्रतीत्युपभोगादेर्वर्तमानकालप्रतिषेधः । कंबलस्यायमकालः इत्यतिकंबलं । अत्याम्रं । सुबर्थे-स्त्रीषु अधिकृत्य अधिस्त्रि । अधिकुमारि । पश्चादर्थे रथानां पश्चात् अनुरथं । पादांतं । युगपच्चक्रेण चक्रे वा देहि सचक्रं देहि । यथार्थे योग्यतायां—रूपस्य योग्यमनुरूपं । वीप्सायां-अर्थं अर्थं प्रति प्रत्यर्थं । पदार्थानतिवृत्तौ ज्येष्ठानामनतिवृत्त्या अनुज्येष्ठं प्रविशन्तु । सादृश्ये शीलस्य सादृश्यं सशीलमनयोः । सदृक् सदृशो देवदत्तेन-सदेवदत्तं । साकल्यमनवशेषः—सतृणं । सतुषमभ्यवहरति । अंतः समीपमवसानं च—कुंभस्य समीपमुपकुंभं । भाष्यमंतं कृत्वा समाष्यमधीते ।

**यथाथाः** ॥ १९ ॥ यथा इत्येतदथा प्रत्ययांतमव्ययं सुपा नित्यं समस्यते पूर्वपदार्थे स च समासोऽव्ययीभावः । रूपस्य योग्यं यथारूपं । मार्गानतिवृत्त्या यथामार्गं । ये ये वृद्धा यथावृद्धं अभ्यर्चय । अथेति किं ? यथा जिनदत्तः तथा गुरुदत्तः "प्रकारे था" इति था ।

**तिदुस्स्वत्याङ्क्वन्यस्तत्पुरुषः** ॥२०॥ तिसंज्ञानि दुस् सु अति आङ् कु इत्येतानि चाव्ययानि सुबंतानि सुपा नित्यं समस्यंते स च समासोऽन्यो बहुव्रीह्यादिलक्षणरहितस्तत्पुरुषसंज्ञो भवति ॥ प्रगत्य । पटपटाकृत्य । ऊरीकृत्य । दुस्—निंदितः पुरुषः दुष्पुरुषः । दूराजः । सु शोभनः पुरुषः सुपुरुषः । सुराजा । आतिराजा । अतिवृत्तं । सुसाहचर्यादतिः पूजायां समस्यते नातिक्रमे । ईषत् पिंगलः आपिंगलः । पापः पुरुषः कुपुरुषः । ईषदुष्णं कोष्णं । अन्य इति किं ? निंदितः पुरुषो यस्य स दुष्पुरुषः, अत्र बहुव्रीहित्वात् कच् । मद्राणां समृद्धिः सुमद्रं । इत्यत्राव्ययीभावत्वादं ।

**गतादिषु प्रादयः** ॥२१॥ प्र इत्येवमादि सुबंतं गतादावर्थे वर्तमानं सुपा नित्यं समस्यते स च समासोऽन्यस्तत्पुरुषो भवति ॥ प्रगतः आचार्यः प्राचार्यः । प्रकृष्टो वीरः प्रवीरः । संगतोऽर्थः समर्थः । आतिक्रांतः खट्वामतिखट्वः । उद्गतो वेलामुद्वेलः । अवकृष्टः कोकलया अवकोकिलः । परिणद्धो वीरुद्भिः परिवीरुत् । सन्नद्धो वर्मणा सुवर्मा । परिग्लानोऽध्ययनाय पर्यध्ययनः । उद्युक्तः संग्रामाय उत्संग्रामः । निष्कांतः कौशांब्याः निष्कौशांबिः । अपगतः शाखायाः अपशाखः । अंतर्गतो अंगुल्याः अंतरंगुलो नखः । उरसि प्रतिष्ठितं प्रत्युरसं । गतादिष्विति किं ? अतिसिक्ता । अन्य इति किं ? प्राचार्यको देशः

**स्वकृतास्युक्तं** ॥ २२ ॥ स्वाश्रयः कृत् स्वकृत् असिना पंचम्येकवचनेनाभिहितमस्युक्तं यस्मात् पराद्धातोर्यः कृद्विहितः तदस्युक्तं सुबंतं तेन स्वकृदंतेन सुपा नित्यं समस्यते तत्पुरुषश्च समासो भवति ॥ "कर्मणोऽण्" ४।३।१०९॥ कुंभकारः । नगरकारः । अस्युक्तमिति किं ? "निषेधेऽलंखलौ क्त्वा,, खलुकृत्वा ।

Ac. Gunratnasuri MS Jin Gun Aradhak Trust

टा ॥ २३ ॥ नित्यमिति निवृत्तं । टा इति तृतीयैकवचनोक्तं स्वकृता समस्यते वा तत्पुरुषश्च समासो भवति ॥ तृतीययोपदंशः । मूलकोपदंशं भुंक्ते । मूलकेनोपदंशं भुंक्ते ।

नञ् ॥ २४ ॥ नञित्येतत्सुबंतं सुपा समस्यते वा तत्पुरुषश्च समासो भवति ॥ नगौः । अगौः । अनश्वं । अनेकं । अवर्षाः । असर्वस्मै। असः । अन्य इत्येव, न विद्यते मक्षिका यस्य यस्मिन्वा सः अमक्षिको देशः।मक्षिकाणामभावः अमाक्षिकं ञित् ।

पूर्वापराधरोत्तरमंशिनाभिन्नेन ॥ २५ ॥ अंशो अवयवः एकदेशः तद्वानंशी पूर्वादीन्यंशवाचीनि सुबंतानि अशंवाचिना सुपा समस्यंते वा तत्पुरुषश्च समासः अभिन्नेन—न चेत् सोंऽशी भिन्नः तेन । पूर्वं कायस्य पूर्वकायः।अपरकायः। अधरकायः । उत्तरकायः । अंशिनेति किं ? पूर्वं नाभेः कायस्य । अभिन्नेनेति किं ? पूर्वं छात्राणां । प्रसज्यप्रतिषेधत्वादत्र न भवति ॥ पूर्वं पाणिपादस्य ।

समेऽर्धे ॥ २६ ॥ अर्धशब्दः प्रविभागे वर्तते । तस्य सम इति विशेषणं।समे प्रविभागे वर्तमानमर्धमित्येतत्सुबंतमंशवाचि अंशिवाचिना अभिन्नेन सुपा वा समस्यते स समासोऽयं तत्पुरुषसमासो भवति। अर्धं पिप्पल्याः अर्धपिप्पली। अर्धखट्वा । सम इति किं ? ग्रामार्धो देशः । अभिन्नेनेति किं ? अर्धं पिप्पलीनां ।

द्वित्रिचतुर्डद्वा ॥ २७ ॥द्व्यादिभ्यो यो डदंतं सुबंतमंशवाचि अंशिना सुपा समस्यते वा स समासः तत्पुरुषो भवति। न चेत्सोंऽशी भिन्नः। द्वितीयं भिक्षायाः द्वितीयभिक्षा, भिक्षाद्वितीयं वा । एवं तृतीयभिक्षा, भिक्षातृतीयं वा । चतुर्थभिक्षा, भिक्षाचतुर्थं वा । तुरीयभिक्षा, भिक्षातुरीयं वा । द्वित्रिचतुरिति।किं?पंचमं भिक्षायाः । डदिति किं ? द्वौ भिक्षायाः । अंशिनेति किं ? द्वितीयं भिक्षायाः भिक्षुकस्य भिक्षुकेण न समासः । अभिन्नेनेति किं ? द्वितीयं भिक्षाणां ।

कालो द्विगौ च मेयैः ॥ २८ ॥ कालवाचि सुबंतं केवलं द्विगौ च विषये वर्तमानं मेयवाचिना सुपा समस्यते वा स समासः तत्पुरुषो भवति ॥ मासो जातस्य मासजातः। स्त्री मासजाता । संवत्सरजाता । मासमृतः । द्विगौ-द्वे अहनी जातस्य द्व्यह्नजातः ।त्र्यह्नजातः । मेयैरिति किं ? मासो देवदत्तस्य। षष्ठीसमासापवादाश्चत्वारो प्रयोगाः ।

स्वयं सामि क्तेन ॥ २९ ॥ स्वयं सामि इत्येतौ सुबंतौ क्तप्रत्ययांतेन सुपा समस्येते वा स च समासस्तत्पुरुषो भवति।स्वयंधौतौ पादौ। स्वयं विलीनमाज्यं । सामिकृतं । सामिभुक्तं । समासे स्वायंधौतिरित्यादि सिद्धं ।

द्वितीया खट्वा क्षेपे॥३०॥खट्वा इत्येतत् द्वितीयांतं क्तांतेन सुपा समस्यते क्षेपे निंदायां गम्यमानायां स च तत्पुरुषसमासः । क्षेपस्समासार्थो न वाक्येन गम्यते इति नित्य एवायं समासः । खट्वारूढः । खट्वाप्लुतो जाल्मः । उत्पथप्रस्थित एवमुच्यते । अन्यत्र-खट्वामारूढाः ।

कालः ॥३१॥ कालवाचि द्वितीयांतं क्तांतेन सुपा समस्यते वा स समासम्तत्पुरुषः । अहः अतिसृता अहरतिसृताः मुहूर्ताः। रात्रिसंक्रांताः। रात्र्यारूढाः । षण्मुहूर्ताश्चराचरा उच्यंते । मासं प्रमितः मासप्रमितश्चंद्रमाः। मासप्रमातुमारब्धः प्रतिपच्चंद्र उच्यते । अव्याप्त्यर्थं वचनं ।

व्याप्तौ ॥ ३२ ॥ व्याप्तौ या द्वितीया तदंतः कालवाची शब्दः व्यापकवाचिना सुपा

Ac. Gunratnasuri MS Jin Gun Aradhak Trust

समस्यते वा तत्पुरुषसमासो भवति ॥ मुहूर्तं सुखं मुहूर्तसुखं । मुहूर्तरमणीयं । सर्वरात्रकल्याणी । सर्वरात्रशोभना ।

**श्रितादिभिः** ॥३३॥ द्वितीयांतं श्रितादिभिः सुबंतैर्वा समस्यते स च समासस्तत्पुरुषसंज्ञो भवति ॥ धर्मं श्रितो धर्मश्रितः । दुःखातीतः । नरकपतितः । ओदनबुभुक्षुरित्यादयः ।

**प्राप्तापन्नं तयाऽऽच** ॥३४॥ प्राप्तापन्न इत्येतौ सुबंतौ तया द्वितीयांतेन सह समस्यते वा स च समासस्तत्पुरुषो भवति ॥ तत्संनियोगे च तयोरकारादेशः । प्राप्तो जीविकां प्राप्तजीविकः । आपन्नो जीविकां आपन्नजीविकः । प्राप्तगवः । प्राप्ता जीविकां प्राप्तजीविका । आपन्नगवी । अद्वचनं स्त्र्यर्थं ।

**ईषद्गुणवचनैः** ॥ ३५ ॥ ईषदित्येतत्सुबंतं गुणवचनैः सह समस्यते वा स तत्पुरुषसमासः । गुणमुक्तवंतो गुणवचनाः । ईषदल्पं पिंगलः ईषत्पिंगलः । ईषदुन्नतः । ईषद्रक्तः । ईषत्कडारः । ईषत्पिंगलस्येदमैषात्पिंगलः ।

**तृतीया तत्कृतैः** ॥२॥१॥३६॥ तृतीयांतं तत्कृतैस्तृतीयांतार्थकृतार्थैर्गुणवचनैः समस्यते वा स तत्पुरुषसमासो भवति ॥ शंकुलया कृतः खंडः शंकुलाखंडः देवदत्तः । शंकुलाखंडो दवदत्तस्य गिरिणा काणः गिरिकाणः । क्षारेण शुक्लः क्षारशुक्लः । त्रिभिः कृतो भागः त्रिभागः । कृतार्थो वृत्तावंतर्भूतः । तत्कृतैरिति किं ? अक्ष्णा काणः । पादने खंजः । गुणवचनैरिति किं ? धान्येन धनवान् ।

**साधनं कृता** ॥३७॥ साधनं कारकं क्रियानिर्वर्तकं । तदिह कर्ता करणं च तद्वाचि तृतीयांतं कृत्प्रत्ययांतेन सुपा समस्यते वा स च समासस्तत्पुरुषो भवति ॥ आत्मना कृतं आत्मकृतं । परकृतं । दात्रलूनं । परशुच्छिन्नं । देवदत्तनखानिर्भिन्नं । अधिकार्थवचने घ्यपा समासमाहुः—काकपेया नदी । श्वलेह्यः कूपः । कंटकसंचेयः ओदनः । वाष्पच्छेद्यानि तृणानि । कुक्कुटसंपात्याः ग्रामाः ।

**पूर्वाद्यूनार्थैः** ॥ ३८ ॥ पूर्वादिभिरूनार्थैश्च सुबंतैः तृतीयांतं समस्यते वा स च तत्पुरुषसमासः । मासेन पूर्वः मासपूर्वः । मासावरः । धान्यार्थः । हिरण्यार्थी । ऊनार्थैः—मासोनं । मासविकलं । कार्षापणोनं । कार्षापणविकलं ।

**चतुर्थी प्रकृतिस्वार्थार्थादिभिः** ॥ ३९ ॥ स्वार्थेत्यर्थविशेषणं । प्रकृतिः परिणामि द्रव्यं । तद्वाचिना सुबंतेनार्थाद् विकृतिवाचिस्वार्थेन चतुर्थ्यर्थाभिधायिनार्थशब्देन तदादिभिश्चान्यैस्सुबंतैः सह चतुर्थ्यंतं समस्यते वा स समासस्तत्पुरुषो भवति ॥ रथाय दारु रथदारु । कुण्डलहिरण्यं । स्वार्थार्थैः-पित्रे इदं पित्रर्थं । स्वाम्यर्थं श्र्यर्थं । कुडल्यर्थं । तदादि-कुबेरबलिः । प्रजाहितं । अश्वघासः । हस्तिविदा । धर्माय रक्षितश्चोरः धर्मरक्षितः ।

**तयालं** ॥ ४० ॥ तया चतुर्थ्यंतेन अलमित्येतत्समस्यते वा स च समासस्तत्पुरुषो भवति । अलं जीविकायै अलंजीविकः । अलंकुमारिः । तयेति किं ? अलमतिप्रसंगेन ।

**पंचमी भयादिभिः** ॥ ४१ ॥ पंचम्यंतं भयादिभिस्सुबंतैस्समस्यते वा स च तत्पुरुषसमासः ॥ वृकाद् भयं वृकभयं । धनापेतमित्यादयः ।

**क्तेनासत्त्वे** ॥ ४२ ॥ असत्त्वे वर्तमाना या पंचमी तदंतं क्तप्रत्ययांतेन सुपा समस्यते वा स च तत्पुरुषसमासः । स्तोकान्मुक्तः । कतिपयान्मुक्तः । दूरादागतः । अंतकादागतः । स्तोकान्मोक्षः ।

**षष्ठ्ययत्नात्** ॥ ४३ ॥ षष्ठ्यंतं सुबंतं सु-

बंतेन सह समस्यते वा स च तत्पुरुषसमासो भवति न चेत्सा यत्नात् विशेषात् प्रापिता भवति। राज्ञः पुरुषः राजपुरुषः । ब्राह्मणकंबलः । राज्ञां गोक्षीरः राजगोक्षीरः। राजगव्याः क्षीरं राजगवीक्षीरं । । देवदत्तस्य यो गुरुः तस्य कुलं देवदत्तस्य गुरुकुलं । वृद्धस्य राज्ञः पुरुषः इत्यादौ सापेक्षस्यागमकत्वान्नास्ति समासः । अयत्नादिति किं ? शतस्य द्यूतं सर्पिषो ज्ञानमित्यादौ न भवति । धर्मानुस्मरणमर्थानुचिंतनमिति कृद्योगे षष्ठी सा च न कर्तरीत्यादिप्रतिषेधात् समस्यते ।

**याजकादिभिः** ॥ ४४ ॥ याजक इत्येवमादिभिः शब्दैः षष्ठ्यंतं समस्यते वा स च तत्पुरुषसमासः ॥ ब्राह्मणानां याजकः ब्राह्मणयाजकः । साधुपूजकः ।

**पत्तिरथं गणकेन** ॥ ४५ ॥ पत्ति रथ इत्येतौ षष्ठ्यंतौ गणकेन सुपा समस्यते वा स च तत्पुरुषसमासः । पत्तीनां गणकः पत्तिगणकः । रथगणकः ।

**वुनाजीवे** ॥ ४६ ॥ वुप्रत्ययांतेन सुपा षष्ठी समस्यते स च तत्पुरुषसमास आजीवे। आजविः समासार्थः न वाक्येन गम्यत इति नित्यसमासः दंतलेखकः । नखलेखकः । रमणीयकारकः । अन्यत्र—ओदनस्य भोजकः । पयसः पायकः ।

**न कर्तरि** ॥ ४७ ॥ कर्तरि या षष्ठी सा वुप्रत्ययांतेन न समस्यते ॥ भवत आसिका । भवतश्शायिका । भवतोग्रगामिका । कर्तरीति किं ? इक्षुभक्षिका मे धारयसि ।

**कर्मणि त्रा च** ॥ ४८ ॥ कर्तरीति वर्तते । तदिह वोर्विशेषणं कर्तरि विहितो यो वुप्रत्ययः तृप्रत्ययश्च तदंतेन सुपा कर्मणि षष्ठी न समस्यते ओदनस्य भोजकः । सक्तूनां पायकः । अपां स्रष्टा । पुरां भेत्ता । कर्मणीति किं ? जनिकर्ता । गुणो गुणी विशेषकः । भूभर्तेति याजकादि ॥

**तृतीयायां** ॥ ४९ ॥ कर्तरि तृतीयायां सत्यां कर्मणि षष्ठी न समस्यते । आश्चर्यो गवां दोहः अगोपालकेन । साध्विदं शब्दानामनुशासनमाचार्येण । तृतीयायामिति किं ? साध्विदं शब्दानामनुशासनमाचार्यस्य । साध्वी कटचिकीर्षा देवदत्तस्य ।

**तृप्तार्थाव्ययनिर्धार्यडच्छत्रानश्मतिपूजाधारक्तैः** ॥५०॥ तृप्तार्थैरव्ययैर्निर्धार्यवाचिभिर्डदंतैश्शत्रंतैरानशंतैर्मतिपूजार्थैरिति मत्यर्थात् पूजार्थाच्च वर्तमाने यः क्तः गत्यकर्मण्याधारे च आदाविति चाधारे यः क्तः तदंतैश्च सुबंतैः षष्ठी न समस्यते ॥ तृप्तार्थैः—फलानां तृप्तः सुहितः, पूर्णः, आशितः । अव्ययं-राज्ञः साक्षात् । ग्रामस्य पुरस्तात् । देवदत्तस्य कृत्वा । जिनदत्तस्य प्रकृत्य । अव्ययीभावस्याप्यन्वर्थविज्ञानादयं प्रतिषेध इष्यते । देवदत्तस्योपकुंभमित्येके । निर्धार्ये गवां कृष्णा गौः संपन्नक्षीरतमा । डत्-तीर्थकराणां षोडशः चक्रधराणां पंचमः शांतिः । छात्राणां द्वितीयः । शतृ-देवदत्तस्य पचन्, पक्ष्यन्, द्विषन् । आनश्—देवदत्तस्य पचमानः पक्ष्यमाणः । मतिक्तः-राज्ञां मतः, संमतः, इष्टः बुद्धः, विदितः । पूजाक्तः—राज्ञां पूजितः, अर्चितः । आधारक्तः-इदमहेः सृप्तं, यातं, इदमेषामासितं, शयितं, भुक्तं, पीतं । एतैरिति किं ? ऋषिकर्तव्यं । फलशातनः।

**गुणैरस्वस्थैः** ॥ ५१ ॥ अस्वस्थैर्गुणैः सह षष्ठ्यंतं न समस्यते ॥ काकस्य कार्ष्ण्यं । बलाकायाः शैक्ल्यं । वृषलस्य धार्ष्ट्यं । कंटकस्य तैक्ष्ण्यं । देवदत्तस्य शुक्लाः । कंबलस्य कृष्णाः घृतस्य तीव्रः। चंदनस्य मृदुः । अत्र दंता वर्णा गंधाः इत्यर्थात्प्रकरणाद्वा अपेक्ष्य निर्ज्ञाने समा

Ac. Gunratnasuri MS Jin Gun Aradhak Trust

# नीचे लिखे जैनग्रंथ हमारे यहां विक्रयार्थ मौजूद हैं।

## संस्कृत वा प्राकृत।

१। आप्तपरीक्षा वा पत्रपरीक्षा–(दोनों साथ) विद्यानंदस्वामीकृत टीकासहित मूल्य १)
२। समयसारप्राभृत–तात्पर्यवृत्ति और आत्मख्याति टीकासहित ४)
३। तत्त्वार्थराजवार्तिक–मोक्षशास्त्रकी बड़ी टीका भट्टाकलंकदेवकृत ३ अंक पूर्वार्द्ध ३॥)
४। शब्दार्णवचंद्रिका–जैनेंद्रव्याकरणकी लघुवृत्ति-सोमदेवकृत प्रथमखंड १)
५। जैनेंद्रप्रक्रिया–आचार्यवर्य गुणनंदिविरचित (पूर्ण) १॥)
६। शब्दानुशासन–शाकटायनकी चिंतामणि लघुवृत्ति प्रथमखंड १)
७। आप्तमीमांसा सभाष्यसटीक–और प्रमाणपरीक्षा १)
८। प्रमेयकमलमार्त्तंड–(न्यायका अपूर्वग्रंथ) प्रभाचंद्राचार्यकृत ४)
९। शब्दानुशासन–(शाकटायन प्रक्रियासंग्रह श्रीअभयचंद्राचार्यकृत ३।)

## भाषा वा भाषाटीका सहित

१। जिनशतक–समंतभद्राचार्यकृत संस्कृत टीका और भाषा टीकासहित ॥)
२। धर्मरत्नोद्योत–चोपईबंध बाबू जगमोहनकृत जिल्द सहित १)
३। धर्मप्रश्नोत्तर—(प्रश्नोत्तरश्रावकाचार) वचनिका पं० लालारामजी कृत २)
४। पंचकल्याणकपाठ—बाबू जगमोहन कृत ≈)

ये चारों ग्रंथ एकसाथ मंगालेनेसे केवल ३) रुपयेमें भेजदेते हैं पोष्टेजखर्च ।≈) जुदा लगेगा।

मिलनेका पता ☞ पन्नालाल बाकलीवाल

व्यवस्थापक—भारतीय जैनसिद्धांतप्रकाशिनी संस्था

मदागिन जैनमंदिर पो० बनारस सिटी।

# जैनी भाइयोंसे प्रार्थना।

यह ग्रंथमाला प्राचीन जैनग्रंथोंके जीर्णोद्धारार्थ व जैनधर्मके प्रचारार्थ प्रकाशित की जाती है। इसमें जो कुछ द्रव्यलाभ होगा वह भी धर्मप्रचार व परोपकारमें ही लगाया जायगा। इसकारण प्रत्येक धर्मात्मा उदार महाशयोंको चाहिये कि प्रथम तो एकएक दोदो ग्रंथछपाकर जीर्णोद्धार करनेकेलिये अथवा अपने पिता आदिकी स्मृतिकेलिये द्रव्य प्रदान करें। दूसरे प्रत्येक मंदिरजीके शास्त्रभंडारमेंसे ग्राहक बनकर इन सब ग्रंथोंका संग्रह करके भगवानकी प्रतिमाकी तरह दर्शन पूजा व रक्षा करें अथवा स्वयं दानी ग्राहक (प्रचारक) बनकर अपने यहांके संस्कृत पढनेवाले विद्यार्थियोंकी अथवा संस्कृतज्ञ अन्यमती विद्वानोंको अथवा पुस्तकालयको दान देकर सत्यार्थ पदार्थोंका प्रचार करें। शास्त्रदानी महाशयोंकेलिये ही हमने पांचवां नियम बनाया है।

प्रार्थी–पन्नालाल बाकलीवाल।

Ac. Gunratnasuri MS Jin Gun Aradhak Trust

## इस ग्रंथमालामें क्रमशः नीचे लिखे ग्रंथ छपेंगे ।

### जैनदर्शनग्रंथ ।

| ग्रंथनाम— | टीकाकार व ग्रंथकर्त्ताओंके नाम— |
|---|---|
| तत्त्वार्थाधिगममोक्षशास्त्रपर गंधहस्तमहाभाष्य ( ८४००० श्लोक ) मिलनेपर | श्रीमत्स्वामी समंतभद्राचार्य |
| ,, श्लोकवार्तिकालंकार | स्याद्वादविद्यापति श्रीमद्विद्यानंदस्वामी |

### जैनसिद्धांतग्रंथ ।

| | |
|---|---|
| गोमट्टसार टीका | श्रीमदभयचंद्रसिद्धांतचक्रवर्ती |
| गोमट्टसार टीका | श्रीकेशववर्णी |
| परमात्मप्रकाश सटीक | श्रीयोगींद्रदेव |
| नाटकत्रय सटीक | श्रीमदमृतचंद्रसूरिप्रभृति |

### जैनन्यायग्रंथ ।

| | |
|---|---|
| न्यायविनिश्चयालंकार | श्रीमद्भट्टाकलंकदेव |
| न्यायमुदचंद्रोदय | श्रीमत्प्रभाचंद्राचार्य |
| आप्तमीमांसालंकृति ( अष्टसहस्री ) | स्याद्वादविद्यापति श्रीमद्विद्यानंदस्वामी |

### जैनव्याकरणग्रंथ ।

| | |
|---|---|
| शब्दानुशासन ( शाकटायन व्याकरण ) | श्रुतकेवलिदेशीय भगवान् शाकटायनाचार्य |
| शब्दानुशासन अमोघवृत्तिसहित | ( ? ) |
| शब्दानुशासन चिंतामणिटीकासहित | यक्षवर्मा |
| शब्दार्णव ( जैनेंद्रमहावृत्तिसहित ) | श्रीमत्पूज्यपादस्वामी देवनंद्याचार्य |
| प्राकृतलक्षण-शब्दचिंतामणिः स्वोपज्ञटीकासह | शुभचंद्राचार्य |

### जैनसाहित्यग्रंथ ।

| | |
|---|---|
| अलकारचिंतामणि सटीक | श्रीमदजितसेनाचार्य ( वादीभसिंहसूरि ) |
| विक्रांतकौरवीय नाटक | महाकवि हस्तिमल्ल |
| अंजनापवनंजय नाटक | " " |
| मैथिलीपरिणयनाटक और सुभद्रा नाटिका | " " |
| चतुःसंधान, सप्तसंधान, चतुर्विंशतिसंधान काव्य | श्रीमत्पंडितराज जगन्नाथ महाकवि |

### पौराणिक काव्यग्रंथ ।

| | |
|---|---|
| त्रिषष्ठिशलाका महापुराण ( प्राकृत ) | श्रीमत्पुष्पदंताचार्य |
| हरिवंशपुराण और पद्मपुराण " | " " |
| पद्मपुराण (जैनरामायण (१८,००० श्लोक)संस्कृत | श्रीमद्रविषेणाचार्य |
| पांडवपुराण (जैनमहाभारत) पार्श्वपुराण " | महाकविश्रीमद्वादिराजसूरि |

### गणितज्योतिष ग्रंथ

| | |
|---|---|
| गणितसारसंग्रह | गणिताचार्यशिरोमणि श्रीवीराचार्य |
| त्रिलोकसार सटीक ( प्राकृत ) | श्रीनेमिचंद्राचार्य जैनसिद्धांतचक्रवर्ती |
| भद्रबाहुसंहिता " सार्द्धद्वयद्वीपप्रज्ञप्ति | ज्योतिषाचार्य श्रीमद्भद्रबाहुस्वामी |
| जंबूद्वीपप्रज्ञप्ति " | श्रीपद्मनंद्याचार्य |
| चंद्रप्रज्ञप्ति और सूर्यप्रज्ञप्ति" | श्रीमदमितगत्याचार्य इत्यादि २ |

प्रिंटर हरिभाऊ उपाध्याय द्वारा औदुम्बर प्रेस, काठकी हवेली बनारस में छपा ।

Ac. Gunratnasuri MS Jin Gun Aradhak Trust